# Śrī Bhakti Sandarbha

# Appendix

# Sanskrit Text

तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद् विविच्यते ॥ १ ॥

तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥ २ ॥

१ । अत्र पूर्वं सन्दर्भचतुष्टयेन सम्बन्धो व्याख्यातः । तत्र पूर्णसनातनपरमानन्दलक्षणपरतत्त्वरूपं सम्बन्धि च ब्रह्म परमात्मा भगवानिति त्रिधाविर्भावतया शब्दितमिति निरूपितम् । तत्र च भगवत्त्वेनैवाविर्भावस्य परमोत्कर्षः प्रतिपादितः । प्रसङ्गेन विष्ण्वाद्याश्चतुःसनाद्याश्च तदवतारा दर्शिताः । स च भगवान् स्वयं श्रीकृष्ण एवेति निर्धारितम् ।
परमात्मवैभवगणने च तत्तटस्थशक्तिरूपाणां चिदेकरसानामप्यनादिपरतत्त्वज्ञानसंसर्गाभावमयतद्वैमुख्यलब्धच्छिद्रया तन्माययावृतस्वस्वरूपज्ञानानां तयैव सत्त्वरजस्तमोमये जडे प्रधाने रचितात्मभावानां जीवानां संसारदुःखं च ज्ञापितम् ।
यथोक्तमेकादशे श्रीभगवता (भा० ११।२२।३३) —

आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः ।
व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥ ३ ॥ इति ।

अतस्तदर्थं परमकारुणिकं शास्त्रमुपदिशति । तत्र च ये केचित् जीवा जन्मान्तरावृत्ततदर्थानुभवसंस्कारवन्तो ये च तदैव वा लब्धमहत्कृपातिशयदृष्टिप्रभृतयस्तेषां तादृशपरतत्त्वलक्षणवस्तूपदेशश्रवणारम्भमात्रेणैव तत्कालमेव युगपदेव तत्साम्मुख्यं तदनुभवोऽपि जायते ।
यथोक्तम् “किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्” (भा० १।१।२) इति ।

ततस्तेषां नोपदेशान्तरापेक्षा । यादृच्छिकमुपदेशान्तरश्रवणं तु तल्लीलादिश्रवणवत् तदीयरसस्यैवोद्दीपकं यथा श्रीप्रह्लादादीनाम् ।
अथान्येषां तच्छ्रवणमात्रेण तादृशत्वं बीजायमानमपि कामादिवैगुण्येन बीजमपि दोषेण प्रतिहतं तिष्ठति (भा० ७।९।३९) —

नैतन् मनस्तव कथासु विकुण्ठनाथ सम्प्रीयते दुरितदुष्टमसाधु तीव्रम् ।
कामातुरं हर्षशोकभयैषणार्तं तस्मिन् कथं तव गतिं विमृशामि दीनः ॥ ४ ॥

इति दीनं मन्यश्रीमत्प्रह्लादवचनानुसारेणान्येषामेव तत्प्राप्तेः ।
एवमेवोक्तं ब्रह्मवैवर्ते —

यावत् पापैस्तु मलिनं हृदयं तावदेव हि ।
न शास्त्रे सत्यबुद्धिः स्यात् सद्बुद्धिः सद्गुरौ तथा ॥ ५ ॥
अनेकजन्मजनितपुण्यराशिफलं महत् ।
सत्सङ्गशास्त्रश्रवणादेव प्रेमादि जायते ॥ ६ ॥ इति ।

ततो मुख्येन तात्पर्येण परतत्त्वे पर्यवसितेऽपि तेषां परतत्त्वाद्युपदेशस्य किमभिधेयं प्रयोजनं चेत्यपेक्षायां तदवान्तरतात्पर्येण तद् द्वयमुपदेष्टव्यम् । तत्राभिधेयं तद्वैमुख्यविरोधित्वात् तत्साम्मुख्यमेव । तच्च तदुपासनलक्षणं यत एव तज्ज्ञानमाविर्भवति ।
प्रयोजनं च तदनुभवः । स चान्तर्बहिःसाक्षात्कारलक्षणः यत एव स्वयं कृत्स्नदुःखनिवृत्तिर्भवति ।
तदेतदुभयं यद्यपि पूर्वत्र सिद्धोपदेश एवाभिप्रेतमस्ति यथा "तव गृहे निधिरस्ति" इति श्रुत्वा कश्चिद् दरिद्रस्तदर्थं प्रयतते लभते च तमिति तद्वत् तथापि तच्छैथिल्यनिरासाय पुनस्तदुपदेशः । तदेवं तान् प्रत्यनादिसिद्धतज्ज्ञानसंसर्गाभावमयतद्वैमुख्यादिकं दुःखहेतुं वदन् व्याधिनिदानवैपरीत्यमयचिकित्सानिभं तत्साम्मुख्यमुपदिशति ।
भा० ११।२।३७ —

भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ।
तन्माययातो बुध आभजेत् तं भक्त्यैकयेशं गुरुदेवतात्मा ॥ ७ ॥

टीका च — "यतो भयं तन्मायया भवेद् ततो बुधो बुद्धिमान् तमेवाभजेदुपासीत ।
ननु भयं द्वितीयाभिनिवेशतो भवति । स च देहाद्यहङ्कारतः । स च स्वरूपास्फुरणात् ।
किमत्र तस्य माया करोति ?
अत आह 'ईशादपेतस्य' इति । ईशविमुखस्य तन्माययाऽस्मृतिः स्वरूपास्फूर्तिर्भवति ततो विपर्ययो देहोऽस्मीति । ततो द्वितीयाभिनिवेशाद् भयं भवति । एवं हि प्रसिद्धं लौकिकीष्वपि मायासु ।
उक्तं च भगवता (गीता ७।१४) —

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ ८ ॥ इति ।

एकयाऽव्यभिचारिण्या भक्त्या भजेत् । किं च गुरुदेवतात्मा गुरुरेव देवता ईश्वर आत्मा प्रेष्ठश्च यस्य तथादृष्टिः सन्नित्यर्थः” इत्येषा ॥ श्रीकविर्विदेहम् ॥

२ । किं च (भा० २।२।६) —

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः ।
तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ९ ॥

टीका च — “तदा तेन किं कर्तव्यम् ? हरिस्तु सेव्य इत्याह ‘एवं विरक्तः सन् तं भजेत’ । भजनीयत्वे हेतवः ‘स्वचित्ते स्वत एव सिद्धः’ । यत आत्मा अत एव प्रियः । प्रियस्य च सेवा सुखरूपैव । अर्थः सत्यः । न त्वनात्मवन् मिथ्या । भगवान् भजनीयगुणश्च अनन्तश्च नित्यः । य एवम्भूतस्तं भजेत ।
नियतार्थश्च निश्चितस्वरूपः । तदनुभवानन्देन निर्वृतः सन्निति भक्तेः स्वतः सुखात्मकत्वं दर्शितम् । किं च यत्र यस्मिन् भजने सति संसारहेतोरविद्याया उपरमो नाशो भवति” इत्येषा । अत्र चकारात् तत्प्राप्तिर्ज्ञेया ॥ श्रीशुकः ॥

३ । तत्र यद्यपि श्रवणमननादिकं ज्ञानसाधनमपि तत्साम्मुख्यमेव — ब्रह्माकारस्य तस्यानुभवहेतुत्वात् । अत एव तत्परम्परोपयोगित्वात् साङ्ख्याष्टाङ्गयोगकर्माण्यपि तत्साम्मुख्यान्येव तथा तेषां कथञ्चिद् भक्तित्वमपि जायते — कर्मणस्तदाज्ञापालनरूपत्वेन तदर्पितत्वादिना च करणात् ज्ञानादीनां चान्यत्रानासक्तिहेतुत्वादिद्वारा भक्तिसचिवतया विधानात् तथापि पूर्वम् “भक्त्याभजेत्” (भा० ११।२।३७) इत्यनेन कर्मज्ञानादिकं नादृतं किन्तु साक्षाद्भक्त्या श्रवणकीर्तनादिलक्षणयैव भजेतेत्युक्तम् ।
तथैव सहेतुकं श्रीसूतोपदेशोपक्रमत एव दृश्यते । यथाह “स वै” (भा० १।२।६) इत्यादिना “अतो वै कवयः” (भा० १।२।२२) इत्यन्तेन ग्रन्थेन ।
तत्र (भा० १।२।६) —

स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ।
अहैतुक्यप्रतिहता ययात्मा सुप्रसीदति ॥ १० ॥

यत् खलु महापुराणारम्भे पृष्टं सर्वशास्त्रसारमैकान्तिकं श्रेयो ब्रूहीति तत्रोत्तरम् “स वै” इत्यादि ।
यतो धर्मादधोक्षजे भक्तिस्तत्कथाश्रवणादिषु रुचिर्भवति “धर्मः स्वनुष्ठितः” (भा० १।२।८) इत्यादौ व्यतिरेकेण दर्शयिष्यमाणत्वात् ।

स वै स एव "स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम्" (भा० १।२।१३) इति वक्ष्यमाणरीत्या तत्सन्तोषणार्थमेव कृतो धर्मः परः सर्वतः श्रेष्ठः न निवृत्तिमात्रलक्षणोऽपि वैमुख्याविशेषात् । तथा च श्रीनारदवाक्यम् "नैष्कर्म्यमप्यच्युतभाववर्जितम्" (भा० १।५।१२) इत्यादौ "कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्" (भा० १।५।१२) इति ।
अतो वक्ष्यते "अतः पुम्भिः" (भा० १।२।१३) इत्यादि । ततः स एवैकान्तिकं श्रेय इत्यर्थः ।
अनेन भक्तेस्तादृशधर्मतोऽप्यतिरिक्तत्वमुक्तम् ।
तस्या भक्तेः स्वरूपगुणमाह — स्वत एव सुखरूपत्वात् "अहैतुकी" फलान्तरानुसन्धानरहिता । अप्रतिहता तदुपरि सुखदुःखदपदार्थान्तराभावात् केनापि व्यवधातुमशक्या च ।
जातायां च तस्यां रुचिलक्षणायां भक्त्यां तयैव श्रवणादिलक्षणः साधनभक्तियोगः प्रवर्तितः स्यात् ॥

४ । ततश्च "यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः" (भा० ५।१८।१२) इत्यनुसारेण भगवत्स्वरूपादिज्ञानं ततोऽन्यत्र वैराग्यं च तदनुगाम्येव स्यादित्याह (भा० १।२।७) —

> वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
> जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम् ॥ ११ ॥

अहैतुकं शुष्कतर्काद्यगोचरमौपनिषदं ज्ञानमाशु ईषच्छ्रवणमात्रेण जनयतीत्यर्थः ॥

५ । व्यतिरेकेणाह (भा० १।२।८) —

> धर्मः स्वनुष्ठितः पुंसां वासुदेवकथासु यः ।
> नोत्पादयेद् यदि रतिं श्रम एव हि केवलम् ॥ १२ ॥

वासुदेवतोषणाभावेन यदि तत्कथासु तत्तल्लीलावर्णनेषु रतिं रुचिं नोत्पादयेत् तदा श्रमः स्यान् न तु फलम् । कथारुचेः सर्वत्रैवाद्यत्वात् श्रेष्ठत्वाच्च सैवोक्ता । तदुपलक्षणत्वेन भजनान्तररुचिरप्युपदिष्टा । एवशब्देन प्रवृत्तिलक्षणकर्मफलस्य स्वर्गादेः क्षयिष्णुत्वम् । हिशब्देन तत्रैव च "तद् यथेह कर्मजितो लोकः क्षीयते" (छा० ८।१।६) इति सोपपत्तिकश्रुतिप्रमाणत्वम् ।
"निर्णीते केवलम्" इत्यमरकोषात् केवलमित्यव्ययेन निवृत्तिमात्रलक्षणधर्मफलस्य च ज्ञानस्यासाध्यत्वं सिद्धस्यापि नश्वरत्वं तत्रापि तेनैव हिशब्देन "यस्य देवे परा भक्तिः" (श्वे० ६।२३) इत्यादिश्रुतिप्रमाणत्वम् "नैष्कर्म्यमप्यच्युतभाववर्जितम्" (भा० १।५।१२) इत्यादि "श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये" (भा० १०।१४।४) इत्यादि "आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः" (भा० १०।२।३२) इत्यादि वचनप्रमाणत्वं च सूचितम् ।
श्लोकद्वयेन भक्तिर्निरपेक्षा ज्ञानवैराग्ये तु तत्सापेक्षे इति लभ्यते । तदेवं भक्तिफलत्वेनैव धर्मस्य साफल्यमुक्तम् ॥

६ । तत्र यदन्ये मन्यन्ते—धर्मस्यार्थः फलं तस्य कामस्तस्य चेन्द्रियप्रीतिस्तत्प्रीतेश्च पुनरपि धर्मादिपरम्परेति तच् चान्यथैवेत्याह द्वाभ्याम् (भा० १।२।९-१०)—

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ।
नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥ १३ ॥
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ।
जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥ १४ ॥

आपवर्ग्यस्य—"यथावर्णविधानमपवर्गश्च भवति । योऽसौ भगवति सर्वात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः" (भा० ५।१९।१९-२०) इति पञ्चमस्कन्धगद्यानुसारेणापवर्गो भक्तिः ।
तथा च स्कान्दे रेवाखण्डे—

निश्चला त्वयि भक्तिर्या सैव मुक्तिर्जनार्दन ।
मुक्ता एव हि भक्तास्ते तव विष्णो यतो हरे ॥ १५ ॥ इति ।

तत उक्तरीत्या भक्तिसम्पादकस्येत्यर्थः ।
टीका च—"अर्थाय फलत्वाय । अर्थो नोपकल्पते योग्यो न भवति तथार्थस्याप्येवम्भूतधर्माव्यभिचारिणः कामो लाभाय फलत्वाय न हि स्मृतस्तत्त्वविद्भिः । कामस्य विषयभोगस्येन्द्रियप्रीतिर्लाभः फलं न भवति किन्तु यावता जीवेत तावानेव कामस्य लाभस्तादृशजीवनपर्याप्ति एव कामः सेव्य इत्यर्थः । जीवस्य जीवनस्य च पुनर्धर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः स्वर्गादिः सोऽर्थो न भवति किन्तु तत्त्वजिज्ञासैव" इति ।
तदेवं तत्त्वज्ञानं यस्या भक्तेरवान्तरफलमुक्तं सैव परमं फलमिति भावः ।
किं तत्त्वम् ? इत्यपेक्षायां पद्यमेकं तूदाहृतम् (भा० १।२।११)—

वदन्ति तत् तत्त्वविदस्तत्त्वं यज् ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ १६ ॥ इति ।

अद्वयमिति तस्याखण्डत्वं निर्दिश्यान्यस्य तदनन्यत्वविवक्षया तच्छक्तित्वमेवाङ्गीकरोति । तत्र शक्तिवर्गलक्षणतद्धर्मातिरिक्तं केवलं ज्ञानं ब्रह्मेति शब्द्यते । अन्तर्यामित्वमयमायाशक्तिप्रचुरचिच्छक्त्यंशविशिष्टं परमात्मेति । परिपूर्णसर्वशक्तिविशिष्टं भगवानिति । विवृतं चैतत् प्राक्तनसन्दर्भत्रयेण ॥

७ । तच्च त्रिधाविर्भावयुक्तमेव तत्त्वं भक्त्यैव साक्षादपि क्रियत इत्याह (भा० १।२।१२)—

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ।
पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥ १७ ॥

भक्त्या तत्कथारुचेरेव परावस्थारूपया प्रेमलक्षणया । तत् पूर्वमेवोक्तं तत्त्वम् । आत्मनि शुद्धे चेतसि पश्यन्ति च — ज्ञानमात्रस्य का वार्ता साक्षादपि कुर्वन्तीत्यर्थः । कीदृशं तत् ? आत्मानं स्वरूपाख्यजीवाख्यमायाख्यशक्तीनामाश्रयम् । ज्ञानवैराग्ययुक्तया स्वात्मजाभ्यां ताभ्यां सेवितया । अत एव च ते मुनयः पृथक् च विशिष्टं च स्वेच्छया पश्यन्तीत्यायाति । तदेवम् "श्रुतगृहीतया" "मुनयः" "श्रद्दधानाः" इति पदत्रयेण तस्या एव भक्तेर्दौर्लभ्यं दर्शितम् ।
सद्गुरोः सकाशाद् वेदान्ताद्यखिलशास्त्रार्थविचारश्रवणद्वारा यदि सा (भक्तिः) आवश्यकपरमकर्तव्यत्वेन ज्ञायते पुनश्च (भा० २।२।३४) —

भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेत् ॥ १८ ॥

इतिवद् यदि विपरीतभावनात्याजकौ मननयोग्यतामननाभिनिवेशौ स्यातां ततः श्रद्दधानैश्च सा भक्तिरुपासनद्वारा लभ्यते इति ।
अतः श्रुतिरपि तदर्थमागृह्णाति "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि" (बृ० २।४।५) इत्यत्र निदिध्यासनमुपासनम् । दर्शनं साक्षात्कार उच्यते ॥

८ । सा चैवं दुर्लभा भक्तिः श्रीहरितोषणे प्रयुक्तात् स्वाभाविकधर्मादपि लभ्यते । तस्माद्धरितोषणमेव तस्य परमफलमित्याह (भा० १।२।१३) —

अतः पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ।
स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥ १९ ॥

स्वनुष्ठितस्य बहुप्रयत्नेनाच्छिद्रमुपार्जितस्येति तुच्छे स्वर्गादिफले तत्प्रयोगोऽतीवायुक्त इति भावः ॥

९ । यद्येवं श्रीहरिसन्तोषकस्यापि धर्मस्य फलं श्रवणादिरुचिलक्षणा भक्तिरेव तदनुगतास्तत्प्रवर्तिताश्च ज्ञानवैराग्यादिगुणा इत्यायातं तदा साक्षाच्छ्रवणादिरूपा भक्तिरेव कर्तव्या । किं तत् तदाग्रहेणेत्याह (भा० १।२।१४) —

तस्मादेकेन मनसा भगवान् सात्वतां पतिः ।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ २० ॥

एकेन कर्माद्याग्रहशून्येन । श्रवणमत्र नामगुणादीनां तथा कीर्तनञ्च ॥

१० । तत्रैवान्तिमभूमिकापर्यन्तां सुगमां शैलीं वक्तुं धर्मादिकष्टनिरपेक्षेण युक्तिमात्रेण तत्प्रथमभूमिकां श्रीहरिकथारुचिमुत्पादयंस्तस्य गुणं स्मारयति (भा० १।२।१५) —

यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम् ।
छिन्दन्ति कोविदास्तस्य को न कुर्यात् कथारतिम् ॥ २१ ॥

कोविदा विवेकिनः । युक्ताः संयतचित्ता यस्य हरेः "अनुध्या" अनुध्यानं चिन्तनमात्रम् स एवासिः खड्गस्तेन ग्रन्थिं नानादेहेष्वहङ्कारं निबध्नाति यत्तत् कर्म छिन्दन्ति । तस्यैवम्भूतस्य परमदुःखादुद्धर्तुः कथायां रतिं रुचिं को न कुर्यात् ?

११ । नन्वेवमपि तस्य कथारुचिर्मन्दभाग्यानां च न जायत इत्याशङ्क्य तत्र सुगमोपायं वदन् तामारभ्य नैष्ठिकीपर्यन्तां भक्तिमुपदिशति पञ्चभिः (भा० १।२।१६) —

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान् महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥ २२ ॥

"भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदाः" (भा० १०।८७।३५) इत्याद्यनुसारेण "प्रायस्तत्रैव सङ्गो भवति" इति तदीयटीकानुमत्या च पुण्यतीर्थनिषेवणाद्धेतोर्लब्धा यदृच्छया या महत्सेवा तया वासुदेवकथारुचिः स्यात् ।
कार्यान्तरेणापि तीर्थे भ्रमतो महतां प्रायस्तत्र भ्रमतां तिष्ठतां वा दर्शनस्पर्शनसम्भाषणादिलक्षणा सेवा स्वत एव सम्पद्यते । तत्प्रभावेण च तदीयाचरणे श्रद्धा भवति । तदीयस्वाभाविकपरस्परभगवत्कथायां किमेते सङ्कथयन्ति ? तत् शृणोमीति तदिच्छा जायते । तच्छ्रवणेन च तस्यां रुचिर्जायत इति । तथा च महद्भ्य एव श्रुता झटिति कार्यकरीति भावः ।
तथा च श्रीकपिलदेववाक्यम् "सतां प्रसङ्गान् मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः" (भा० ३।२५।२३) इत्यादि ॥

१२ । ततश्च (भा० १।२।१७) —

शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः ।
हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥ २३ ॥

कथाद्वारा अन्तःस्थो भावनापदवीं गतः सन् हृदि अभद्राणि वासनाः ॥

१३ । ततश्च (भा० १।२।१८) —

नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ।
भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥ २४ ॥

नष्टप्रायेषु न तु ज्ञानमिव सम्यङ्नष्टेष्वेवेति भक्तेर्निरर्गलस्वभावत्वमुक्तम् । भागवतानां भागवतशास्त्रस्य च सेवया भक्तिरनुध्यानरूपा नैष्ठिकी सन्ततैव भवति ॥

१४ । तदैव "त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिः" (भा० ११।२।५३) इत्याद्युक्तरीत्या सर्ववासनानाशात् चित्तं शुद्धसत्त्वमग्रं सत् भगवत्तत्त्वसाक्षात्कारयोग्यं भवतीत्याह (भा० १।२।१९) —

तदा रजस्तमोभावाः कामलोभादयश्च ये ।
चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥ २५ ॥

रजश्च तमश्च ये च तत्प्रभवा भावाः कामादयः । एतैरित्यन्वयः ॥

१५ । भा० १।२।२० —

एवं प्रसन्नमनसो भगवद्भक्तियोगतः ।
भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते ॥ २६ ॥

एवं पूर्वोक्तप्रकारेण प्रसन्नमनसस्ततो मुक्तसङ्गस्य त्यक्तकामादिवासनस्य भक्तियोगतः पुनरपि क्रियमाणात् तस्माद् विज्ञानं साक्षात्कारो मनसि बहिर्वा भावनां विनैवानुभवो यः स जायते ॥

१६ । तस्य च परमानन्दैकरूपत्वेन स्वतः फलरूपस्य साक्षात्कारस्यानुषङ्गिकं फलमाह (भा० १।२।२१) —

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ २७ ॥

हृदयग्रन्थिरुपाध्यहङ्कारः । सर्वसंशयाश्छिद्यन्त इति श्रवणमननादिप्रधानानामपि तस्मिन् दृष्ट एव सर्वे संशयाः समाप्यन्त इत्यर्थः । तत्र श्रवणेन तावज्ज्ञेयगतासम्भावनाश्छिद्यन्ते मननेन तद्गतविपरीतभावना साक्षात्कारेण त्वात्मयोग्यतागतासम्भावनाविपरीतभावने इति ज्ञेयम् । क्षीयन्ते तदिच्छामात्रेणैव तदाभासो न किञ्चिदेव तेष्ववशिष्यत इत्यर्थः ॥

१७ । अत्र प्रकरणार्थे सदाचारं दर्शयन्नुपसंहरति (भा० १।२।२२) —

अतो वै कवयो नित्यं भक्तिं परमया मुदा ।
वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीम् ॥ २८ ॥

आत्मप्रसादनीं मनसः शोधनीम् । न केवलमेतावद्गुणत्वं तस्याः किं च परमया मुदेति कर्मानुष्ठानवन् न साधनकाले साध्यकाले वा भक्त्यनुष्ठानं दुःखरूपं प्रत्युत सुखरूपमेवेत्यर्थः । अत एव नित्यं साधकदशायां सिद्धदशायां चैव तावत् कुर्वन्तीत्युक्तम् ॥ श्रीसूतः ॥

१८ । तदेवं कर्मज्ञानवैराग्ययत्नपरित्यागेन भगवद्भक्तिरेव कर्तव्येति मतम् । कर्मविशेषरूपं देवतान्तरभजनमपि न कर्तव्यमित्याह सप्तभिः । तत्रान्येषां का वार्ता सत्यपि श्रीभगवत एव गुणावतारत्वे श्रीविष्णुवत् साक्षात्परमब्रह्मत्वाभावात् सत्त्वमात्रोपकारकत्वाभावाच्च प्रत्युत रजस्तमोबृंहणत्वाच्च ब्रह्मशिवावपि श्रेयोऽर्थिभिर्नोपास्यावित्यत्र द्वौ श्लोकौ परमात्मसन्दर्भे एवोदाहृतौ (भा० १।२।२३–२४) —

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति सञ्ज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ २९ ॥
पार्थिवाद् दारुणो धूमस्तस्मादग्निस्त्रयीमयः ।
तमसस्तु रजस्तस्मात् सत्त्वं यद् ब्रह्मदर्शनम् ॥ ३० ॥

सत्त्वतनोः सत्त्वशक्तेः । त्रयीमयस्त्रय्युक्तकर्मप्रचुरः । दारुस्थानीयं तमः । धूमस्थानीयं रजः । अग्निस्थानीयं सत्त्वम् । त्रय्युक्तकर्मस्थानीयं ब्रह्म । पार्थिवादिति यथा धूमोऽंशेनाग्नीयो भवति दारु तु तथा नेति अत्र स्वल्पं त्रयीमयत्वं भवति । एवं यथा रजसः सत्त्वसन्निहितत्वं तथा तमसो नेति । ब्रह्मसन्निहितत्वं स्वल्पं ज्ञेयम् । ततश्च त्रय्युक्तकर्म यथाग्नावेव साक्षात् प्रवर्तते नान्ययोस्तद्वत् परब्रह्मभूतो भगवानपि सत्त्व एवेत्यर्थः । देवतान्तरपरित्यागेनापि भगवद्भक्तौ सदाचारं प्रमाणयति (भा० १।२।२५) —

भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम् ।
सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह ॥ ३१ ॥

अथ अतो हेतोः । अग्रे पुरा । सत्त्वं विशुद्धं विशुद्धसत्त्वात्मकमूर्तिं भगवन्तम् । प्राकृतसत्त्वातीतत्वं च तस्य विवृतं (अनु० ९९) भगवत्सन्दर्भे । अतो येताननु वर्तन्ते त इह संसारे क्षेमाय कल्पन्ते ॥

१९ । नन्वन्यान् भैरवादीन् देवानपि केचिद् भजन्तो दृश्यन्ते ? सत्यं यतस्ते सकामाः । किन्तु मुमुक्षवोऽप्यन्यान् न भजन्ते । किमुत तद्भक्त्येकपुरुषार्था इत्याह (भा० १।२।२६) —

मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ ।
नारायणकलाः शान्ता भजन्ति ह्यनसूयवः ॥ ३२ ॥

भूतपतीनिति पितृप्रजेशादीनामुपलक्षणम् । अनसूयवो देवतान्तरानिन्दकाः सन्तः ॥

२० । ननु कामलाभोऽपि लक्ष्मीपतिभजने भवत्येव । तर्हि कथमन्यांस्ते भजन्ते ? तत्राह (भा० १।२।२७) —

रजस्तमः प्रकृतयः समशीला भजन्ति वै ।
पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ ३३ ॥

रजस्तमः प्रकृतित्वेनैव पित्रादिभिः समं शीलं येषां समशीलत्वादेव तद्भजने प्रवृत्तिरित्यर्थः ॥

२१ । ततो वासुदेव एव भजनीय इत्युक्तम् । सर्वशास्त्रतात्पर्यं च तत्रैवेत्याह द्वाभ्याम् (भा० १।२।२८–२९) —

वासुदेवपरा वेदा वासुदेवपरा मखाः ।
वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ ३४ ॥
वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ ३५ ॥

टीका च — "वासुदेवः परस्तात्पर्यगोचरो येषां ते । ननु वेदा मखपरा दृश्यन्ते ? इत्याशङ्क्य तेऽपि तदाराधनार्थत्वात् तत्परा एवेत्युक्तम् । योगा योगशास्त्राणि । तेषामप्यासनप्राणायामादिक्रियापरत्वमाशङ्क्य तासामपि तत्प्राप्त्युपायत्वात् तत्परत्वमुक्तम् । ज्ञानं ज्ञानशास्त्रम् । ननु तज्ज्ञानपरमेवेत्याशङ्क्य ज्ञानस्यापि तत्परत्वमुक्तम् । तपोऽत्र ज्ञानम् । धर्मो धर्मशास्त्रं दानव्रतादिविषयम् । ननु तत्स्वर्गादिपरमित्याशङ्क्य तस्यापि तदधीनत्वात् तत्परत्वम् । गम्यत इति गतिः स्वर्गादिफलम् । सापि तदानन्दांशप्रकाशरूपत्वात् तत्परैवेत्युक्तम् ।
यद्वा वेदा इत्यनेनैव तन्मूलत्वात् सर्वाण्यपि वासुदेवपराणीत्युक्तम् । ननु वेदानां तेषां मखयोगक्रियादिनानार्थपरत्वान् न तदेकपरत्वमित्याशङ्क्य मखादीनामपि तत्परत्वमुक्तमिति द्रष्टव्यम्" इत्येषा ।
अत्र योगादीनां कथञ्चिद् भक्तिसचिवत्वेनैव तत्परत्वं मुख्यं द्रष्टव्यम् । वेदाश्च कर्मकाण्डपरा एव ज्ञेयाः केषाञ्चित् साक्षाद्भक्तिपरत्वमपि दृश्यत इति (श्वे० ६।२३) —

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ३६ ॥ इत्यादेः ॥

२२ । तदेवं तद्भजनस्यैवाभिधेयत्वं दर्शयित्वा पूर्वोक्तं सर्वशास्त्रसमन्वयमेव स्थापयति (भा० १।२।३०) —

स एवेदं ससर्जाग्रे भगवानात्ममायया ।
सदसद्रूपया चासौ गुणमय्यागुणो विभुः ॥ ३७ ॥ इत्यादि ।

टीका च — "ननु जगत्सर्गप्रवेशनियमनादिलीलायुक्ते वस्तुनि सर्वशास्त्रसमन्वयो दृश्यते कथं वासुदेवपरत्वं सर्वस्य ? तत्राह 'स एव' इति चतुर्भिः" इत्येषा ।
इदं महदादिविरिञ्चिपर्यन्तम् । एवं प्रवेशादिकाप्युत्तरश्लोकेषु द्रष्टव्या ॥ श्रीसूतः श्रीशौनकम् ॥

२३ । श्रीभागवताविर्भावकारणे श्रीनारदव्याससंवादेऽपि (भा० १।५।१२) —

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥ ३८ ॥
इत्याद्युदाहृतम् ।

टीका च — "निष्कर्म ब्रह्म तदेकाकारत्वान् निष्कर्मतारूपं नैष्कर्म्यम् । अज्यते अनेनेत्यञ्जनमुपाधिस्तन्निवर्तकं निरञ्जनम् । एवम्भूतमपि ज्ञानमच्युते भावो भक्तिस्तद्वर्जितं चेदलमत्यर्थं न शोभते सम्यगपरोक्षाय न कल्पत इत्यर्थः । तदा शश्वत् साधनकाले फलकाले च अभद्रं दुःखरूपं यत् काम्यं कर्म यदप्यकारणमकाम्यं तच् चेति चकारस्यान्वयः । तदपि कर्म ईश्वरे नार्पितं चेत् कुतः पुनः शोभते ? बहिर्मुखत्वेन सत्त्वशोधकत्वाभावात्" इत्येषा ।
तदेवं ज्ञानस्य भक्तिसंसर्गं विना कर्मणस्तदुपपादकत्वं विना व्यर्थत्वं व्यक्तम् । किं च — "जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः" (भा० १।५।१५) इत्यादिकमुक्त्वाह (भा० १।५।१७) —

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत् ततो यदि ।
यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः ॥ ३९ ॥

टीका च — "इदानीं तु नित्यनैमित्तिकस्वधर्मनिष्ठामप्यनादृत्य केवलं हरिभक्तिरेवोपदेष्टव्येत्याशयेनाह 'त्यक्त्वा' इति । ननु स्वधर्मत्यागेन भजन् भक्तिपरिपाकेन यदि कृतार्थो भवेत् तदा न काचिच् चिन्ता । यदि पुनरपक्व एव म्रियते ततो भ्रश्येद्वा तदा तु स्वधर्मत्यागनिमित्तोऽनर्थः स्यादित्याशङ्क्याह — ततो भजनात् पतेत् कथञ्चिद् भ्रश्येन् म्रियते वा यदि तदापि भक्तिरसिकस्य कर्मानधिकारान् नानर्थशङ्का अङ्गीकृत्याप्याह ।
वाशब्दः कटाक्षे । यत्र क्व वा नीचयोनावपि अमुष्य भक्तिरसिकस्य अभद्रमभूत् किम् ? नाभूदेवेत्यर्थः । भक्तिवासनासद्भावादिति भावः । अभजद्भिस्तु केवलं स्वधर्मतः को वार्थ आप्तः प्राप्तः ? अभजतामिति षष्ठी तु सम्बन्धमात्रविवक्षया" इत्येषा ॥ श्रीनारदः श्रीव्यासम् ॥

२४ । तदेवं "भक्तिरेवाभिधेयं वस्तु" इत्युक्तम् । तथैव श्रीशुकपरीक्षित्संवादोपक्रमेऽपि (भा० २।१।२) —

श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः ।
अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥ ४० ॥ इत्यादि ।

गृहेष्वित्यादिकमुपलक्षणं बहिर्मुखानाम् । आत्मतत्त्वं भगवत्तत्त्वं तथा निगमयिष्यमाण-त्वात् ॥

२५ । निगमयति (भा० २।१।५) —

> तस्माद् भारत सर्वात्मा भगवानीश्वरो हरिः ।
> श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् ॥ ४१ ॥

टीका च — "सर्वात्मेति प्रेष्ठत्वमाह भगवानिति सौन्दर्यम् । ईश्वर इत्यावश्यकत्वं हरिरिति बन्धहारित्वम् । अभयं मोक्षमिच्छता" इत्येषा ।
मोक्षस्तु सर्वक्लेशशान्तिपूर्वकभगवत्प्राप्तिरेवेति ज्ञेयम् ॥

२६ । एतदनन्तरं विराड्धारणामुक्त्वा तदपवादेनापि तां भक्तिमाह (भा० २।१।३९) —

> स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः ।
> तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद् यत आत्मपातः ॥ ४२ ॥

टीका च — "सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स एक एव सर्वान्तरात्मा । तमेव सत्यं भजेत । अन्यत्रोपलक्षणे न सज्जेत । यत आसङ्गादात्मनः पातः संसारो भवति । एकस्य तत्तदिन्द्रियैः सर्वानुभूतौ दृष्टान्तः 'स्वप्नजनानामीक्षिता यथा' इति । स्वप्नेऽपि कदाचिद् बहून् देहान् प्रकल्प्य जीवस्तत्तदिन्द्रियैः सर्वं पश्यति तद्वत् । ईश्वरस्य तु विद्याशक्तित्वान् न बन्धः" इत्येषा ।
अत्र स्वधीवृत्तिभिः पश्यन्नेव सर्वेषां धीवृत्तिभिरपि सर्वं पश्यतीत्येव । तथोक्तम् "स ऐक्षत" (बृ० १।२।५) इत्यत्र सर्वधीवृत्तिसृष्टेः पूर्वमपि तच्छ्रवणात् । तथा स्वप्नदेहानामीश्वरकर्तृक-त्वेऽपि जीवकर्तृकप्रकल्पनकथनं तत्सङ्कल्पद्वारैवेश्वरः करोतीत्यपेक्षायामुक्तम् ।
"यः सर्वधी" इत्यनुक्तत्वात् "सत्यं भजेत" इति योजयितव्यस्य कर्तुर्विद्यमानत्वादयमेवा-र्थः —
स तथाभूतविराड्धारणासिद्धो योगी विराड्गताभिः सर्वाभिर्धीवृत्तिभिर्ज्ञानेन्द्रियैरनुभूतं सर्वं विराड्गतं येन तथाभूतोऽपि सन् तं सत्यमानन्दनिधिं विराडन्तर्यामिनं श्रीनारायणमेव भजेत । अन्यत्र विराड्गते तद्धारणावान्तरफले च कुत्रापि न सज्जेत् यतः सज्जनादात्मपातः संसार एव स्यात् । तस्य सर्वानुभूतौ दृष्टान्तः — आत्मा स्वप्नद्रष्टा जीवो यथा स्वप्नगतानां सर्वेषां जनानां तदुपलक्षितानां वस्तूनां च य एक एव ईक्षिता भवतीति तद्वत् ।
अत्र तमित्यनेन "स ऐक्षत" (बृ० १।२।५) इति "स्वाभाविकी ज्ञानबलक्रिया च" (श्वे० ६।८) इति श्रुतिप्रसिद्धपरानपेक्षज्ञानादिसिद्धेस्तथा "सन्ध्ये सृष्टिराह हि" (ब्र० सू० ३।२।१) "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" (ब्र० सू० ३।२।३) इति न्यायप्राप्तेन स्वप्नस्यापि कर्तृत्वेन जाग्रदादिमयजगत्कर्तृत्वस्य पूर्णत्वप्राप्ते वैलक्षण्यं दर्शितम् । सत्यादिद्वयेन परमपुरुषार्थत्वं चेति विज्ञेयम् ॥ श्रीशुकः ॥

२७ । एतदनन्तराध्यायेऽपि तथैवाह (भा० २।२।१४) —

यावन् न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ ४३ ॥

परे ब्रह्मादयोऽवरे यस्मात् । कुतः ? विश्वेश्वरे द्रष्टरि न तु दृश्ये चैतन्यघनत्वात् । भक्तियोगः "केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तं चतुर्भुजम्" (भा० २।२।८) इत्यादिनोक्तसाधनलक्षणाभिनिवेशः ।
क्रियावसाने आवश्यककर्मानुष्ठानानन्तरम् । अनेन कर्मापि भक्तियोगपर्यन्तमित्युक्तम् ॥

२८ । तथा च "स्थिरं सुखं चासनम्" (भा० २।२।१५) इत्यादिना "यदि प्रयास्यन् नृप पारमेष्ठ्यम्" (भा० २।२।२२) इत्यादिना च क्रमेण सद्योमुक्तिक्रममुक्त्युपायौ ज्ञानयोगावुक्त्वा ततोऽपि श्रेष्ठत्वं भक्तियोगहेतुभगवदर्पितकर्मणोऽप्युक्त्वा साक्षाद् भक्तियोगस्य तु कैमुत्यमेवानीतम् । यथा (भा० २।२।३३) —

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह ।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ ४४ ॥

टीका च — "सन्ति संसरतः पुंसो बहवो मोक्षमार्गास्तपोयोगादयः । समीचीनस्त्वयमेवेत्याह न हीति । यतोऽनुष्ठिताद् भक्तियोगो भवेदतोऽन्यः शिवः सुखरूपो निर्विघ्नश्च नास्त्येव" इत्येषा ।
यच्छब्देनात्र भगवत्सन्तोषार्थकं कर्मोच्यते "स वै पुंसां परो धर्मः" (भा० १।२।६) इत्युक्तेः ॥

२९ । स हि भक्तियोगः सर्ववेदसिद्ध इत्याह (भा० २।२।३४) —

भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेत् ॥ ४५ ॥

टीका च — "भगवान् ब्रह्मा । कूटस्थो निर्विकार एकाग्रचित्तः सन्नित्यर्थः । त्रिस्त्रीन् वारान् कार्त्स्न्येन साकल्येन ब्रह्म वेदमन्वीक्ष्य विचार्य । यत आत्मनि हरौ रतिर्भवेत् तदेव भक्तियोगाख्यं वस्तु मनीषया अध्यवस्यत् निश्चितवान्" इत्येषा ।
त्रिरन्वीक्ष्येति कर्मज्ञानभक्तिप्रतिपादकतयाभिप्रेत्येति ज्ञेयम् । अत्राप्युपसंहारानुरोधेनात्मशब्दस्य हरिवाचकता । निरुक्तं च "आततत्वाच्च मातृत्वादात्मा हि परमो हरिः" (तन्त्रे) इति ।
अथवा भगवान् स्वप्रकाशसार्वज्ञ्यादिगुणः परमेश्वरोऽपि सर्ववेदाभिधेयसाराकर्षणलीलार्थं त्रिरन्वीक्ष्य तत्र शास्त्रविदन्तराणामीक्षणमनुकृत्य ।
अनन्तवैकुण्ठवैभवादिमयानामनन्तविरिञ्चपाठ्यभेदानां वेदानां तथेक्षणं च तेनैव सम्भवतीत्याह "कूटस्थः" एकरूपतयैव कालव्यापीति । अत एवोक्तं स्वयमेव (भा० ११।२१।४२) —

किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
इत्यस्या हृदयं लोके नान्यो मद् वेद कश्चन ॥ ४६ ॥

श्रीशुकेन च "निगमकृदुपजह्रे भृङ्गवद् वेदसारम्" (भा० ११।२९।४९) इति ॥

३० । अथ किं तद् यतस्तत्र रतिः स्यात् ? तथैव "यच्छ्रोतव्यम्" (भा० १।१९।३८) इत्यादि प्रश्नस्योत्तरत्वेनोपसंहरति (भा० २।२।३६) —

तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान् नृणाम् ॥ ४७ ॥

चकारात् पादसेवादयोऽपि गृह्यन्ते ।
अनन्तरं च श्रवणादिफलं यद् दर्शितं तत् तूदाहृतम् (भा० २।२।३७) —

पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम् ।
पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ४८ ॥ इति ।

अत्र पूनन्तीत्यनेन पूर्वोक्तः स्थूलधारणामार्गः परिहृतः । भक्तियोगस्यैव स्वतः पावनत्वादलं तत्प्रयासेनेति ॥ श्रीशुकः ॥

३१ । एवं प्राक्तनाध्यायाभ्यां कर्मयोगज्ञानेभ्यः श्रेष्ठत्वमुक्त्वा तदुत्तराध्यायेऽपि सर्वदेवतोपासनेभ्यः श्रेष्ठत्वप्रवचनेन भगवद्भक्तियोगस्यैवाभिधेयत्वमाह "ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणः पतिम्" (भा० २।३।२) इत्याद्यनन्तरम् (भा० २।३।१०) —

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ ४९ ॥

टीका च — "अकाम एकान्तभक्तः । उक्तानुक्तसर्वकामो वा । पुरुषं पूर्णं परं निरुपाधिम्" इत्येषा ।
तीव्रेण दृढेन स्वभावत एवानुपघात्येनेति विघ्नानवकाशतोक्ता । कामना तु यादृच्छिकेनापि स्यात् । यथोक्तं भारते —

भक्तक्षणः क्षणो विष्णोः स्मृतिः सेवा स्ववेश्मनि ।
स्वभोज्यस्यार्पणं दानं फलमिन्द्रादिदुर्लभम् ॥ ५० ॥ इति ।

तदुक्तं श्रीकर्दमं प्रति "न वै जातु मृषैव स्यात् प्रजाध्यक्ष मदर्हणम्" (भा० ६।२१।२४) इति ।

यथा वा यत्तत्कामस्तीव्रेणैव यजेत । ततश्च शुद्धभक्तिसम्पादनायैवान्ते पर्यवसिष्यत्यसावित्यभिप्रायेण सविशेषणमुपदिष्टम् । तदनेन एकान्तभक्तेषु मुमुक्षौ वा तद्भक्तियोगस्यैवाभिधेयत्वं किं वक्तव्यमपि तु सर्वकामेष्वपीति तदेव सर्वथापि निर्णीतम् ॥

३२ । किं च (भा० २।३।११) —

एतावानेव यजतामिह निःश्रेयसोदयः ।
भगवत्यचलो भावो यद् भागवतसङ्गतः ॥ ५१ ॥

टीका च — "पूर्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह 'एतावान्' इति । इन्द्रादीनपि यजतामिह तत्तद्यजने भागवतानां सङ्गतौ भगवत्यचलो भावो भक्तिर्भवतीति यदेतावानेव निःश्रेयसस्य परमपुरुषार्थस्य उदयो लाभः । अन्यत् तु सर्वं तुच्छमित्यर्थः" इत्येषा ।
अत्र "इन्द्रमिन्द्रियकामस्तु" (भा० २।३।२) इत्याद्युक्तमिन्द्रियपाटवादिकं पृथक्त्वेन फलम् । भागवतेन संयोगे तु भावः फलम् । खादिरयूपसंयोगे यागस्य फलवैशिष्ट्यवदिति ज्ञेयम् ॥ श्रीशुकः ॥

३३ । अनन्तरं श्रीशौनकेनापि व्यतिरेकोक्त्या तस्यैवाभिधेयत्वं दृढीकृतम् । यथाह (भा० २।३।१७) —

आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ।
तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ॥ ५२ ॥

असौ सूर्यः । उद्यनुद्गच्छनस्तं च यन् गच्छन् हरति वृथागामित्वाद् बलादाच्छिनत्तीव । यद् येन क्षणोऽपि नीत उत्तमश्लोकवार्त्तया तस्यायुरृते वर्जयित्वा — तावतैव सर्वसाफल्यादिति भावः ॥

३४ । ननु जीवनादिकमेव तेषामायुषः फलमस्तु ? तत्राह (भा० २।३।१८) —

तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत ।
न खादन्ति न मेहन्ति किं ग्रामे पशवोऽपरे ॥ ५३ ॥

न मेहन्ति न मैथुनं कुर्वन्ति । तानपि नराकारान् पशून् मत्वाह — अपर इति ॥

३५ । तदेवाह (भा० २।३।१९) —

श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ ५४ ॥

श्वादितुल्यैस्तत्परिकरैः सम्यक्स्तुतोऽप्यसौ पुरुषः पशुः । तेषामेव मध्ये श्रेष्ठश्चेत् तर्हि महापशुरेवेत्यर्थः ॥

३६ । तस्याङ्गानि च निष्फलानीत्याह पञ्चभिः (भा० २।३।२०) —

> बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य ।
> जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ॥ ५५ ॥

न शृण्वतोऽशृण्वतो नरस्य ये कर्णपुटे ते बिले वृथारन्ध्रे इत्यर्थः । असती दुष्टा ॥

३७ । भा० २।३।२१ —

> भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन् मुकुन्दम् ।
> शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥ ५६ ॥

पट्टवस्त्रोष्णीषेण किरीटेन वा जुष्टमपि । अप्यर्थे वाशब्दः ॥

३८ । भा० २।३।२२ —

> बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
> पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ ५७ ॥

द्रुमजन्मभजेते इति तथा वृक्षमूलतुल्यावित्यर्थः ॥

३९ । भा० २।३।२३ —

> जीवञ् छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ।
> श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ् छवो यस्तु न वेद गन्धम् ॥ ५८ ॥

श्रीविष्णुपद्यास्तत्पादलग्नायाः ॥

४० । भा० २।३।२४ —

> तदश्मसारं हृदयं बतेदं यद् गृह्यमाणैर्हरिनामधेयैः ।
> न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ ५९ ॥

अश्मवत् सारो बलं काठिन्यं यस्य । विक्रियालक्षणमथेति । यदा तद्विकारो न भवेत् तदा नेत्रादौ जलादिकं न भवतीत्यर्थः । इदमेवान्वयेन श्रीमता राज्ञा दृढीकरिष्यते "सा वाग् यया तस्य गुणान् गृणीते" (भा० १०।८०।३) इत्यादिभ्याम् । तदेवं श्रीशुकवाक्यारम्भाध्यायत्रयाभिधेयत्वेन श्रीभक्तिरेव लब्धा ।
टीका च (भा० दी० २।१।१, भा० दी० २।२।१, भा० दी० २।३।१) —

तत्र तु प्रथमेऽध्याये कीर्तणश्रवणादिभिः ।
स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते ॥ ६० ॥
द्वितीये तु ततः स्थूलधारणातो जितं मनः ।
सर्वसाक्षिणि सर्वेशे विष्णौ धार्यमितीर्यते ॥ ६१ ॥
तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं शृण्वतो मुनेः ।
भक्त्युद्रेकेण तत्कर्मश्रवणादर ईर्यते ॥ ६२ ॥ इत्येषा ॥

श्रीशौनकः श्रीसूतम् ॥

४१ । श्रीब्रह्मनारदसंवादेऽपि (भा० २।५।९) —

सम्यक् कारुणिकस्येदं वत्स ते विचिकित्सितम् ।
यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥ ६३ ॥

४२ । अग्रे च सर्वशास्त्रसमन्वयेन "नारायणपरा वेदाः" (भा० २।५।१५-१६) इत्यादि । श्रीनारायण एवोपास्यत्वेन परस्तात्पर्यविषयो येषां ते वेदाः । नन्वन्येऽपि देवास्तत्रोपास्यत्वेनाभिधीयन्ते ? सत्यं तेऽपि नारायणाङ्गप्रभवत्वेनैव तथा वर्ण्यन्त इत्यर्थः । येऽपि तदाश्रया लोकास्तेऽपि तत्पदप्राप्तिहेतवः । मखाश्च तत्परा एव—तदानन्दांशाभासरूपत्वात् तत्साधनत्वाच् चेति भावः ।
तथा योगोऽष्टाङ्गः साङ्ख्यं च । तत्साध्यं तपश्चित्तैकाग्र्यम् । तत्साध्यं ब्रह्मज्ञानं च तत्परं तदीयसामान्याकारप्रकाशत्वात् तज्ज्ञानस्य योगतपसोस्तत्साधनत्वाच् चेति भावः ।
किं बहुना ? गतिस्तत्प्राप्यं ब्रह्मापि तत्परा—तत्सामान्याकारप्रकाशत्वेन तदधीनाविर्भावत्वात् । तदुक्तं श्रीमत्स्यदेवेन सत्यव्रतं प्रति (भा० ८।२४।३८) —

मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ।
वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि ॥ ६४ ॥ इति ॥

श्रीब्रह्मा श्रीनारदम् ॥

४३ । श्रीविदुरमैत्रेयसंवादेऽपि । तत्र प्रश्नो यथा (भा० ३।५।४) —

तत् साधुवर्यादिश वर्त्म शं नः संराधितो भगवान् येन पुंसाम् ।
हृदि स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणम् ॥ ६५ ॥

अत्र "शं सुखरूपं वर्त्म" इति टीका च । भक्तिपूते प्रेमविमले सतत्त्वं ज्ञानं तच्च ब्रह्मभगवत्परमात्मेत्याद्याविर्भावम् ॥ श्रीविदुरः श्रीमैत्रेयम् ॥

४४ । तत्राजानजदेवस्तुतिद्वारैवोत्तरम् (भा० ३।५।४५-४६) —

पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ।
वैराग्यसारं प्रतिलभ्य बोधं यथाञ्जसान्वीयुरकुण्ठधिष्ण्यम् ॥ ६६ ॥
तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ।
त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान् न तु सेवया ते ॥ ६७ ॥

"अकुण्ठधिष्ण्यं वैकुण्ठलोकम्" इति टीका । विशदाशयाः प्रोज्झितकैतवाः सेवैकपुरुषार्थाः । ये तु ज्ञानसङ्गिनस्तेषां साधनसाध्ययोः कनिष्ठत्वमाह — तथेति । अपरे मोक्षमात्रकामाः । तन्मात्रपुरुषार्थेऽपि तेषां श्रमः स्यात् । ये तु सेवैकपुरुषार्थास्तेषां सेवया श्रमो न स्यात् । सदैव सेवया परमानन्दमनुभवतामानुषङ्गिकतया मोक्षश्च स्यादित्यर्थः ॥ अजानजदेवाः श्रीमहत्स्रष्टृपुरुषम् ॥

४५ । अत एव स्वयं तं श्लाघ्यते (भा० ३।८।१) —

सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ।
बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णम् ॥ ६८ ॥

तस्मात् कथोपलक्षिता भक्तिरेव परमश्रेय इति भावः ॥ श्रीमैत्रेयः ॥

४६ । श्रीकापिलेयेऽपि यथाह (भा० ३।२५।१९) —

न युज्यमानया भक्त्या भगवत्यखिलात्मनि ।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥ ६९ ॥

ब्रह्मसिद्धिः परतत्त्वाविर्भावः ॥

४७ । तथा (भा० ३।२५।४४) —

एतावानेव लोकेऽस्मिन् पुंसां निःश्रेयसोदयः ।
तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ॥ ७० ॥

तीव्रेण दृढेन योगकर्मादिभिरभङ्गुरेण शुद्धेनेत्यर्थः । तेनैव भक्तियोगेन श्रवणादिना मय्यर्पितं सत् मनः स्थिरं भवतीति यदेतावानेव निःश्रेयसस्य परमपुरुषार्थस्याविर्भावः । अत्रास्मिन्नित्यनेनान्यस्मिंस्तु एतावतोऽप्यधिकोऽस्तीति व्यज्यते ॥ श्रीकपिलदेवः ॥

४८ । श्रीकुमारोपदेशेऽपि ज्ञानोपदेशानन्तरम् (भा० ४।२२।३९–४०) —

यत्पादपङ्कजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः ।
तद्वन् न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम् ॥ ७१ ॥
कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीरषन्ति ।
तत् त्वं हरेर्भगवतो भजनीयमङ्घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम् ॥ ७२ ॥

टीका च — "तमवेहीति ज्ञानमुपदिष्टम् । तस्य दुष्करत्वेन भक्तिमुपदिशति द्वाभ्याम् । यत्पादेत्यादिकमारभ्य । ननु 'ब्रह्मविदाप्नोति परम्' (तै० २।१।१) इति श्रुतेः कथं यतयो नोद्ग्रथयन्तीत्युच्यते ? तत्राह 'कृच्छ्रः' (भा० ४।११।४०) इति । अप्लवेशां न प्लवस्तरणहेतुरीटीशो येषां तेषामिह तरणे महान् कृच्छ्रः क्लेशस्ते ह्यसुखेन योगादिनेन्द्रियषड्वर्गग्राहं भवार्णवं तितीर्षन्ति तत् तस्मादुडुपं प्लवम् । दुस्तरार्णं दुस्तरार्णवम्" इत्येषा । समानप्राप्ययोरपि पथोरेकस्य दुर्गमत्वकथनेनान्यस्याभिधेयत्वं स्वत एव सिध्यति । अत्र तितीर्षन्ति मात्रं न तु तरन्तीत्यर्थोऽपि ज्ञेयः ॥ श्रीसनत्कुमारः श्रीपृथुम् ॥

४९ । अतो यच्च ज्ञानमुपदिष्टं तदपि तदुपदेशाव्यर्थतासम्पादनेच्छामात्रेणानुष्ठीयमानं तेन भक्तिसादेव कृतमित्याह (भा० ४।२३।९-१०) —

सनत्कुमारो भगवान् यदाहाध्यात्मिकं परम् ।
योगं तेनैव पुरुषमभजत् पुरुषर्षभः ॥ ७३ ॥
भगवद्धर्मिणः साधोः श्रद्धया यततः सदा ।
भक्तिर्भगवति ब्रह्मण्यनन्यविषयाभवत् ॥ ७४ ॥

तेनैव द्वारीकृतेन ॥ श्रीमैत्रेयः ॥

५० । श्रीरुद्रगीतेऽपि (भा० ४।२४।६९) —

इदं जपत भद्रं वो विशुद्धा नृपनन्दनाः ।
स्वधर्ममनुतिष्ठन्तो भगवत्यर्पिताशयाः ॥ ७५ ॥

इत्युक्त्वाह (भा० ४।२४।७०) —

तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम् ।
पूजयध्वं गृणन्तश्च ध्यायन्तश्चासकृद्धरिम् ॥ ७६ ॥

अथ तमेव पूजयध्वं न तु स्वधर्मानुष्ठानाग्रहादिकमपि कुरुध्वमित्येवकारार्थः । आत्मस्थं स्वान्तर्यामित्वेन स्थितम् । तद्वदपरेष्वपि भूतेष्ववस्थितमात्मानं परमात्मानं गृणन्तः कीर्तयन्तो ध्यायन्तश्चेत्यन्यत्र मनोवचोव्यापारोऽपि निषिद्धः । असकृदिति एकस्यां पूजायां समाप्यमानायामेवान्यारब्धव्या न तु कर्माद्याग्रहेण विच्छेदः कर्तव्य इत्यर्थः ॥ श्रीरुद्रः प्रचेतसः ॥

५१ । एतदेव श्रीनारदेनापि स्फुटीकरिष्यते अन्वयव्यतिरेकाभ्याम् । यथाह (भा० ४।३१।९-१३) —

तज्जन्म तानि कर्माणि तदायुस्तन् मनो वचः ।
नृणां येन हि विश्वात्मा सेव्यते हरिरीश्वरः ॥ ७७ ॥

किं जन्मभिस्त्रिभिर्वेह शौक्रसावित्रयाज्ञिकैः ।
कर्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ॥ ७८ ॥
श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ।
बुद्ध्या वा किं निपुणया बलेनेन्द्रियराधसा ॥ ७९ ॥
किं वा योगेन साङ्ख्येन न्यासस्वाध्याययोरपि ।
किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥ ८० ॥
श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः ।
सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः ॥ ८१ ॥

"यतो जन्मादेर्हरिसेवैव फलमतस्तद्विहीनं सर्वं व्यर्थमित्यर्थः । शुक्रसम्बन्धि जन्म विशुद्धमातापितृभ्यामुत्पत्तिः । सावित्रमुपनयनेन । याज्ञिकं दीक्षया । विबुधानामिव दीर्घायुषापि वचोभिर्वाग्विलासैः । चित्तवृत्तिभिर्नानावधानसामर्थ्यैः । इन्द्रियराधसा तत्पाटवेन । योगेन प्राणायामादिना । साङ्ख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण । सन्न्यासवेदाध्ययनाभ्यामप्यन्यैरपि व्रतवैराग्यादिभिः श्रेयः साधनैः" इति टीका ।
अथ "श्रेयसाम्" इत्यादिटीका च — "नन्वेषां नानाफलसाधनानां हरिसेवनाभावमात्रेण कुतो वैयर्थ्यम् ? तत्राह — श्रेयसां फलानामात्मैवावधिः पराकाष्ठा । अर्थतः परमार्थतः । आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः । भवतु आत्मावधिः । हरेः किमायातम् ? तत्राह — सर्वेषामपीति । आत्मा आत्मदश्च अविद्यानिरासेन स्वरूपाभिव्यञ्जकः । ऐश्वरेणापि रूपेण बलिप्रभृतिभ्य इव आत्मप्रदः । प्रियश्च परमानन्दरूपत्वात्" इत्येषा ।
अत्र सर्वेषां भूतानां शुद्धजीवानामपि आत्मा परमात्मेति ज्ञेयम् । रश्मिस्थानीयानां जीवानां सूर्यस्थानीयत्वात् तस्य । तदुक्तम् (भा० १०।१४।५४-५५) —

तस्मात् प्रियतमः स्वात्मा सर्वेषामपि देहिनाम् ।
तदर्थमेव सकलं जगदेतच् चराचरम् ॥ ८२ ॥
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् ।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥ ८३ ॥ इति ।

आत्मानौ जीवतादात्म्यापन्नब्रह्मेश्वराख्यौ । ददाति यथायथं स्फोरयति वशीकारयति च यः स आत्मद इति स्वाम्यभिप्रायः ॥

५२ । किं च (भा० ४।३१।१४) —

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥ ८४ ॥

टीका च — "किं च नानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपि फलानि हरिप्रीत्या भवन्ति । केवलं तत्तद्देवताराधनेन तु न किञ्चिदिति सदृष्टान्तमाह — यथेत्य" इत्यादिका ॥ श्रीनारदः प्रचेतसः ॥

५३ । श्रीऋषभदेवकृतस्वपुत्रशिक्षणेऽपि “ये वा मयीशे” (भा० ५।५।३) इत्यादिकम् “मत्तोऽप्यनन्तात्” (भा० ५।५।२५) इत्यादिकं चाग्रे दर्शनीयम् ।
ब्राह्मणरहूगणसंवादान्तेऽपीदमस्ति (भा० ५।१३।२०) —

रहूगण त्वमपि ह्यध्वनोऽस्य सन्न्यस्तदण्डः कृतभूतमैत्रः ।
असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारम् ॥ ८५ ॥

ज्ञानमत्र भक्त्याश्रयत्वमेव ॥

५४ । यथोक्तमेतदनन्तरं श्रीरहूगणेनैव (भा० ५।१३।२१-२२) —

अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।
न यद्धृषीकेशयशः कृतात्मनां महात्मनां वः प्रचुरः समागमः ॥ ८६ ॥
न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ।
मौहूर्तिकाद् यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥ ८७ ॥ इति ।

स्पष्टम् ॥ ब्राह्मणो रहूगणम् ॥

५५ । तथा चित्रकेतुं प्रति श्रीसङ्कर्षणोपदेशान्तेऽपि “दृष्टश्रुताभिर्मात्राभिः” (भा० ६।१६।६२) इत्यादौ “मद्भक्तः पुरुषो भवेत्” इत्यग्रत उदाहार्यम् ।
असुरबालकानुशासनेऽपि (भा० ७।६।१-२) —

कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह ।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ ८८ ॥
यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् ।
यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥ ८९ ॥

इहैव मानुषजन्मनि भागवतान् धर्मानाचरेत् यतोऽर्थदमेतज् जन्म — देवादिजन्मनि महाविषयावेशात् पश्वादिजन्मनि विवेकाभावाच्च ।
मानुषजन्म च प्राप्य न विलम्बेतेत्याह — कौमारे कौमारमारभ्येत्यर्थः । यतस्तदपि जन्माध्रुवं पुनर्दुर्लभं च । शास्त्रस्य च प्राधान्येन मनुष्यमधिकृत्य प्रवृत्तत्वात् तदनुवादेनोक्तिरियम् । तद्बुद्ध्यादिसाम्येन मानुषत्वमारोप्यैवेति ज्ञेयम् ।
तत्र भागवतधर्माचरणस्यैव युक्तत्वं दर्शयति “यथा हि” इत्यादि । इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथा अनुरूपं योग्यमित्यर्थः । यद् यस्मादेष भूतानां स्वभावत एव प्रियः प्रीतिविषयः प्रेमकर्ता च । तत्र हेतुः — आत्मा परमात्मा । पादोपसर्पणे हेत्वन्तरम् — यस्माच् चैष ईश्वरः कर्तुमकर्तुमन्यथाकर्तुं समर्थः । सुहृत् सर्वेषां हितं चिकीर्षुश्चेति ।
तदेतदुपक्रम्योपसंहरति (भा० ७।६।२६) —

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्त्ता ।
मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥ ९० ॥

ईक्षा आत्मविद्या । तदेतत् सर्वं निगमस्यार्थजातं स्वसुहृदः स्वान्तर्यामिनः परमस्य पुंसस्तस्मै स्वात्मार्पणसाधनं चेत् तर्हि सत्यं मन्ये सत्यफलत्वात् । यद्वा सत्यमर्थक्रियाकारकं सफलमिति यावत् । अन्यथा धर्मादीनां निष्फलत्वमेवेति भावः ॥ श्रीप्रह्लादोऽसुरबालकान् ॥

५६ । अग्रे च (भा० ७।७।२९) —

तत्रोपायसहस्राणामयं भगवतोदितः ।
यदीश्वरे भगवति यथा यैरञ्जसा रतिः ॥ ९१ ॥

तत्र पूर्वोक्ते त्रिगुणात्मककर्मणां बीजनिर्हरणेऽपि उपायसहस्राणां मध्ये अयमेवोपायो भगवता श्रीनारदेन मां प्रत्युपदिष्टः ।
यैरुपायसहस्रैः सिद्धाद् यद् यस्मादुपायाद् यथा यथावदीश्वरे भगवति अञ्जसा व्यवधानान्तरं विनैव रतिः प्रीतिर्भवति । अतः कर्मबीजनिर्हरणमपि तस्यानुषङ्गिकमेव फलमिति भावः ॥

५७ । अग्रे च "गुरुशुश्रूषया भक्त्या" (भा० ७।७।३०) इत्यादिभिस्तस्यैवोपायस्याङ्गान्युक्त्वाह (भा० ७।७।३३) —

एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ।
वासुदेवे भगवति यया संलभ्यते रतिम् ॥ ९२ ॥

एवं पूर्वोक्तगुरुशुश्रूषादिप्रकारेणैव न तु तदर्थं पृथक्प्रयत्नेन । निर्जितकर्मबीजलक्षणकामक्रोधलोभमोहमदमात्सर्यैर्जनैः पुनरपि भक्तिः क्रियत एव ॥ श्रीप्रह्लादस्तान् ॥

५८ । वर्णाश्रमाचारकथनारम्भे नरमात्रधर्मकथनेऽपि (भा० ७।११।७) —

धर्ममूलं हि भगवान् सर्ववेदमयो हरिः ।
स्मृतं च तद्विदां राजन् येन चात्मा प्रसीदति ॥ ९३ ॥

धर्मस्य मूलं प्रमाणं भगवान् । यतः सर्ववेदमयः । स्मृतं स्मृतिश्च तद्विदां वेदमयभगवद्विदां तस्य प्रमाणम् । आभ्यां तद्बहिर्मुखधर्मस्यापार्थत्वं भगवद्धर्मस्यैवावश्यकत्वं चोक्तम् । अत एव (मनु० २।६) —

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ ९४ ॥

इति मनुस्मृतिवाक्यादप्यत्र विशिष्टतयोपदिष्टम् ।
तच्च युक्तम् "धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्" (भा० १।१।२) इत्युक्तत्वात् ।
येनैव धर्मेण आत्मा मनः प्रसीदतीत्यनेन "ययात्मा सुप्रसीदति" (भा० १।२।६) इतिवत् सुशब्दविशिष्टतयानुक्तत्वात् तच्छ्रवणादिलक्षणसाक्षाद्भक्तेरेव प्रशस्तत्वं च बोधितम् ।
तत्तत्सर्वधर्मकथनान्ते तु स्वयमेव स्वस्य प्रथमे गन्धर्वजातौ जन्मन्यानुषङ्गिकं भगवद्गान-मात्रं सत्कर्मोक्त्वा द्वितीये च शूद्रजातौ जन्मनि सत्सङ्गजश्रवणादिमात्रं तदुक्त्वा स्वस्य तादृशभगवत्पार्षदत्वपर्यन्तफलप्राप्तौ तथाविधमपि स्वधर्मलक्षणं कारणान्तरं नादृत-वान् ।
तथा हि तत्रैव "यथा हि यूयम्" (भा० ७।१५।६८) इत्यस्य टीका च — "एतच्च सर्वसाधा-रणमुक्तम् । भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पाण्डवानेव लक्ष्यीकृत्याह — यथा हि" इत्येषा । तस्मादत्रापि साक्षाद् भक्तावेव तात्पर्यम् ।
अथात्र "त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत् ततो यदि" (भा० १।५।१७) इत्यादौ भक्तेर्धर्मातिरिक्तत्वेऽपि "श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः" (भा० ७।११।११) इत्यादिनोत्तरग्रन्थे धर्मत्वविधानं सर्वेष्वपि प्राणिष्वावश्यकत्वापेक्षया परमश्रे-योरूपत्वाद्यपेक्षया च लाक्षणिकमेव । वस्तुतस्तु पञ्चमे "तत्रापि" (भा० ५।९।३) इत्यादि-गद्ये "भगवतः कर्मबन्धविध्वंसनश्रवणस्मरण" इत्यादिना श्रीजडभरतस्य या भक्तिनिष्ठो-क्ता तस्याः "पितर्युपरते" (भा० ५।९।८) इत्यादिगद्ये "त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायाम्" (भा० ५।९।८) इत्यादिना तदवज्ञातृणामज्ञत्वबोधनेन धर्मातिरिक्तत्वं परविद्यात्वं च बोधितम् ।
अत एवोक्तं श्रीनारसिंहे (ना० पु० ४।४) —

> सनकादयो निवृत्त्याख्ये तेन धर्मे नियोजिताः ।
> प्रवृत्त्याख्ये मरीच्याद्या भक्तावैकं नारदं मुनिम् ॥ ९५ ॥ इति ।

"तेन" ब्रह्मणेति प्राकरणिकम् । तथा लक्षणामयकष्टकल्पनया श्रवणादीनां स्वधर्मान्तर्ग-णना च बहिर्मुखानामपि साक्षाद्भक्तिप्रवर्तनायैव । एवमन्यत्राप्यन्यमिश्रभक्त्युपदेशवा-क्येषु ज्ञेयम् । तस्मादपि भक्तावेव तात्पर्यमिति ॥ श्रीनारदो युधिष्ठिरम् ॥

५९ । जायन्तेयोपाख्यानेऽपि "अत आत्यन्तिकं क्षेमं पृच्छामः" (भा० ११।२।३०) इत्यस्यो-त्तरम् (भा० ११।२।३३) —

> मन्येऽकुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यम् ।
> उद्विग्नबुद्धेरसदात्मभावाद् विश्वात्मना यत्र निवर्तते भीः ॥ ९६ ॥

टीका च — "प्रथममात्यन्तिकं क्षेमं कथयति 'मन्ये' इति" इत्यादिका ।

पुनश्च "धर्मान् भागवतान् ब्रूते" (भा० ११।२।३१) इत्युत्तरत्वेन "ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये" (भा० ११।२।३४) इत्यादिपद्यत्रयमुक्त्वा "भयं द्वितीयाभिनिवेशतः स्यात्" (भा० ११।२।३७) इत्यादिपद्ये "बुध आभजेत् तम् भक्त्यैकयेशम्" इत्यत्र "भक्त्या" इत्यनेन तस्या ज्ञानाद्यमिश्रश्रवणकीर्तनादिलक्षणत्वम् "एकया" इत्यनेन नैरन्तर्यलक्षणमव्यभिचारित्वं चोपदिष्टम् ॥

६० । तत्र यद्यपि "कायेन वाचा मनसेन्द्रियैर्वा" (भा० ११।२।३६) इत्यादिप्राक्तनवाक्ये लौकिकस्यापि कर्मणो भगवदर्पणाद् भागवतधर्मत्वं सिध्यतीति यथोक्तं तथा नैरन्तर्यमपि सम्भवति । तथापि श्रवणकीर्तनादिलक्षणमात्रत्वं व्याहन्येत तस्मात् तत्राव्यभिचारित्वं तन्मात्रत्वं च यथा भवेत् तथोपायं तदनन्तरमाह द्वाभ्याम् ।
तत्र प्रथममव्यभिचारित्वोपायमाह प्रथमेन (भा० ११।२।३८) —

> अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा ।
> तत्कर्मसङ्कल्पविकल्पकं मनो बुधो निरुन्ध्यादभयं ततः स्यात् ॥ ९७ ॥

द्वयः प्रधानादिद्वैतप्रपञ्चो यद्यप्यविद्यमान आत्मनि शुद्धे न विद्यत एवेत्यर्थः । तथापि ध्यातुरविद्यामयध्यानयुक्तस्य सतस्तस्य धिया अवभाति तस्मिन् शुद्धेऽपि कल्प्यत एवेत्यर्थः । यथा स्वप्नो मनोरथश्च तथेत्यर्थः । "तत्" तस्मात् । कर्माणि सङ्कल्पयति विकल्पयति च यन् मनस्तन् नियच्छेत् । ततश्चाव्यभिचारिण्या भक्त्या भजनादभयं स्यादिति भावः ॥

६१ । ननु तथापि मनोनिरोधरूपेण योगाभ्यासेन भक्तिकैवल्यव्यभिचारः स्यादित्याशङ्क्य भक्त्यैव क्रियमाणया तदासक्तत्वेन स्वत एव मनोनिरोधोऽपि स्यादिति तन्मात्रतोपायमाह द्वितीयेन (भा० ११।२।३९) —

> शृण्वन् सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके ।
> गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः ॥ ९८ ॥

टीका च — "तदर्थकाणि तानि जन्मानि कर्माणि चार्थो येषां तानि नामानि । एतान्यपि साकल्येन ज्ञातुमशक्यानीत्याशङ्क्याह — यानि लोके गीतानि प्रसिद्धानि तानि शृण्वन् गायंश्च विचरेत् । असङ्गो निःस्पृहः" इत्येषा ॥ श्रीकविर्विदेहम् ॥

६२ । अग्रे च कर्मादीन् परिहरन् साक्षाद् भक्तिमेव विधत्ते (भा० ११।३।४४–४७) —

> परोक्षवादो वेदोऽयं बालानामनुशासनम् ।
> कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥ ९९ ॥
> नाचरेद् यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः ।
> विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥ १०० ॥
> वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे ।

नैष्कर्म्यं लभते सिद्धिं रोचनार्था फलश्रुतिः ॥ १०१ ॥
य आशु हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः ।
विधिनोपचरेद् देवं तन्त्रोक्तेन च केशवम् ॥ १०२ ॥ इत्यादि ।

"परोक्ष" इति टीका च — "यत्रान्यथा स्थितोऽर्थः सङ्गोपयितुमन्यथा कृत्वोच्यते स परोक्षवादः । तथा च श्रुतिः 'तं वा एतं चतुर्हूतं सन्तं चतुर्होतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः' (तै० ब्रा० २।३।११।४) इति । परोक्षवादत्वमेवाह — कर्ममोक्षायेति ।
ननु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षार्थम् ? तत्राह — बालानामनुशासनं यथा तथा । अत्र दृष्टान्तः — अगदमौषधम् । यथा पिता बालमगदं पाययन् खण्डलड्डुकादिभिः प्रलोभयन् पाययति ददाति च तानि खण्डलड्डुकादीनि नैतावता अगदस्य तल्लाभः प्रयोजनमपि त्वारोग्यं तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् कर्ममोक्षायैव कर्माणि विधत्ते" इत्येषा ।
"नाचरेत्" इति टीका च — "ननु कर्ममोक्षश्चेत् पुरुषार्थस्तर्हि प्रथममेव कर्म त्यज्यताम् ? अत आह — नाचरेदित्य" इत्येषा ।
"अज्ञः" न विद्यते "ज्ञा" श्रीभगवतः कथाश्रवणादौ श्रद्धालक्षणा धीवृत्तिर्यस्य सः । अत एव तस्मिन् न प्रवर्तत इत्यर्थः । तथैवाजितेन्द्रियो ब्रह्मजिज्ञासुः सन् पारमेष्ठ्यपर्यन्तभोगे विरक्तो वा न भवतीत्यर्थः "तावत् कर्माणि कुर्वीत" (भा० ११।२०।९) इत्यादौ परस्परनिरपेक्षयोः श्रद्धाविरक्त्योर्द्वयोरेव तत्तन्मर्यादात्वेनोक्तेः ।
विकर्मणा विहिताकरणरूपेण मृत्योरनन्तरं मृत्युं मरणतुल्यां यातनामुपैति । पुनः पुनर्मरणमुपैति यातनाञ्च चोपैतीत्यर्थः । अतस्तेषां विहितकर्मत्यागे कथञ्चिन् न निस्तारः ।
ईश्वरप्रयोजककर्तृकस्य कर्मण ईश्वरार्पणलक्षणयथार्थानुष्ठानेन तत्प्रसादे त्वसौ सुतरामेवं स्यादित्याह "वेदोक्तम्" (भा० ११।३।४६) इति । तस्माद् वेदोक्तमेव कुर्वाणो न तु निषिद्धम् । नैष्कर्म्यां कर्मबन्धागोचरतारूपां सिद्धिं लभते ।
ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिस्तत्फलं च स्यात् न तु नैष्कर्म्यरूपा सिद्धिः ? अत आह — निःसङ्गोऽनभिनिवेशवान् । ईश्वरे तन्निमित्तमेव तत्रार्पितं न तु फलोद्देशेन ।
ननु फलस्य श्रुतत्वात् कर्मणि कृते फलं भवेदेव ? न रोचनार्थेति कर्मणि रुच्युत्पादनार्था अगदपाने खण्डलड्डुकादिवत् । ततश्च कर्माभिरुच्या वेदार्थं सम्यग् विचारयति । तदा च "यो वा एतदक्षरम् गार्ग्यविदित्वास्माल्लोकात् प्रैति स कृपणः" (बृ० ३।८।१०) इत्यनेनाब्रह्मज्ञस्य कृपणताम् "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण" (बृ० ४।४।२२) इत्यादिना यज्ञादीनां ज्ञानविशेषतां चावधार्य निष्कामेषु कर्मसु प्रवर्तते । ततः "स्वर्गकामो यजेत" इत्यादिभिः कामितस्यैव स्वर्गादेः फलत्वेनावगमादकामितोऽसौ न भवतीति नैष्कर्म्यसिद्धिः स्वत एव भवतीति स्थिते किमुत श्रीमदीश्वरार्पणेन तत्प्रसादे सतीत्यर्थः ।
तदेवं विलम्बेनैव नैष्कर्म्यसिद्धेर्हेतुमुक्त्वा "यथा तरोर्मूलनिषेचनेन" (भा० ४।३१।१४) इति न्यायेन सर्वधर्मपर्याप्तिहेतुं नैष्कर्म्यसिद्धिसाध्यहृदयग्रन्थिभेदस्यापि शीघ्रोपायं स्वातन्त्र्येनाह "य आशु" (भा० ११।३।४७) इति । य आशु शीघ्रमेव देहद्वयात् परस्यात्मनो

जीवस्य हृदयग्रन्थिं देहाहङ्कारं निर्हर्तुमिच्छुर्भवति स त्वन्यत् कर्मादिकं स्वरूपत एव त्यक्त्वा तन्त्रोक्तेनागममार्गेण चकाराद् वेदोक्तेन च विधिना प्रकारेण केशवं देवमर्चयेत् ॥

६३ । अन्यदेवदृष्टिपरित्यागार्थस्तथोपसंहारश्च (भा० ११।३।५५) —

एवमग्न्यर्कतोयादावतिथौ हृदये च यः ।
यजेदीश्वरमात्मानमचिरान् मुच्यते हि सः ॥ १०३ ॥

आत्मानं परमात्मानम् ॥ श्रीमदाविर्होत्रो विदेहम् ॥

६४ । अग्रे च व्यतिरेकमुखेन (भा० ११।५।१) —

भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः ।
तेषामशान्तकामानां का निष्ठाविजितात्मनाम् ॥ १०४ ॥

इत्येतत्प्रश्नोत्तरम् (भा० ११।५।२–३) —

मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ।
चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ १०५ ॥
य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् ।
न भजन्त्यवजानन्ति स्थानाद् भ्रष्टाः पतन्त्यधः ॥ १०६ ॥

पूर्वं श्रीद्रुमिलोपदेशेऽपि देवकृतश्रीनारायणस्तुतौ (भा० ११।४।१०) —

त्वां सेवतां सुरकृता बहवोऽन्तरायाः स्वौको विलङ्घ्य परमं व्रजतां पदं ते ।
नान्यस्य बर्हिषि बलीन् ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥ १०७ ॥ इत्युक्तम् ।

तत्र च यज्ञे स्वभागान् ददतः सुरकृता विघ्ना न भवन्ति । त्वां सेवमानानां तु मात्सर्येण तत्कृतास्ते भवन्ति किन्तु “यदि” इति निश्चये “यदि वेदाः प्रमाणम्” इतिवन् निश्चितमेव त्वं तेषामवितेति । त्वां सेवमानो विघ्नमूर्ध्नि पदं च धत्ते प्रत्युत तमेव सोपानमिव कृत्वा व्रजतीत्यर्थः ।
तदेवं श्रुत्वा संसार एव तिष्ठतां यत् पर्यवसानं भवेत् तत् पृष्टम् “भगवन्तम्” (भा० ११।५।१) इत्यादिना । तत्रोत्तरयन् प्रथमं तेषां प्रत्यवायित्वमाह “मुख” (भा० ११।५।२) इति पादोनद्वयेन । पर्यवसानमाह “स्थानात्” (भा० ११।५।३) इति पादेन ॥ श्रीचमसो विदेहम् ॥

६५ । अग्रे च पूर्वोक्तप्रकारेण भक्तेरेवाभिहितत्वे भवेत् तस्य तद्विशेषप्रश्नोऽपि युक्तः "कस्मिन् काले" (भा० ११।५।१९) इत्यादिना तथैवोत्तरितम् ।
भा० ११।५।२० —

कृतं त्रेता द्वापरं च कलिरित्येषु केशवः ।
नानावर्णाभिधाकारो नानैव विधिनेज्यते ॥ १०८ ॥

नानैव विधिना विविधेन मार्गेन ॥ श्रीकरभाजनो विदेहम् ॥

६६ । श्रीभगवदुद्धवसंवादेऽपि (भा० ११।७।६) —

त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु ।
मय्यावेश्य मनः सम्यक् समदृग् विचरस्व गाम् ॥ १०९ ॥

"नोद्धवोऽण्वपि मन्न्यूनः" (भा० ३।४।३१) इत्यादिभिः श्रीमदुद्धवस्य सिद्धत्वेनैव प्रसिद्धत्वात् तं लक्ष्यीकृत्य तद्द्वारान्येभ्य एवोपदेशोऽयम् । एवमन्यत्र च ज्ञेयम् ।
ततश्च जहल्लक्षणया त्वं त्वदीयमार्गानुगतो भक्तो विचरस्व विचरत्वित्येवार्थः । समदृक्त्वं च मां विनान्यत्र हेयोपादेयत्वाभावात् । तुशब्दो बहिर्मुखनिवृत्त्यर्थः ।
तेनापि पूर्वमिदमभिप्रेतम् (भा० ११।६।४६-४९) —

त्वयोपयुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः ।
उच्छिष्टभोजिनो दासास्तव मायां जयेम हि ॥ ११० ॥
वातवासना मुनयो श्रमणा ऊर्ध्वमन्थिनः ।
ब्रह्माख्यं धाम ते यान्ति शान्ताः सन्न्यासिनोऽमलाः ॥ १११ ॥
वयं त्विह महायोगिन् भ्रमन्तः कर्मवर्त्मसु ।
त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ ११२ ॥
स्मरन्तः कीर्तयन्तश्च कृतानि गदितानि च ।
गत्युत्स्मितेक्षितक्ष्वेलि यन् नृलोकविडम्बनम् ॥ ११३ ॥ इति ॥

श्रीभगवानुद्धवम् ॥

६७ । अग्रे च ज्ञानयोगस्य केवलस्यासाध्यत्वं भक्तियोगस्य तु सुखसाध्यत्वमानुषङ्गिकतया ज्ञानजनकत्वं स्वयमपि पुरुषार्थत्वं चेति ।
यथा (भा० ११।११।१७) —

न कुर्यान् न वदेत् किञ्चिन् न ध्यायेत् साध्वसाधु वा ।
आत्मारामोऽनया वृत्त्या विचरेज् जडवन् मुनिः ॥ ११४ ॥

इत्यन्तेन ग्रन्थेन ज्ञानयोगमुक्त्वा भक्तियोगमुद्भावयितुमाह (भा० ११।११।१८) —

शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि ।
श्रुतस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः ।। ११५ ।।

अत्र परब्रह्मपदेन परतत्त्वमात्रमुच्यते न तु ब्रह्मत्वभगवत्त्वादिविवेकेनेति ज्ञेयं सर्वत्र तत्सामान्यात् । तदेवं शब्दब्रह्माभ्यासस्य परब्रह्माभ्यासः प्रयोजनमित्युक्तम् । तत्र सर्वेष्वेवांशेषु विशेषत उपनिषद्भागे शब्दब्रह्मणस्तत्प्रतिपादकत्वे स्थितेऽपि तद्विचारकोटिभिरपि परब्रह्मनिष्ठा न जायते किन्तु तस्य यस्मिन्नंशे श्रीभगवदाकारपरब्रह्मलीलादिकं प्रतिपाद्यते तदभ्यासेनैव भगवदाकारे ब्रह्माकारे च निष्ठा जायते ।
तदुक्तम् (भा० १२।४।४०) —

संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद् विविधदुःखदवार्दितस्य ।। ११६ ।।

भा० १०।१४।४ —

श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये ।
तेषामसौ क्लेशल एव शिष्यते नान्यद् यथा स्थूलतुषावघातिनाम् ।। ११७ ।।

६८ । अत एव मदीयलीलाशून्यां वैदिकीमपि वाचं नाभ्यसेदित्याह द्वाभ्याम् (भा० ११।११।१९) —

गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च ।
वित्तं त्वतीर्थीकृतमङ्ग वाचं हीनां मया रक्षति दुःखदुःखी ।। ११८ ।।

मया श्रीभगवता हीनां मम लीलादिशून्याम् ।।

६९ । "मया हीनां वाचम्" इत्युक्तं विवृणोति (भा० ११।११।२०) —

यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवप्राणनिरोधमस्य ।
लीलावतारेप्सितजन्म वा स्याद् बन्ध्यां गिरं तां बिभृयान् न धीरः ।। ११९ ।।

यस्यां मे जगतः शोधकं चरितं न स्यात् । किं तत् ? अस्य विश्वस्य स्थित्यादिरूपम् । तद्धेतुरित्यर्थः । ततोऽप्युत्कृष्टतमत्वेन विमृश्याह — लीलावतारेष्वीप्सितं जगतः प्रेमास्पदं श्रीकृष्णरामादिजन्म वा न स्यात् तां निष्फलां गिरं वेदलक्षणामपि धीरो धीमान् न धारयेत् । तदुक्तं श्रीनारदेन "इदं हि पुंसस्तपसः श्रुतस्य वा" (भा० १।५।२२) इत्यादि ।
अत एव गीतं कलियुगपावनावतारेण श्रीभगवता (पद्या० ३९) —

श्रुतमप्यौपनिषदं दूरे हरिकथामृतात् ।
यन् न सन्ति द्रवच्चित्तकम्पाश्रुपुलकादयः ॥ १२० ॥

७० । तदेवं भक्त्यैव ज्ञानं सिध्यतीत्युक्त्वा तं च ज्ञानमार्गमुपसंहरति (भा० ११।११।२१) —

एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि ।
उपारमेत विरजं मनो मय्यर्प्य सर्वगे ॥ १२१ ॥

जिज्ञासया "बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः" (भा० ११।११।१) इत्यादिपूर्वोक्तप्रकारकविचारेण । आत्मनि शुद्धजीवे । नानात्वं देवत्वमनुष्यत्वादिभेदमपोह्य । एवं मल्लीलादिश्रवणेन मनो मयि ब्रह्माकारे सर्वगे अर्प्य धारयित्वा उपारमेत ॥

७१ । तदेवं ज्ञानमिश्रां भक्तिमुपदिश्य तदनादरेणानुषङ्गसिद्धज्ञानगुणां शुद्धामेव भक्तिमुपदिशति चतुर्भिः (भा० ११।११।२२) —

यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलम् ।
मयि सर्वाणि कर्माणि निरपेक्षः समाचर ॥ १२२ ॥

"यदीति निश्चये" टीकायाम् "धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि" (भा० ११।४।१०) इतिवत् । अत्र खलु ज्ञानेच्छुरेव प्रकृतः । श्रीमदुद्धवं प्रति च तादृशत्वमारोप्यैवेदमुच्यते । ततश्च "श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये तेषामसौ" (भा० १०।१४।४) इत्यादिप्रमाणेन भक्तिं विना केवलज्ञानमार्गेण ब्रह्मणि मनो धारयितुं निश्चितमेवानीशो भवसि । ततोऽपि स्वतो ज्ञानादिसर्वगुणसेवितं भक्तिमार्गमेवाश्रयेति तत्सोपानमुपदिशति — मयीत्यादिना ।
अथवा प्राक्तनभक्तिबलाभावाद् ब्रह्मज्ञानेच्छुर्यदि तत्र मनो धारयितुमनीशः स्यात् तदाधुनाप्येवं कुर्विति योज्यम् । समाचर अर्पय । निरपेक्षो वाञ्छान्तररहितः ॥

७२ । ततश्च (भा० ११।११।२३–२४) —

श्रद्धालुर्मत्कथाः शृण्वन् सुभद्रा लोकपावनीः ।
गायन्ननुस्मरन् कर्म जन्म चाभिनयन् मुहुः ॥ १२३ ॥
मदर्थे धर्मकामार्थानाचरन् मदपाश्रयः ।
लभते निश्चलां भक्तिं मय्युद्धव सनातने ॥ १२४ ॥

टीका च — "मदर्पणेन कर्मभिर्विशुद्धसत्त्वस्यान्तरङ्गां भक्तिमाह — श्रद्धालुरिति" इत्येषा । अभिनयन् जन्मकर्मलीलयोर्मध्ये येऽंशा निजाभीष्टभावभक्तगतास्तान् स्वयमनुकुर्वन् भगवद्गतान् भक्तान्तरगतांश्च तानन्यद्वारानुकुर्वन्नित्यर्थः ।

किं च यो धर्मो गोदानादिलक्षणस्तमपि मदर्थे मदीयजन्मादिमहोत्सवाङ्गत्वेनैव । यश्च कामो महाप्रासादवासादिलक्षणस्तमपि मदर्थे मदीयसेवाद्यर्थं मन्मन्दिरवासादिलक्षण-त्वेनैव । यश्चार्थो धनसङ्ग्रहस्तमपि मदर्थे मत्सेवामात्रोपयोगित्वेनैवाचरन् सेवमानः । मदपाश्रय आश्रयान्तरशून्यचेताश्च सन् तामेव कथाश्रवणादिलक्षणां भक्तिं मयि निश्चलां सर्वदाव्यभिचारिणीं लभते तत्सुखेन कैवल्यादावप्यनादरात् । न च भजनीयस्य चलतया वा सा चलिष्यतीति मन्तव्यमित्याह — सनातन इति ॥

७३–७४ । नन्वेवम्भूतभक्तिमार्गे प्रवृत्तिर्निष्ठा वा कथं स्यात् ? इत्याशङ्क्य तत्र हेतुमाह "सत्सङ्गलब्धया भक्त्या मयि मां स उपासिता" (भा० ११।११।२५) इति । भक्त्या भक्तिरुच्या स भक्तो मामुपासिता भजमानो भवति ।

तस्य च भक्तस्य मदीयं ब्रह्माकारं भगवदाकारं च सर्वमपि स्वरूपविज्ञानमनायासेनैव भवतीत्याह "स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम्" (भा० ११।११।२५) इति । अञ्जसा भक्त्यनुषङ्गेनैव । पदं स्वरूपम् ॥ श्रीभगवान् ॥

७५ । अग्रे च भक्तियोगस्यैव प्राक्सिद्धता साक्षात् श्रीभगवत्प्रवर्तितता स्वयमेव मुख्यता । परेषां त्वर्वाचीनता यथारुचि नानाजनप्रवर्तितता तुच्छता चेति । यथा श्रीमदुद्धव उवाच (भा० ११।१४।१–२) —

> वदन्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ।
> तेषां विकल्पप्राधान्यमुताहो एकमुख्यता ॥ १२५ ॥
> भवतोदाहृतः स्वामिन् भक्तियोगोऽनपेक्षितः ।
> निरस्य सर्वतः सङ्गं येन त्वय्याविशेन् मनः ॥ १२६ ॥

टीका च — "श्रेयांसि श्रेयःसाधनानि । किं विकल्पेन प्राधान्यमुताहो किं वा एकस्यैव मुख्यता ? एकमुख्यतापक्षोत्थापने कारणम् — भवतेति । नापेक्षितमपेक्षा यस्मिन् सोऽहैतुकः । अयमर्थः — भवता यो भक्तियोग उक्तः । अन्ये च यानि निःश्रेयसःसाधनानि वदन्ति तेषां किं फलसाधनत्वेन प्राधान्यमेव सर्वेषामुत अङ्गाङ्गित्वम् ? प्राधान्येऽपि किं विकल्पेन सर्वेषां तुल्यफलत्वम् ? यद्वा कश्चिद् विशेषः ?" इत्येषा ॥

७६ । अत्रोत्तरं श्रीभगवानुवाच (भा० ११।१४।३) —

> कालेन नष्टा प्रलये वाणीयं वेदसञ्ज्ञिता ।
> मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ १२७ ॥

टीका च — "तत्र भक्तिरेव महाफलत्वेन मुख्या । अन्यानि तु स्वस्वप्रकृत्यनुसारेण खपुष्पस्थानीयस्वर्गादिफलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पितानि क्षुल्लकफलानीति विवेक्तुं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्तिमाह — कालेनेति सप्तभिः । मदात्मको मय्येवात्मा चित्तं येन सः" इत्येषा ।

यद्वा मदात्मको मत्स्वरूपभूतः । निर्गुणत्वेन प्रतिपादयिष्यमाणत्वात् ॥

७७ । तदेवं सति तस्यामेवानेकविधश्रेयोवदने हेतुमाह (भा० ११।१४।९) —

मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ।
श्रेयो वदन्त्यनेकान्तं यथाकर्म यथारुचि ॥ १२८ ॥

तत्प्रकृतीनां मायागुणमूलत्वात् मन्मायामोहितधियः । अनेकान्तं नानाविधं श्रेयः पुरुषार्थं तत्साधनं च ॥

७८ । यतः (भा० ११।१४।२०) —

न साधयति मां योगो न साङ्ख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥ १२९ ॥

न साधयति न वशीकरोति । तपो ज्ञानम् । त्यागः सन्न्यासः ॥

७९ । तथा (भा० ११।१४।२२) —

धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ।
मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि ॥ १३० ॥

धर्मो निष्कामः । विद्या शास्त्रीयं ब्रह्मज्ञानम् । तपस्तदीक्षणम् ॥

८० । भक्तिलक्षणैस्तु (भा० ११।१४।२६) —

यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ।
तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम् ॥ १३१ ॥

टीका च — "ननु 'ब्रह्मविदाप्नोति परम्' (तै० २।१।१) 'तमेव विदित्वातिमृत्युमेति' (श्वे० ३।८) इत्यादिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्या तत्प्राप्तिरवगम्यते । कुतो भक्तियोगेनेत्युच्यते ? तत्राह — यथा यथेति । आत्मा चित्तं परिमृज्यते शोध्यते मत्पुण्यगाथानां श्रवणैरभिधानैश्च । भक्तेरेवावान्तरव्यापारो ज्ञानं न पृथगित्यर्थः" इत्येषा ॥ श्रीभगवान् ॥

८१ । अग्रे च कर्मज्ञानभक्तिलक्षणान् योगान् तत्तदधिकारितायां पृथक् हेतुंश्चोक्त्वा ज्ञानकर्मानादरेण भक्तेरेवाभिधेयत्वमाह पञ्चभिः । तत्र ज्ञानाभ्यासानादरं वक्तुं तदधिकारहेतुवैराग्याभ्यासानादरं विधत्ते (भा० ११।२०।२९) —

प्रोक्तेन भक्तियोगेन भजतो मासकृन् मुनेः ।
कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते ॥ १३२ ॥

मा माम् ॥

८२ । ज्ञानाभ्यासानादरं विधत्ते (भा० ११।२०।३०) —

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥ १३३ ॥

भक्त्यैव दृष्टे साक्षात्कृते ॥

८३ । तथैवाह (भा० ११।२०।३१) —

तस्मान् मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ १३४ ॥

टीका च — "तदेवं व्यवस्थयाधिकारत्रयमुक्तम् । तत्र भक्तेरन्यनिरपेक्षत्वादन्यस्य च तत्सापेक्षत्वाद् भक्तियोग एव श्रेष्ठ इत्युपसंहरति — तस्मादिति त्रिभिः । मदात्मनो मयि आत्मा चित्तं यस्य तस्य । श्रेयः श्रेयःसाधनम्" इत्येषा ।
अत्र प्रायोग्रहणस्यायं भावः — भजतां ज्ञानवैराग्याभ्यासेन प्रयोजनं नास्त्येव । तत्र यथास्थितेऽपि सद्योमुक्तिमार्गे केषाञ्चित् क्रममुक्तिमार्गे प्रवृत्तिर्जायते । तथा "ब्रह्मभूतः प्रसन्नात्मा" (गीता १८।५४) इत्यादिश्रीगीतानुसारेण यदि क्रमभक्तिमार्गे प्रवृत्तिः स्यात् तदा भवत्विति । तदेवं भक्तेः प्रेमलक्षणे सर्वफलराजे स्वफले नास्त्येव ज्ञानाद्यपेक्षा ॥

८४ । पृथक् पृथग् ज्ञानादिफलेऽपि साध्ये नास्तीत्याह (भा० ११।२०।३२-३३) —

यत् कर्मभिर्यत् तपसा ज्ञानवैराग्यतश्च यत् ।
योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ १३५ ॥
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ।
स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छति ॥ १३६ ॥

इतरैस्तीर्थयात्राव्रतादिभिरपि यद् भाव्यं तत् सर्वं मद्भक्तियोगेन मद्भक्तो लभते । तत्राप्यञ्जसा अनायासेनैव । किं तत् सर्वम् ? तदाह — स्वर्गापवर्गमिति । स्वर्गः प्रापञ्चिकसुखं सत्त्वशुद्ध्यादिक्रमेणापवर्गो मोक्षसुखं च । तदतिक्रमिसुखं च भवतीत्याह — मद्धाम वैकुण्ठं चेति ।
कथञ्चिद् भक्त्युपकरणत्वेनैव यदि वाञ्छति कश्चित् तत्र श्रीचित्रकेत्वादिवत् स्वर्गवाञ्छा । तस्य भक्त्युपकरणत्वं चोक्तम् "स लक्षं वर्षलक्षाणामव्याहतबलेन्द्रियः" (भा० ६।१७।२) "रेमे विद्याधरस्त्रीभिर्गापयन् हरिमीश्वरम्" (भा० ६।१७।३) इति ।
श्रीशुकादिवदपवर्गवाञ्छा । तत्प्रार्थनया श्रीकृष्णेन दूरीकृतायां मायायां मातृगर्भाद् बहिर्बभूवेति हि ब्रह्मवैवर्तीयकथा । तत्र च भक्त्युपकरणत्वम् "ब्रह्मभूतः प्रसन्नात्मा" (गीता १८।५४) इत्यादिश्रीगीतावचनात् ।

तथा प्राप्तभगवत्पार्षदपदतदीयवृन्दविशेषवद् वैकुण्ठेच्छा । ते हि प्रेम्णा साक्षात् श्रीभगवच्चरणारविन्दसेवेच्छयैव तत्प्रार्थ्यं प्राप्तवन्तः "यच्च व्रजन्त्यनिमिषामृषभानुवृत्त्या" (भा० ३।१५।२५) इत्यादिवत् ॥ श्रीभगवान् ॥

८५ । अन्ते च (भा० ११।२९।२२) —

> एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् ।
> यत् सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम् ॥ १३७ ॥

टीका च — "अतो मद्भजनमेव बुद्धेर्विवेकस्य मनीषायाश्चातुर्यस्य च फलमित्याह 'एषा' इति । तामेव दर्शयति सत्यममृतं च । मा माम् । अनृतेनासत्येन मर्त्येन विनाशिना मनुष्यदेहेन इह अस्मिन्नेव जन्मनि प्राप्नोतीति यत् सैव बुद्धिर्मनीषा चेति । बुद्धिर्विवेकः । मनीषा चातुर्यम्" इत्येषा ।
भा० १०।७२।२१ —

> हरिश्चन्द्रो रन्तिदेव उञ्छवृत्तिः शिबिर्बलिः ।
> व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः ॥ १३८ ॥

पूर्वं भक्तिप्रकरणगतत्वात् "अतः" इति हेतूपन्यासः कृतः ॥ सः (श्रीभगवान्) ॥

८६ । श्रीशुकोपदेशोपसंहारे च श्रवणमुपलक्ष्य (भा० १२।४।४०) —

> संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
> लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद् विविधदुःखदवार्दितस्य ॥ १३९ ॥

टीका च — "अन्यः प्लव उत्तरणसाधनं न भवेदुपायान्तरासम्भावात् । तत्कथाश्रवणमेव यथाशक्ति निषेव्यम्" इत्येषा । अन्यासामपि भक्तीनां तत्पूर्वकत्वेनैव प्रवृत्तेरुपायान्तरासम्भवत्वं युक्तम् ।
एतदनन्तराध्यायश्च तादृशोपक्रमोपसंहारमय एव (भा० १२।५।१) —

> अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान् हरिः ।
> यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥ १४० ॥

इत्युपक्रमे (भा० १२।५।१३) —

> एतत् ते कथितं तात यदात्मा पृष्टवान् नृप ।
> हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि ॥ १४१ ॥

इत्युपसंहारेऽपि तादृशमहिमत्वेन पूर्वोक्तलीलाकथाश्रवणस्यैव प्राधान्यात् । तत उपक्रमोपसंहारनिर्दिष्टत्वात् श्रवणोपलक्षितभक्तेरेवात्रापि प्राधान्यम् । यस्तु तन्मध्ये "त्वं तु राजन् मरिष्येति" (भा० १२।५।२) इत्यादिना ज्ञानोपदेशः स च तस्य या प्रागवगता भक्तिनिष्ठा तस्याः सम्प्रत्यपि स्थैर्यप्रकटनार्थ एव एकान्तिभक्तेषु भगवता मोक्षवरच्छन्दवत् पूर्वमपि तन्निष्ठया स्वतः एव मरणभयपरित्यागात् । अनन्तरं च श्रुत्वापि तं ज्ञानोपदेशं स्वस्य भक्तिनिष्ठाया एव स्वयं दर्शयिष्यमाणत्वात् ।

तत्र प्राचीना तन्निष्ठा यथा प्रथमे "कृष्णाङ्घ्रिसेवामधिमन्यमानः" (भा० १।१९।५) इति "दधौ मुकुन्दाङ्घ्रिमनन्यभावः" (भा० १।१९।७) इत्यादि च ।

तन्निष्ठयैव तद्भयपरित्यागो यथा तद्वाक्ये "द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः" (भा० १।१९।१५) इति ।

तज्ज्ञानोपदेशश्रवणानन्तरमपि तादृशस्वनिष्ठायाः स्थैर्यदर्शनं यथा तत्र तावत् पद्यत्रयेण तज्ज्ञानोपदेशमबहुमत्वा श्रवणलक्षणया भक्त्यैव स्वकृतार्थत्वमुक्तम् (भा० १२।६।२–४) —

सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना ।
श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥ १४२ ॥
नात्यद्भुतमहं मन्ये महतामच्युतात्मनाम् ।
अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ॥ १४३ ॥
पुराणसंहितामेतामश्रौष्म भवतो वयम् ।
यस्यां खलूत्तमःश्लोको भगवाननुवर्ण्यते ॥ १४४ ॥ इति ।

पुनश्चैकेन पद्येन तद्वाक्यगौरवमात्रेणाङ्गीकृतस्य ब्रह्मज्ञानस्य तक्षकादिभयनिवृत्तिहेतुत्वमुक्त्वाप्यन्येन तदूर्ध्वमधोक्षज एव वाक्चेतसोस्तन्नामकीर्तनध्यानावेशानुज्ञा प्रार्थिता (भा० १२।६।५–६) —

भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहम् ।
प्रविष्टो ब्रह्मनिर्वाणमभयं दर्शितं त्वया ॥ १४५ ॥
अनुजानीहि मां ब्रह्मन् वाचं यच्छाम्यधोक्षजे ।
मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ॥ १४६ ॥

अथ पुनरन्येन पद्येनाज्ञाननिरासकज्ञानविज्ञानसिद्धिश्च भगवत्पदारविन्ददर्शनसुखान्तर्भूतैव मम स्फुरतीति विज्ञापितम् । यथा (भा० १२।६।७) —

अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ।
भवता दर्शितं क्षेमं परं भगवतः पदम् ॥ १४७ ॥ इति ।

अत्र पदशब्दस्य चरणारविन्दविधायकत्वे "ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम्" (भा० १।१८।१६) इत्येवास्ति प्रथमे साधकम् ।

तदेतत् प्रकरणार्थस्तत्र श्रीसूतेनैव स्पष्टीकृतः (भा० १।१८।२-४) —

ब्रह्मकोपोत्थिताद् यस्तु तक्षकात् प्राणविप्लवात् ।
न सम्मुमोहोरुभयाद् भगवत्यर्पिताशयः ॥ १४८ ॥
नोत्तमश्लोकवार्त्तानां जुषतां तत्कथामृतम् ।
स्यात् सम्भ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम् ॥ १४९ ॥ इति ।

तथा पूर्वं द्वादशस्यैव तृतीये प्रथमस्कन्धान्तःस्थस्य (भा० १।१९।३७) —

अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम् ।
पुरुषस्येह यत् कार्यं म्रियमाणस्य सर्वथा ॥ १५० ॥

इत्यस्य राजप्रश्नस्योत्तरत्वेन भगवद्ध्यानकीर्तने एव स्वयं श्रीशुकदेवेनाप्युपदिष्टे (भा० १२।३।४९-५१) —

तस्मात् सर्वात्मना राजन् हृदिस्थं कुरु केशवम् ।
म्रियमाणो ह्यवहितस्ततो यासि परां गतिम् ॥ १५१ ॥
म्रियमाणैरभिध्येयो भगवान् परमेश्वरः ।
आत्मभावं नयत्यङ्ग सर्वात्मा सर्वसम्भवः ॥ १५२ ॥
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥ १५३ ॥ इत्यादिना ।

ततस्तत्र केशवे । अवहितः कृतावधानः । आत्मभावमात्मनो भक्तिम् । अस्तु तावदायाससाध्यं ध्यानम् । हि यस्मादनायाससाध्यात् कीर्तनादेवेत्यर्थः ।
द्वितीयस्कन्धेऽपि "न ह्यतोऽन्यः शिवः पन्थाः" (भा० २।२।३३) इत्यादिना "एवमेतन् निगदितम्" (भा० २।३।१) इत्यन्तेन ग्रन्थेन नानाङ्गवान् शुद्धभक्तियोग एव तत्रोत्तरत्वेन पर्यवसितः । तत्रापि "पिबन्ति ये भगवतः" (भा० २।२।३७) इत्यादिना लीलाकथाश्रवण एव परमपर्यवसानं दृश्यते । तस्मात् साधूक्तम् "त्वं तु राजन् मरिष्येति" (भा० १२।५।२) इत्यादिकं तद्भक्तिनिष्ठाप्रकटनार्थमेवेति । यतो भक्तावेव तदुपदेशस्य तात्पर्यम् ।
अत एव द्वितीयस्याष्टमे राजप्रार्थना च नान्यथा स्यात् "कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम्" (भा० २।८।३) इति । तदेवम् "अत्रानुवर्ण्यतेऽभीक्ष्णम्" (भा० १२।५।१) इत्याद्यनुसारेणापि साध्वेव स्थापितम् "संसारसिन्धुमतिदुस्तरम्" इत्यादि ॥ श्रीशुकः ॥

८७ । श्रीसूतोपदेशान्तेऽपि पञ्चभिः (भा० १२।१२।५२) —

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न ह्य अर्पितं कर्म यदप्यनुत्तमम् ॥ १५४ ॥

टीका च — “इदानीं ज्ञानकर्मादरादपि भगवत्कीर्तनादिष्वेवादरः कर्तव्य इत्याह नैष्कर्म्यं ब्रह्म तत्प्रकाशकं यज्ज्ञानं यतो निरञ्जनमुपाधिनिवर्तकं तदपि अच्युतभक्तिवर्जितं चेन् न शोभते नापरोक्षपर्यन्तं भवतीत्यर्थः” इत्यादिका ॥

८८ । तथा (भा० १२।१२।५३) —

> यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु ।
> अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ॥ १५५ ॥

टीका च — “किं च वर्णाश्रमाचारादिषु यः परो महान् परिश्रमः स यशोयुक्तानां श्रियामेव कीर्तौ सम्पदि वा केवलं न परमपुरुषार्थ इत्यर्थः । गुणानुवादादिभिस्तु श्रीधरपादपद्मयो-रविस्मृतिर्भवति” इत्येषा ॥

८९ । तथा (भा० १२।१२।५४) —

> अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि च शं तनोति ।
> सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥ १५६ ॥

स्पष्टम् ॥

९० । तथा (भा० १२।१२।५५) —

> यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतम् ।
> नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ॥ १५७ ॥

टीका च — “तदेवं श्रोतृणात्मानं चाभिनन्दन्नाह ‘यूयम्’ इति द्वाभ्याम् । हे द्विजाग्र्याः ! यस्मादात्मन्यन्तःकरणे श्रीनारायणमाविवेश्य शश्वद् भजत । सम्भावनायां लोट् । अतो भूरिभागा बहुपुण्याः । कथम्भूतम् ? अखिलात्मभूतं सर्वान्तर्यामिणम् । अत एव देवं सर्वो-पास्यम् । अदेवं न देवोऽन्यो यस्य तम् । कुतः ? ईशम् । यद्वा यस्माद् यूयं भूरिभागास्त-पआदिना सम्पन्नास्ततो नारायणं भजतेति विधिः” इत्येषा ।
अत्र तपआदिसम्पत्तेः सार्थकत्वं नारायणभजनेनैव भवतीति स्वाम्यभिप्रायः ॥

९१ । तथा (भा० १२।१२।५६) —

> अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ।
> प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वताम् ॥ १५८ ॥

एतत्प्रसङ्गेनाहं चात्मतत्त्वमखिलात्मभूतं नारायणं स्मारितः । सम्प्रति परमोत्कण्ठितीकृ-तोऽस्मीत्यर्थः । यदात्मतत्त्वं मे मया महर्षिमुखाच्छ्रुतम् ॥ श्रीसूतः ॥

९२ । तदेवमस्मिन् श्रीमति महापुराणे गुरुशिष्यभावेन प्रवृत्तानामुपदेशशिक्षावाक्येषु भक्तेरेवाभिधेयत्वं साधितम् । तथा (भा० १।१६।६) —

तत् कथ्यतां महाभाग यदि कृष्णकथाश्रयम् ।
अथवास्य पदाम्भोजमकरन्दलिहां सताम् ॥ १५९ ॥

इत्यनुसारेण सर्वेषामितिहासानामपि तन्मात्रतात्पर्यत्वं ज्ञेयम् । विस्तरभिया तु न विव्रियते । अथान्यत्र च तदेव दृश्यते । तत्रान्वयेन यथा (भा० ६।३।२२) —

एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः ।
भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ १६० ॥

पुंसां जीवमात्राणां परो धर्मः सार्वभौमो धर्म एतावानेव स्मृतः । नैतदधिकः । एतावत्त्वमेवाह — तन्नामग्रहणादिभिर्यो भक्तियोगः साक्षाद् भक्तिरिति । एवकारेणान्यव्यावृत्तत्वं स्पष्टयति — भगवतीति । नामग्रहणादीन्यपि यदि कर्मादौ तत्साद्गुण्याद्यर्थं प्रयुज्यन्ते तदा तस्य परत्वं नास्ति । तुच्छफलार्थं प्रयुक्तत्वेन तदपराधादित्यर्थः । तथैव क्षयिष्णुफलदातृत्वं च भवतीति भावः ॥ श्रीयमः स्वभटान् ॥

९३ । तथा च (भा० ६।१।१७) —

सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः ।
सुशीलाः साधवो यत्र नारायणपरायणाः ॥ १६१ ॥

अयं पन्थाः श्रीनारायणभक्तिमार्गः ॥ श्रीशुकः ॥

९४ । तत्रैवान्वयेन सर्वशास्त्रश्रवणफलत्वं सकैमुत्यमाह (भा० ३।१३।४) —

श्रुतस्य पुंसां सुचिरश्रमस्य नन्वञ्जसा सूरिभिरीडितोऽर्थः ।
तत्तद्गुणानुश्रवणं मुकुन्दपादारविन्दं हृदयेषु येषाम् ॥ १६२ ॥

पुंसां श्रुतस्य वेदार्थावगतेरयमेवार्थः प्रयोजनमीडितः श्लाघितः । कोऽसौ ? मुकुन्दस्य पादारविन्दं येषां हृदयेषु वर्तते तेषां तत्तद्गुणानां भगवद्भक्त्यात्मकानामनुश्रवणं यत् सोऽयमिति । ततः सुतरामेव श्रीमुकुन्दस्येत्यर्थः । एवमेवोक्तम् “वासुदेवपरा वेदाः” (भा० १।२।२८) इत्यादि । “भगवान् ब्रह्म कार्त्स्न्येन” (भा० २।२।३४) इत्यादि ।
तथा च पाद्मबृहत्सहस्रनाम्नि —

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥ १६३ ॥

तथा च स्कान्दे प्रभासखण्डे लिङ्गपुराणे च —

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेव सुनिष्पन्नं ध्येयो नारायणः सदा ॥ १६४ ॥

अत एव वेदार्पणमन्त्र —

इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः ।
ब्रह्मज्ञस्तपते देवः प्रीयतां मे जनार्दनः ॥ १६५ ॥

श्रीविदुरः ॥

९५ । यतो यश्च शास्त्रे वर्णाश्रमाचारो विधीयते तस्याप्यनुपमचरितं फलं भक्तिरेव । यथा (भा० १० ।४७ ।२४) —

दानव्रततपोहोमजपस्वाध्यायसंयमैः ।
श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥ १६६ ॥

दानादिभिः श्रीकृष्णसन्तोषार्थैरिति ज्ञेयम् ।
तदुक्तम् "तज् जन्म तानि कर्माणि तदायुस्तन्मनो वचः" (भा० ४ ।३१ ।९) इत्यादि ।
बृहन्नारदीये —

जन्मकोटिसहस्रेषु पुण्यं यैः समुपार्जितम् ।
तेषां भक्तिर्भवेच्छुद्धा देवदेवे जनार्दने ॥ १६७ ॥ इति ।

अगस्त्यसंहितायाम् —

व्रतोपवासनियमैर्जन्मकोट्याप्यनुष्ठितैः ।
यज्ञैश्च विविधैः सम्यग् भक्तिर्भवति माधवे ॥ १६८ ॥ इति ।

एतदेव व्यतिरेकेणोक्तम् "धर्मः स्वनुष्ठितः पुंसाम्" (भा० १ ।२ ।८) इत्यादौ । "यशःश्रियामेव" (भा० १२ ।१२ ।५३) इत्यादौ च ॥ श्री उद्धवः श्रीव्रजदेवीः ॥

९६ । यच्च तत्र ज्ञानमभिधीयते तदपि भक्त्यन्तर्भूततयैव लभ्यम् । यथा (भा० १० ।१४ ।५) —

पुरेह भूमन् बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया ।
विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥ १६९ ॥

हे भूमन् ! इह लोके पूर्वं बहवो योगिनोऽपि सन्तो योगैर्ज्ञानमप्राप्य पश्चात् त्वयि अर्पितेहा लौकिक्यपि चेष्टा । तथा अर्पितानि यानि निजानि कर्माणि तैर्लब्धया कथारुचिरूपया पुनश्च कथोपनीतया कथया त्वत्समीपं प्रापितया कथनीयरुचिरूपया भक्त्यैव अञ्जः सुखेन विबुध्य आत्मतत्त्वमारभ्य श्रीभगवत्तत्त्वपर्यन्तमनुभूय तव परमान्तरङ्गां गतिं प्राप्ताः ।

श्रीगीतोपनिषत्सु च "अहं सर्वस्य प्रभवः" (गीता १०।८) इत्यादिभिः शुद्धां भक्तिमुपदिश्याह (गीता १०।११) —

> तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
> नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ १७० ॥ इति ॥

ब्रह्मा श्रीभगवन्तम् ॥

९७ । यान्यन्यानि सर्वाणि तत्र पुरुषार्थसाधनान्युच्यन्ते तान्यपि तथैव भक्तिमूलान्येव । यथा (भा० १०।८१।१९) —

> स्वर्गापवर्गयोः पुंसां रसायां भुवि सम्पदाम् ।
> सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम् ॥ १७१ ॥

"मन्त्रतस्तन्त्रतश्छिद्रम्" (भा० ८।२३।१६) इत्यादिन्यायेन "मुखबाहूरुपादेभ्यः" (भा० ११।५।२) इत्याद्युक्तनित्यत्वेन च सर्वथा तद्बहिर्मुखानां तु तत्तदलाभ एव स्यादित्यर्थः । यथा स्कान्दे —

> विष्णुभक्तिविहीनानां श्रौताः स्मार्ताश्च याः क्रियाः ।
> कायक्लेशः फलं तासां स्वैरिणीव्यभिचारवत् ॥ १७२ ॥ इति ।

तदुक्तं श्रीयुधिष्ठिरेण (भा० १०।७२।४) —

> त्वत्पादुके अविरतं परि ये चरन्ति ध्यायन्त्यभद्रनशने शुचयो गृणन्ति ।
> विन्दन्ति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ॥ १७३ ॥
> इति ।

अत उक्तं बृहन्नारदीये —

> यथा समस्तलोकानां जीवनं सलिलं स्मृतम् ।
> तथा समस्तसिद्धीनां जीवनं भक्तिरिष्यते ॥ १७४ ॥ इति ॥

श्रीदामविप्रः ॥

९८ । तदेवं तानि साधनानि भक्तिजीवनान्येवेति भक्तेरेव सर्वत्राभिधेयत्वम् । तानि विनापि च भक्तेरेव तत्र साधकत्वमपि दर्शितम् तत्र "अकामः सर्वकामो वा" (भा० २।३।१०) इत्यादौ ।
यथा श्रीविष्णुपुराणे पुलहवाक्यम् (वि० पु० १।११।४६) —

> यो यज्ञपुरुषो यज्ञे योगे यः परमः पुमान् ।
> तस्मिंस्तुष्टे यदप्राप्यं किं तदस्ति जनार्दने ॥ १७५ ॥

अत एव मोक्षधर्मे —

> या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये ।
> तया विना तदाप्नोति नरो नारायणाश्रयः ॥ १७६ ॥ इति ।

तस्मात् साधूक्तं सर्वशास्त्रश्रवणफलत्वेन तदभिधेयत्वम् । अत एव प्रथमं स्वयं भगवता सैव प्रवर्तितेत्युक्तम् "कालेन नष्टा प्रलये वाणीयम्" (भा० ११।१४।३) इत्यादिना ।
तदेवं सति ये तु नातिकोविदास्ते तत्तदर्थं कर्माद्यङ्गत्वेनैव श्रीविष्णूपासनं कुर्वते । ततस्तदपराधेन निजकामनामात्रफलप्रदत्वं तत्रानियतत्वं च तस्याः । तत्तदर्थमपि स्वतन्त्रत्वेन क्रियमाणाया भक्तेस्त्ववश्यं तत्तत्फलप्रदत्वम् । न च तत्तन्मात्रदानेन पर्याप्तिः किन्तु पर्यवसाने परमफलप्रदत्वमेवेति ।
ततस्तस्या एव परमहितत्वेनाभिधेयत्वमाह (भा० ५।१९।२७) —

> सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत् पुनरर्थिता यतः ।
> स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवम् ॥ १७७ ॥

अर्थितः प्रार्थितः सन् नृणामर्थितं सत्यमेव ददाति । न तत्र कदाचिदपि व्यभिचार इत्यर्थः । किन्तु तथापि तन्मात्रेणार्थदो न भवति तन्मात्रं दत्त्वा निवृत्तो न भवतीत्यर्थः । यत उपासकस्तत्रापूर्णत्वाद् भोगक्षये सति तदेव पुनरर्थिता भवति "न जातु कामः कामानाम्" (भा० ९।१९।१४) इत्यादेः । तदेवमभिप्रेत्य स तु परमकारुणिकस्तत्पादपल्लवमाधुर्यज्ञानेन तदनिच्छतामपि भजतामिच्छापिधानं सर्वकामसमापकं निजपादपल्लवमेव विधत्ते तेभ्यो ददातीत्यर्थः । यथा माता चर्व्यमाणां मृत्तिकां बालकमुखादपसार्य तत्र खण्डं ददाति तद्वदिति भावः ।
एवमप्युक्तम् "अकामः सर्वकामो वा" (भा० २।३।१०) इत्यादौ तीव्रत्वं भक्तेः । तथोक्तं गारुडे —

> यद् दुर्लभं यदप्राप्यं मनसो यन् न गोचरम् ।
> तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः ॥ १७८ ॥ इति ।

एवं श्रीसनकादीनामपि ब्रह्मज्ञानिनां भक्त्यनुवृत्त्या तत्पादपल्लवप्राप्तिर्ज्ञेया ॥ देवाः परस्परम् ॥

९९ । अथ व्यतिरेकेण कर्मानादरेणाह — तत्र कर्मणः फलप्राप्तावनिश्चयवत्त्वं दुःखरूपत्वं च भक्तेस्तु तस्यामावश्यकत्वं साधकदशायामपि सुखरूपत्वं चेत्याह (भा० १।१८।१२) —

कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् ।
आपाययति गोविन्दपादपद्मासवं मधु ॥ १७९ ॥

अस्मिन् कर्मणि सत्रेऽनाश्वासेऽविश्वसनीये वैगुण्यबाहुल्येन कृषिवत् फलनिश्चयाभावात् । अनेन भक्तेर्विश्वसनीयत्वं ध्वनितम् । धूमेन धूम्रो विरञ्जितौ विवर्णावात्मानौ शरीरचित्ते येषाम् । कर्मणि षष्ठी तानस्मानित्यर्थः । पादपद्मस्य यशोरूपमासवं मकरन्दं मधु मधुरम् । अत्र सत्रवत् कर्मान्तरं यशःश्रवणवद् भक्त्यन्तरं चेति ज्ञेयम् । तदेवं भक्तिविनाभूतानां कर्मादिभिरस्माकं दुःखमेवासीदिति व्यतिरेकत्वमत्र गम्यते ।
तदुक्तम् "यशःश्रियामेव परिश्रमः परः" (भा० १२।१२।५३) इत्यादि "अतो वै कवयो नित्यम्" (भा० १।२।२२) इत्यादि च ।
ब्रह्मवैवर्ते च शिवं प्रति श्रीविष्णुवाक्यम् —

यदि मां प्राप्तुमिच्छन्ति प्राप्नुवन्त्येव नान्यथा ।
कलौ कलुषचित्तानां वृथायुः प्रभृतीनि च ।
भवन्ति वर्णाश्रमिणां न तु मच्छरणार्थिनाम् ॥ १८० ॥ इति ॥

श्र्यृषयः सूतम् ॥

१०० । तथा "त्यक्त्वा स्वधर्मम्" (भा० १।५।१७) इत्यादिकमनुसन्धेयम् । एवं महावित्तमहायासादिसाध्येन कर्मादिना तुच्छं स्वर्गादिफलं स्वल्पायासस्वल्पवित्तादिसाध्यया भक्त्या तदाभासेन च परममहत्फलं तत्र तत्रानुसन्धाय भक्तावेव शास्त्रतात्पर्यं पर्यालोचनीयम् । तस्मात् तत्तच्छास्त्राणामपि भक्तिविधेयकतत्तदनुवादेन प्रवृत्तत्वान् न वैफल्यमित्यपि ज्ञेयम् ।
किं च (भा० ७।९।१०) —

विप्राद् द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखात् श्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः ॥ १८१ ॥

टीका च — "भक्त्यैव केवलया हरेस्तोषः सम्भवतीत्युक्तम् । इदानीं भक्तिं विना नान्यत् किञ्चित् तोषहेतुरित्याह विप्रादिति । 'मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः' (भा० ७।९।९) इत्यादौ पूर्वोक्ता ये धनादयो द्विषड् द्वादशगुणास्तैर्युक्ताद् विप्रादपि श्वपचं वरिष्ठं मन्ये ।
यद्वा सनत्सुजातोक्ता द्वादश धर्मादयो गुणा द्रष्टव्याः (म० भा० ३।४३।२०) —

धर्मं च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षानसूयाः ।
यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य ॥ १८२ ॥ इति ।

कथम्भूताद् विप्रात् ? अरविन्दनाभपादारविन्दविमुखात् । कथम्भूतं श्वपचम् ? तस्मिन्न-रविन्दनाभेऽर्पिता मन आदयो येन तम् । ईहितं कर्म । वरिष्ठत्वे हेतुः स एवम्भूतः श्वपचः सर्वं कुलं पुनाति । भूरिर्मानो गर्वो यस्य स तु विप्र आत्मानमपि न पुनाति कुतः कुलम् ? यतो भक्तिहीनस्यैते गुणा गर्वायैव भवन्ति न तु शुद्धये । अतो हीन इति भावः" इत्येषा । मुक्ताफलटीका च — "द्विषड् द्वादश गुणा धनाभिजनादयः । यद् वा —

शमो दमस्तपः शौचं क्षान्त्यार्जवविरक्तयः ।
ज्ञानविज्ञानसन्तोषाः सत्यास्तिक्ये द्विषड्गुणाः ॥ १८३ ॥

इत्यप्युक्ता" इत्येषा ।
स्कान्दे श्रीनारदवाक्यम् —

कुलाचारविहीनोऽपि दृढभक्तिजितेन्द्रियः ।
प्रशस्तः सर्वलोकानां न त्वष्टादशविद्यकः ।
भक्तिहीनो द्विजः शान्तः सज्जातिर्धार्मिकस्तथा ॥ १८४ ॥

काशीखण्डे च —

ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः ।
विष्णुभक्तिसमायुक्तो ज्ञेयः सर्वोत्तमोत्तमः ॥ १८५ ॥

बृहन्नारदीये —

विष्णुभक्तिविहीना ये चण्डालाः परिकीर्तिताः ।
चाण्डाला अपि ते श्रेष्ठा हरिभक्तिपरायणाः ॥ १८६ ॥

नारदीये च —

श्वपचोऽपि महीपाल विष्णोर्भक्तो द्विजाधिकः ।
विष्णुभक्तिविहीनो यो द्विजातिः श्वपचाधिकः ॥ १८७ ॥

अत्र मूलपद्ये "कुलं पुनाति" इत्युक्ते स्वं पुनातीति सुतरामेव सिद्धम् । यथोक्तम् (भा० २।४।१८) —

किरातहूणान्ध्रपुलिन्दपुक्कशा आभीरकङ्का यवनाः खसादयः ।
येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥ १८८ ॥ इति ॥

प्रह्लादः श्रीनृसिंहम् ॥

१०१ । अत एवाहुः (भा० १०।२३।३९) —

धिग् जन्म नस्त्रिवृद् यत्तद् धिग् व्रतं धिग् बहुज्ञताम् ।
धिक् कुलं धिक् क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥ १८९ ॥

टीका च — "त्रिवृत् शौक्रं सावित्रं दैक्षमिति त्रिगुणितं जन्म । व्रतं ब्रह्मचर्यम् । क्रियाः कर्माणि दाक्ष्यं च" इत्यादिका ।
तथोक्तम् "किं जन्मभिस्त्रिभिः" (भा० ४।३१।१०) इत्यादि ॥ याज्ञिकविप्राः ॥

१०२ । श्रीभगवत्समर्पितकर्मणोऽप्यनादरेण तु दर्शितम् "तस्मादेकेन मनसा" (भा० १।२।१४) इत्यादि । श्रीगीतोपनिषत्सु च भक्त्यसामर्थ्य एव तद् विहितम् (गीता १२।८–११) —

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ १९० ॥
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥ १९१ ॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥ १९२ ॥
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ १९३ ॥ इति ।

अत्र पाद्मे कार्तिकमाहात्म्येतिहासोऽनुसन्धेयः ।
यथा — "चोलदेशराजस्य कस्यचिद् विष्णुदासनाम्ना विप्रेण शुद्धमर्चनमेव कुर्वता सह कस्य पूर्वं भगवत्प्राप्तिः स्यादिति स्पर्धया बहून् यज्ञान् भगवदर्पितानपि सुष्ठु विदधतो न भगवत्प्राप्तिरभूत् । किन्तु विप्रस्य भगवत्प्राप्तौ दृष्टायां तान् परित्यज्य —

यत् स्पर्धया मया चैतद् यज्ञदानादिकं कृतम् ।
स विष्णुरूपधृग् विप्रो याति वैकुण्ठमन्दिरम् ॥ १९४ ॥
तस्माद् दानैश्च यज्ञैश्च नैव विष्णुः प्रसीदति ।
भक्तिरेव परं तस्य निदानं तोषणे मतम् ॥ १९५ ॥

इति मुद्गलं प्रत्युक्त्वा ।

विष्णौ भक्तिं स्थिरां देहि मनोवाक्कायकर्मणा ।
त्रिरुच्चैर्व्याजहारासौ होमकुण्डाग्रतः स्थितः ॥ १९६ ॥

इत्युक्त्वा शुद्धभक्तिशरणतामेव मुहुर्दैन्येनाङ्गीकृत्य होमकुण्डे देहं त्यजतः पश्चादेव तत्प्राप्तिः” इति ।
योगानादरेणाह (भा० १०।५१।६१) —

युञ्जानानामभक्तानां प्राणायामादिभिर्मनः ।
अक्षीणवासनं राजन् दृश्यते क्वचिदुत्थितम् ॥ १९७ ॥

उत्थितं विषयाभिमुखम् ॥ श्रीभगवान् मुचुकुन्दम् ॥

१०३ । तथा (भा० १।६।३६) —

यमादिभिर्योगपथैः कामलोभहतो मुहुः ।
मुकुन्दसेवया यद्वत् तथाद्धात्मा न शाम्यति ॥ १९८ ॥

ततः सुतरामेव “न साधयति मां योगः” (भा० ११।१४।२०) इत्यादिकमिति भावः ॥ श्रीनारदो श्रीव्यासम् ॥

१०४ । अथ ज्ञानानादरेणाप्युदाह्रियते । तत्र तस्य कृच्छ्रसाध्यत्वेनानादरो दर्शित एव “पानेन ते देव कथासुधायाः” (भा० ३।५।४५) इत्यादिभ्याम् ।
तथोक्तं श्रीकुमारोपदेशे “कृच्छ्रो महान्” (भा० ४।२२।४०) इत्यादि ।
श्रीगीतासु च (गीता १२।१-५) —

अर्जुन उवाच —
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १९९ ॥
श्रीभगवानुवाच —
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २०० ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ २०१ ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ २०२ ॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ २०३ ॥ इति ।

भक्तिमार्गे तु श्रमो न स्यात् । तद्वशीकारितारूपं फलं चापूर्वमित्याह (भा० १०।१४।३) —

ज्ञाने प्रयासमुदपास्य नमन्त एव जीवन्ति सन्मुखरितां भवदीयवार्ताम् ।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्यसि तैस्त्रिलो-
क्याम् ॥ २०४ ॥

उदपास्य ईषदप्यकृत्वा । स्थाने सतां निवास एव स्थिताः सन्मुखरितां सद्भिर्मुखरितां स्वत एव नित्यं प्रकटितां भवदीयवार्ता तत्सन्निधिमात्रेण स्वत एव श्रुतिगतां श्रवणं प्राप्तां प्रायशो बाहुल्येन तनुवाङ्मनोभिर्नमन्तः सत्कुर्वन्तो ये जीवन्ति केवलं यद्यपि नान्यत् कुर्वन्ति तैः प्रायशस्त्रिलोक्यामन्यैरजितोऽपि त्वं जितोऽसि वशीकृतोऽसि ।
अत एवोक्तं श्रीनृसिंहपुराणे —

पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्सु ।
भक्त्या सुलभ्ये पुरुषे पुराणे मुक्तौ किमर्थं क्रियते प्रयत्नः ॥ २०५ ॥ इति ।

१०५ । वस्तुतस्तु (भा० १०।१४।४) —

श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये ।
तेषामसौ क्लेशल एव शिष्यते नान्यद् यथा स्थूलतुषावघातिनाम् ॥ २०६ ॥

टीका च — "भक्तिं विना च ज्ञानं नैव सिध्यतीत्याह 'श्रेयः' इति । श्रेयसामभ्युदयापवर्गलक्षणानां सृतिः सरणं यस्याः सरस इव निर्झराणां तां ते तव भक्तिमुदस्य त्यक्त्वा श्रेयसां मार्गभूतामिति वा । तेषां क्लेशलः क्लेश एवावशिष्यते । अयं भावः — यथाल्पप्रमाणं धान्यं परित्यज्यान्तःकणहीनान् स्थूलधान्याभासांस्तुषानेव येऽवघ्नन्ति तेषां न किञ्चित् फलम् । एवं भक्तिं तुच्छीकृत्य ये केवलबोधाय प्रयतन्ते तेषामपि" इत्येषा ।
अत्र "विभो" इतिवत् केवल शुद्धेत्यपि सम्बोधनम् । असौ दृश्यमानः क्लेशलः सन्न्यासादीन्येवेति च ज्ञेयम् ।
श्रीगीतासु च "श्रीभगवानुवाच — अमानित्वमदम्भित्वम्" (गीता १३।७) इत्यादिकं ज्ञानयोगमार्गमुपक्रम्य मध्ये "मयि चानन्ययोगेन भक्तिरव्यभिचारिणी" (गीता १३।१०) इत्यप्युक्त्वा प्राप्ते "तत्त्वज्ञानार्थदर्शनम्" (गीता १३।११) इति समाप्याह "एतज् ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" (गीता १३।११) इति । ततो भक्तियोगं विना ज्ञानं न भवतीत्यर्थः ।
ततोऽन्तेऽप्युक्तम् "मद्भक्त एतद् विज्ञाय मद्भावायोपपद्यते" (गीता १३।१८) इति ।
तत्रान्यत्र च (गीता ९।३) —

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ २०७ ॥ इति ।

अस्य “सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः” (गीता ९।१४) इत्यादिपूर्वोक्तलक्षणस्येत्यर्थः ।
अत एवास्फुटभक्तीनां मुद्गलादीनामपि कृतचरी साधनभक्तिरनुसन्धेया ॥ ब्रह्मा श्रीभगवन्तम् ॥

१०६ । आश्रयान्तरस्वातन्त्र्यानादरेणाह (भा० ६।९।२२) —

अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तम् ।
विनोपसर्पत्यपरं हि बालिशः श्वलाङ्गुलेनातितितर्ति सिन्धुम् ॥ २०८ ॥

अविस्मितं ततोऽन्यस्यापूर्ववस्तुनोऽसद्भावाद् विस्मयरहितम् । यद्वा सदा सस्मितमतः स्वेनैव स्वीयेनैव स्वस्यैव कर्मभूतस्य क्रियाभूतेन लाभेन परिपूर्णकामं नान्यस्येत्यर्थः । अतः सर्वत्र समं ततः प्रशान्तं चित्तदोषरहितम् । बालिश ईशस्याप्रियः सोऽतितितर्ति अतितर्तुमिच्छतीत्यर्थः ।
तथोक्तम् “रजस्तमःप्रकृतयः” (भा० १।२।२७) इत्यादि ।
स्कान्दे श्रीब्रह्मनारदसंवादे च —

वासुदेवं परित्यज्य योऽन्यदेवमुपासते ।
स्वमातरं परित्यज्य श्वपचीं वन्दते हि सः ॥ २०९ ॥

तथैवान्यत्र च —

वासुदेवं परित्यज्य योऽन्यदेवमुपासते ।
त्यक्त्वामृतं स मूढात्मा भुङ्क्ते हलाहलं विषम् ॥ २१० ॥

महाभारते —

यस्तु विष्णुं परित्यज्य मोहादन्यमुपासते ।
स हेमराशिमुत्सृज्य पांशुराशिं जिघृक्षति ॥ २११ ॥

अत एवोक्तं श्रीसत्यव्रतेन (भा० ८।२४।४९) —

न यत्प्रसादायुतभागलेशमन्ये न देवा गुरवो जनाः स्वयम् ।
कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥ २१२ ॥

श्रीब्रह्मशिवावपि वैष्णवत्वेनैव भजेत “स आदिदेवो जगतां परो गुरुः” (भा० २।९।५) “वैष्णवानां यथा शम्भुः” (भा० १२।१३।१६) इत्याद्यङ्गीकारात् ।
अत एव द्वादशे श्रीशिवं प्रति श्रीमार्कण्डेयवचनम् (भा० १२।१०।३४) —

वरमेकं वृणेऽथापि पूर्णात् कामाभिवर्षणात् ।
भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥ २१३ ॥

तथा त्वय्यपि तत्पर इत्यर्थः । अत एवाष्टमे प्रजापतिकृतशिवस्तुतौ "ये त्वात्मरामगुरुभि-र्हृदि चिन्तिताङ्घ्रिद्वन्द्वम्" (भा० ८।७।३३) इति ।
चतुर्थे श्रीमदष्टभुजं प्रति श्रीप्रचेतोभिरपि "वयं तु साक्षाद् भगवन् भवस्य प्रियस्य सख्युः क्षणसङ्गमेन" (भा० ४।३०।३८) इति ।
वैष्णवस्य सतः समदर्शिनस्तु न भक्तिलाभः प्रत्यवायश्च । यथा वैष्णवतन्त्रे —

न लभेयुः पुनर्भक्तिं हरेरैकान्तिकीं जडाः ।
एकाग्रमनसश्चापि विष्णुसामान्यदर्शिनः ॥ २१४ ॥
यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।
समत्वेनैव वीक्षेत स पाषण्डी भवेद् ध्रुवम् ॥ २१५ ॥ इति ।

अत एवाभेददृष्टिवचनं समभक्तज्ञान्यादिपरमेव । यथा श्रीमार्कण्डेयोपाख्याने द्वादश एव श्रीशिववाक्यम् (भा० १२।१०।२०–२२) —

ब्राह्मणाः साधवः शान्ता निःसङ्गा भूतवत्सलाः ।
एकान्तभक्ता अस्मासु निर्वैराः समदर्शिनः ॥ २१६ ॥
सलोका लोकपालास्तान् वन्दन्त्यर्चन्त्युपासते ।
अहं च भगवान् ब्रह्मा स्वयं च हरिरीश्वरः ॥ २१७ ॥
न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते ।
नात्मनश्च परस्यापि तद् युष्मान् वयमीमहि ॥ २१८ ॥ इति ।

तत् ततोऽपि तानतिक्रम्य युष्मान् मार्कण्डेयादीन् शुद्धवैष्णवान् वयमीमहि भजेम इत्य-र्थः ।
यदुक्तं श्रीशिवेनैव प्रचेतसः प्रति (भा० ४।२४।३०) —

अथ भागवता यूयं प्रियाः स्थ भगवान् यथा ।
न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥ २१९ ॥ इति ।

अन्यत्र च "प्रीते हरौ भगवति प्रीयेऽहं सचराचरः" (भा० ८।७।४०) इति च ।
तस्य मार्कण्डेयस्य शुद्धवैष्णवत्वं चोक्तमेतत्पूर्वम् (भा० १२।१०।६) —

नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ।
भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये ॥ २२० ॥ इति ।

मार्कण्डेयमुद्दिश्य श्रीशिवेन । तथा श्रीशिवस्य तच्चेतस्याविर्भावात् समाधिविरामेण च तदेव व्यञ्जितम् । यथा “किमिदं कुत एवेति समाधेर्विरतो मुनिः” (भा० १२।१०।१३) इति ।
किं च “ब्राह्मणाः साधवः” (भा० १२।१०।२०) इत्यादावभेददृष्टिवचनेऽपि “स्वयं च हरिरीश्वरः” (भा० १२।१०।२१) इत्यनेन तस्यैव प्राधान्यमुक्तम् । तस्यैव स्वयमीश्वरत्वम् चोक्तम् “पार्थिवाद् दारुणः” (भा० १।२।२४) इत्यादिना ।
ब्रह्मपुराणे श्रीशिववाक्यमपि तथैव—

यो हि मां द्रष्टुमिच्छेत ब्रह्माणं वा पितामहम् ।
द्रष्टव्यस्तेन भगवान् वासुदेवः प्रतापवान् ॥ २२१ ॥ इति ।

तद्विज्ञानेन सर्वविज्ञानादिति भावः । अत एवमप्युक्तं सार्वभौमैः श्रीचिन्तामणिदीक्षितैः—

वनमालिनि यादृशाशयो मम तादृङ् न कपालमालिनि ।
असिते मुदिरे यथा शिखी मुदमभ्येति तथा न पाण्डुरे ॥ २२२ ॥
देव्यस्तटिन्यस्त्रिदशास्तडागा विश्वेश्वरोऽयं सरितामधीशः ।
तृष्णाहरः कोऽपि न कृष्णमेघं विहाय चिन्तामणिचातकस्य ॥ २२३ ॥ इत्यादि ।

तदेवं वैष्णवत्वेनैव शिवभजनं युक्तम् ।
केचित् तु वैष्णवास्तत्पूजनमावश्यकत्वेनोपस्थितं चेत् तर्हि तस्मिन्नधिष्ठाने श्रीभगवन्तमेव पूजयन्ति । यथा श्रीविष्णुधर्मोत्तरान्तिमोऽयमितिहासः—
विष्वक्सेननामा कश्चिद् विप्र एकान्तिभागवतः पृथिवीं विचरन्नासीत् । स कदाचिदेक एव वनान्त उपविष्टः । तत्राथ ग्रामाध्यक्षसुतः कश्चिदागतस्तमुवाच “कोऽसि ?” इति । ततः कृतस्वाख्यानं पुनस्तमुवाच “मम शिरः पीडाद्य जातेति निजेष्टं देवं शिवं पूजयितुं न शक्नोमीत्यतो मम प्रतिनिधित्वेन त्वमेव तं पूजय” इति ।
एतदनन्तरं च तत्रत्यं सार्धं पद्यम्—

एतदुक्तः प्रत्युवाच वयमेकान्तिनः श्रुताः ॥ २२४ ॥
चतुरात्मा हरिः पूज्यः प्रादुर्भावगतोऽथवा ।
पूजयामश्च नैवान्य तस्मात् त्वं गच्छ माचिरम् ॥ २२५ ॥

ततस्तस्मिंस्तदनङ्गीकृतवति स खड्गमुन्नमितवान् शिरश्छेत्तुम् । ततश्चासौ विप्रः स्तब्धस्तेन मृत्युमनभीप्सन् विचार्योक्तवान् “भद्रं तत्रैव गच्छामः” इति ।
गत्वा चेदं मनसि चिन्तितम् “अयं रुद्रः प्रलयहेतुतया तमोवर्धनत्वात् तमोभावः । श्रीनृसिंहदेवश्च तामसदैत्यगणविदारकतया तमोभञ्जनकर्तृत्वात् तद्भञ्जनार्थमेव तत्रोदयेत सूर्य इव तमोराशेः । अतो रुद्राकाराधिष्ठानेऽपि तदुपासकानामेषां तमोभञ्जनकृते श्रीनृसिंहपूजामेवास्मिन् करिष्यामि” इति ।

अथ "श्रीनृसिंहाय नमः" इति गृहीतपुष्पाञ्जलौ तस्मिन् पुनः क्रोधाविष्टेन ग्रामाध्यक्षपुत्रेण खड्गः समुद्यमितः । ततश्चाकस्मात् तदेव लिङ्गं स्फोटयित्वा श्रीनृसिंहदेवः स्वयमाविर्भूय तं ग्रामाध्यक्षपुत्रं सपरिकरं जघान । दक्षिणस्यां दिश्यतिप्रसिद्धो लिङ्गस्फोटनामा तत्र स्वयं स्थितवानिति ।
अतोऽनन्यभक्ताः श्रीशिवमपि वैष्णवत्वेनैव मानयन्ति ।
केचित् कदाचित् तदधिष्ठानत्वेनैव वा । अत एवोक्तमादिवाराहे —

जन्मान्तरसहस्रेषु समाराध्य वृषध्वजम् ।
वैष्णवत्वं लभेद् धीमान् सर्वपापक्षये सति ॥ २२६ ॥ इति ।

अत एव श्रीनृसिंहशिवभक्त्योरन्तरं बृहदेव श्रीनृसिंहतापन्यां श्रुतौ "अनुपनीतशतमेकमेकेनोपनीतेन तत्समम् । उपनीतशतमेकमेकेन गृहस्थेन तत्समम् । गृहस्थशतमेकमेकेन वानप्रस्थेन तत्समम् । वानप्रस्थशतमेकमेकेन यतिना तत्समम् । यतीनां तु शतं पूर्णमेकेन रुद्रजापकेन तत्समम् । रुद्रजापकशतमेकमेकेनाथर्वाङ्गीरसशिखाध्यापकेन तत्समम् । अथर्वाङ्गीरसशिखाध्यापकशतमेकमेकेन मन्त्रराजाध्यापकेन तत्समम्" (नृ० ता० ५।१०) इति ।
मन्त्रराजश्च तत्र श्रीनृसिंहमन्त्र एवेति । स्वतन्त्रत्वेन भजने तु भृगुशापो दुरत्ययः । यथा चतुर्थे (भा० ४।२।२७-२८) —

तस्यैवं वदतः शापं श्रुत्वा द्विजकुलाय वै ।
भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययम् ॥ २२७ ॥
भवव्रतधरा ये च ये च तान् समनुव्रताः ।
पाषण्डिनस्ते भवन्तु सच्छास्त्रपरिपन्थिनः ॥ २२८ ॥ इत्यादि ।

वेदविहितमेवात्र भवव्रतमनूद्यते । अन्यविहितत्वे पाषण्डित्वविधानायोगः स्यात् । पूर्वत एव पाषण्डित्वसिद्धेः । अथ तत्परिपन्थकानां श्रीभागवतादीनां सच्छास्त्रत्वमायातम् । तत्पुरस्कृतानां सूतसंहितानामसच्छास्त्रत्वं स्पष्टमेव । तस्मात् स्वतन्त्रत्वेनैवोपासनायामयं दोषः । यतश्च तत्रैव तेन श्रीजनार्दनस्यैव वेदमूलत्वमुक्तम् (भा० ४।२।३१) —

एष एव हि लोकानां शिवः पन्थाः सनातनः ।
यं पूर्वे चानुसन्तस्थुर्यत्प्रमाणं जनार्दनः ॥ २२९ ॥ इति ।

एष वेदलक्षणो यत्प्रमाणं यत्र मूलमित्यर्थः । अत एवान्वयेनापि श्रीविष्णुभक्तिर्दृढीकृता "सत्त्वं रजस्तमः" (भा० १।२।२३) इत्यादिना ।
तथा श्रीहरिवंशे शिववाक्यम् (हरिवंशे ३।८९।८) —

हरिरेव सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः ।
विष्णुमन्त्रं सदा विप्राः पठध्वं ध्यात केशवम् ॥ २३० ॥ इति ।

तस्मात् श्रीशिवभक्तेरप्येवम्भूतत्वे स्थिते परासामपि देवतानां वैष्णवागमादौ तद्बहिरङ्गा-वरणसेवकत्वेनाप्राकृतानामेव पूजाविधानम् । श्रीभगवद्वल्लोकसङ्ग्रहपराणां तल्लीलौ-पायिकनरलीलापार्षदानां वा भगवत्प्रीणनयज्ञादौ तु श्रीयुधिष्ठिरराजसूयवदन्यासामपि तद्विभूतित्वेनैवेति ज्ञेयम् । यथानुष्ठितं श्रीप्रह्लादेन (भा० ७।१०।३२) —

ततः सम्पूज्य शिरसा ववन्दे परमेष्ठिनम् ।
भवं प्रजापतीन् देवान् प्रह्लादो भगवत्कलाः ॥ २३१ ॥ इति ।

तदुक्तं श्रीयुधिष्ठिरेणैव (भा० १०।७२।३) —

क्रतुराजेन गोविन्द राजसूयेन पावनीः ।
यक्ष्ये विभूतीर्भवतस्तत् सम्पादय नः प्रभो ॥ २३२ ॥ इति ।

विभूतित्वेनैवेत्थमुक्तम् ।
पाद्मे कार्तिकमाहात्म्ये श्रीसत्यभामां प्रति श्रीभगवता —

सौराश्च शैवा गाणेशा वैष्णवाः शक्तिपूजकाः ।
मामेव प्राप्नुवन्तीह वर्षापः सागरं यथा ॥ २३३ ॥
एकोऽहं पञ्चधा जातः क्रीडया नामभिः किल ।
देवदत्तो यथा कश्चित् पुत्रादिजननामभिः ॥ २३४ ॥ इति ।

वस्तुतस्तु सर्वापेक्षया श्रीवैष्णवा एव श्रेष्ठाः । तदुक्तं स्कान्दे ब्रह्मनारदसंवादे तथैवान्यत्र प्रह्लादसंहितायामेकादशीजागरणप्रसङ्गे च —

न सौरो न च शैवो वा न ब्राह्मो न च शाक्तिकः ।
न चान्यदेवताभक्तो भवेद् भागवतोपमः ॥ २३५ ॥ इति ।

तादृशसौरादीनां तत्प्राप्तिश्च न केवलं तद्धेतुकैव किन्तु भगवत्प्रीत्यर्थकृततज्जातशुद्धभ-क्तिद्वारा वा श्रीविष्णुक्षेत्रमरणादिप्रभावेण वा । यथा तत्रैव वर्णितयोर्देवशर्मचन्द्रशर्मना-म्नोः सूर्यमाराधयतोः । तदुक्तं तत्रैव श्रीभगवता —

तत्क्षेत्रस्य प्रभावेण धर्मशीलतया पुनः ।
वैकुण्ठभवनं नीतौ मत्परौ मत्समीपगैः ॥ २३६ ॥
यावज् जीवन्तु यत् ताभ्यां सूर्यपूजादिकं कृतम् ।
तेनाहं कर्मणा ताभ्यां सुप्रीतो ह्यभावं किल ॥ २३७ ॥ इति ।

तत्क्षेत्रं मायापुरी । तौ च श्रीकृष्णावतारे सत्राजिदक्रूराख्यौ जाताविति च तत्र प्रसिद्धिः । एवं पुण्डरीकस्यापि पितृसेवया तत्प्राप्तिश्च योजनीया ।
स्वतन्त्रोपासनायां तत्प्राप्तिः श्रीगीतोपनिषत्स्वेव निषिद्धा (गीता ९।२३-२५) —

> येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
> तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३८ ॥
> अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
> न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २३९ ॥
> यान्ति देवव्रता देवान् पितृन् यान्ति पितृव्रताः ।
> भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ २४० ॥ इति ।

तस्मात् तदीयत्वेनोपासनायां कश्चिद् गुणोऽपि भवति ।
अवज्ञादौ तु दोषः "श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि" (भा० ११।३।२६) इतिवत् ।
यथा पाद्मे —

> हरिरेव सदाराध्यः सर्वदेवेश्वरेश्वरः ।
> इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कदाचन ॥ २४१ ॥ इति ।

गौतमीये च —

> गोपालं पूजयेद् यस्तु निन्दयेदन्यदेवताम् ।
> अस्तु तावत् परो धर्मः पूर्वधर्मोऽपि नश्यति ॥ २४२ ॥ इति ।

अत एव "हयशीर्षा मां पथि देवहेलनात्" (भा० ६।८।१७) इति श्रीनारायणवर्मणि तदागः प्रायश्चित्तम् ।
विष्णुधर्मे चायमितिहासः — पूर्वं श्रीमदम्बरीषो बहुदिनं भगवदाराधनं तपोऽनुष्ठितवान् । तदन्ते च भगवानेवेन्द्ररूपेणैरावतीकृतं गरुडमारुह्य तं वरेण छन्दयामास । स चेन्द्ररूपं दृष्ट्वा तं नमस्कारादिभिरादृत्यापि तस्माद् वरं नेष्टवान् ।
उक्तवांश्च "ममाराध्याकारो यः स एव मम वरदाता भवेन् नान्यः" इति । "अथ तद्देयं वरमहमेव दास्यामि" इति पुनरुक्तवत्यपीन्द्रे तं नेष्टवन्तं तं प्रति स वज्रं समुद्यतवान् । तथापि तं वरं नाङ्गीकृतवति तस्मिन् सुप्रसन्नो भूत्वा तद्रूपमन्तर्धाप्य स्वरूपमाविर्भावयन्ननुजग्राहेति ।
तत्र च शिवावज्ञादौ महानेव दोषः । यथा चतुर्थ एव नन्दीश्वरशापः "संसरन्त्विह ये चामुमनु शर्वावमानिनम्" (भा० ४।२।२४) इति ।
इदमपि यत् किञ्चिदेव — श्रीशिवस्य महाभागवतत्वेन दोषस्य स्वयमेव सिद्धत्वात् । "हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतम्" (भा० ४।११।३३) इति स्वायम्भुवोक्तरीत्या नूनं

तत्सख्यमनुस्मृत्यैव कुबेरादपि श्रीध्रुवेण भगवद्भक्तिस्वभावकृतसर्वविषयकविनयपुनःपुनर्भक्त्यभिलाषाभ्यां युक्तेन सता कृतं भगवद्भक्तिवरप्रार्थनमिति चतुर्थाभिप्रायः।
अत एवोक्तम् (कौर्मे) —

यो मां समर्चयेन् नित्यमेकान्तं भावमाश्रितः।
विनिन्दन् देवमीशानं स याति नरकं ध्रुवम् ॥ २४३ ॥ इति।

दृष्टं च तथा चित्रकेतुचरिते।
श्रीकपिलदेवेन साधारणानामपि प्राणिनामवमानादिकं निन्दितं किमुत तद्विधानाम्।
तथा हि (भा० ३।२९।२१) —

अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा।
तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडम्बनम् ॥ २४४ ॥

भूतेषु वक्ष्यमाणरीत्या अप्राणभृज्जीवमारभ्य भगवदर्पितात्मजीवपर्यन्तेषु। भूतात्मा तदन्तर्यामी। तं मामवज्ञाय तेषामवज्ञया तदधिष्ठानकस्य ममैवावज्ञां कृत्वेत्यर्थः। ततस्तां कृत्वा योऽर्चां मत्प्रतिमां कुरुते स तद्विडम्बनं तस्या अवज्ञामेव कुरुत इत्यर्थः।
यतः (भा० ३।२९।२२) —

यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्।
हित्वार्चां भजते मौढ्याद् भस्मन्येव जुहोति सः ॥ २४५ ॥

मौढ्यात् शैली दारुमयी वा काचित् प्रतिमेयमिति मूढबुद्धित्वाद् यः सर्वेषु भूतेषु वर्तमानं परमात्मानमीश्वरं मां हित्वा तस्या मयैक्यं अविभाव्य अर्चां मदीयां प्रतिमां भजते केवललोकरीतिदृष्ट्या तस्यै जलादिकमर्पयति।
यथाग्निपुराणे दशरथमारितपुत्रस्य तपस्विनो विलापे —

शिलाबुद्धिः कृता किं वा प्रतिमायां हरेर्मया।
किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित् ॥ २४६ ॥
तन्मुद्राङ्कितदेहस्य चेतसा नादरः कृतः।
येन कर्मविपाकेन पुत्रशोको ममेदृशः ॥ २४७ ॥ इति।

यथा चोक्तं पाद्मे —

अर्च्ये विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्
विष्णोर्वा वैष्णवानां कलिमलमथने पादतीर्थेऽम्बुबुद्धिः।
शुद्धे तन्नाम्नि मन्त्रे सकलकलुषहे शब्दसामान्यबुद्धिर्
विष्णौ सर्वेश्वरेशे तदितरसमधीर्यस्य वै नारकी सः ॥ २४८ ॥

तस्य च मूढस्य मद्दृष्ट्यभावात् सर्वभूतावज्ञापि भवति । ततस्तद्दोषेण भस्मनि यथा जुहोति कश्चित् तथा तस्याश्रद्दधानस्य फलाभाव इत्यर्थः । "ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः" (गीता १७।१) इत्याद्युक्तरीत्या लोकपरम्परामात्रजाते यत्किञ्चिच्छ्रद्धासद्भावे तु कनिष्ठभागवतत्वमेव (भा० ११।२।४७) —

अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ २४९ ॥

इत्युक्तेः । यद्यपि यथाकथञ्चिद् भजनस्यैवावश्यं फलावसानतास्त्येव तथापि झटिति न भवतीत्येव । तथोक्तं वक्ष्यते च साफल्यम् "अर्चादावर्चयेत् तावत्" (भा० ३।२९।२५) इत्यादिना ।
अवज्ञामात्रस्य तादृशत्वे सुतरां तु (भा० ३।२९।२३) —

द्विषतः परकाये मां मानिनो भिन्नदर्शिनः ।
भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति ॥ २५० ॥

भिन्नदर्शिनः सर्वत्रान्तर्याम्येकत्वदृष्टिरहितस्य सर्वतोऽत्यन्तमेव विलक्षणः श्रीमान् व्रजसार्वभौमनन्दनस्तं न पश्यत्यभिन्नदर्शी तस्येत्यर्थः । अत एव मानिन अत एव बद्धवैरस्य च । तथा च महाभारते —

पितेव पुत्रं करुणो नोद्वेजयति यो जनम् ।
विशुद्धस्य हृषीकेशस्तस्य तूर्णं प्रसीदति ॥ २५१ ॥ इति ।

किं च (भा० ३।२९।२४) —

अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे ।
नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥ २५२ ॥

अवमानिनो निन्दाकर्तुः । निन्दापि द्वेषसमा । किं वा (भा० ११।२३।३) —

न तथा तप्यते विद्धः पुमान् बाणैर्हि मर्मगैः ।
यथा तुदन्ति मर्मस्था ह्यसतां परुषेषवः ॥ २५३ ॥

इत्याद्युक्तरीत्या ततोऽधिका इति । नायं व्युत्क्रम इत्यभिप्रेत्य न द्वेषात् पूर्वमसौ पठिता । तदेवं ईश्वरज्ञानाभावाद् भक्तावश्रद्दधानस्य दोष उक्तः । अथ तच्छ्रद्धाहेतुतज्ज्ञानस्य स्वधर्मसंयुक्तं तदर्चनमेव कारणमुपदिशंस्तादृशार्चनस्याप्यव्यर्थतामङ्गीकरोति (भा० ३।२९।२५) —

अर्चादावर्चयेत् तावदीश्वरं मां स्वकर्मकृत् ।
यावन् न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥ २५४ ॥

तावदेव स्वकर्मकृत् सन्नर्चादावर्चयेद् यावत् सर्वभूतेष्ववस्थितमीश्वरं मां न वेद न जानाति । अत्र स्वकर्मसहायत्वमजातश्रद्धस्य शुद्धभक्तावनधिकारात् । तत् प्रतिपादयिष्यते "जातश्रद्धो मत्कथासु" (भा० ११।२०।२७) इत्यादिना ।
अतो भगवज्ज्ञानादूर्ध्वं जातश्रद्धस्तु स्वकर्मकृत् सन् नार्चयेत् किन्तु शुद्धमर्चादिकमेव कुर्वीतेत्यायातम् । तच्च प्रतिपादयिष्यते "तावत् कर्माणि कुर्वीत" (भा० ११।२०।९) इत्यादिना न त्वर्चां परित्यजेदित्यर्थः ।

प्रतिष्ठितार्चा न त्याज्या यावज्जीवं समर्चयेत् ।
वरं प्राणपरित्यागः शिरसो वापि कर्तनम् ॥ २५५ ॥

इति हयशीर्षपञ्चरात्रविरोधात् ।
अथ स्वधर्मपूर्वकमर्चनं कुर्वंश्च भूतदयां विना न सिद्ध्यतीत्याह (भा० ३।२९।२६) —

आत्मनश्च परस्यापि यः करोत्यन्तरोदरम् ।
तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम् ॥ २५६ ॥

अन्तरोदरमुदरभेदेन भेदं करोति न तु मदधिष्ठानत्वेनात्मसमं पश्यति । ततश्च क्षुधितादिकमपि दृष्ट्वा स्वोदरादिकमेव केवलं बिभर्तीत्यर्थः । तस्य भिन्नदृशो मृत्युरूपोऽहमुल्बणं भयं संसारम् ।
निगमयति (भा० ३।२९।२७) —

अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ।
अर्चयेद् दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा ॥ २५७ ॥

अथ अतो हेतोः । यथायुक्तं यथाशक्ति दानेन तदभावे मानेन च "अभिन्नेन चक्षुषा" इति पूर्ववत् ।
तथोक्तं सनकादीन् प्रति श्रीवैकुण्ठदेवेन "ये मे तनूर्द्विजवरान् दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्या" (भा० ३।१६।१०) इत्यादि ।
यद्वा भिन्नेन चक्षुषान्यत्र या दृष्टिस्ततोऽतिविलक्षणया दृष्ट्या सर्वोत्कृष्टदृष्ट्येत्यर्थः ।
तत्र सर्वेषां साधारण्येनैवार्हणे प्राप्ते विशेषयति (भा० ३।२९।२८–३३) —

जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ।
ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः ॥ २५८ ॥
तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ।

तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः ॥ २५९ ॥
रूपभेदविदस्तत्र ततश्चोभयतोदतः ।
तेषां बहुपदः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ॥ २६० ॥
ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ।
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ २६१ ॥
अर्थज्ञात् संशयच्छेत्ता ततः श्रेयान् स्वधर्मकृत् ।
मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः ॥ २६२ ॥
तस्मान् मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः ।
मय्यर्पितात्मनः पुंसो मयि सन्न्यस्तकर्मणः ।
न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥ २६३ ॥ इति ।

पूर्वपूर्वस्मादुत्तरोत्तरस्मिनेकैकगुणाधिक्येनाधिक्यम् । धर्ममदोग्धा निष्कामकर्मा । निरन्तरो ज्ञानाद्यव्यवहितभक्तिः । अकर्तुरर्पितात्मत्वेन स्वभरणादि कर्मानपेक्षमाणाद् यद् भगवति भक्तिः क्रियते तत्रापि स्वस्य भगवदधीनत्वं ज्ञात्वा तदभिमानशून्याच्च । समदर्शनाद् भगवदधिष्ठानतासाम्येनात्मवत् परेष्वपि हितमाशंसमानात् । "जीवाः श्रेष्ठा ह्यजीवानाम्" (भा० ३।२९।२८) इत्यादिना भेदो हि विवक्षितः । ततो मद्भक्तेष्वेवादरबाहुल्यादिकं कर्तव्यम् । अन्यत्र च यथाप्राप्तं यथाशक्ति चेति भावः ।
तथैवोक्तम् (भा० ३।२९।३४) —

मनसैतानि भूतानि प्रणमेद् बहु मानयन् ।
ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥ २६४ ॥ इति ।

जीवकलया तत्कलनया तदन्तर्यामितयेत्यर्थः । अत्र "समोऽहम्" (गीता ९।२९) इत्यादिगीतापद्यमपि स्मर्तव्यम् ।
तदेवं प्रथमोपासकानां सर्वभूतादरो विहितः । सश्रद्धसाधकानां तु भगवद्वैभवसार्वत्रिकतास्फूर्त्या भवत्येवासौ । यथोक्तं स्कान्दे —

एते न ह्यद्भुता व्याध तवाहिंसादयो गुणाः ।
हरिभक्तौ प्रवृत्ता ये न ते स्युः परतापिनः ॥ २६५ ॥

इति वक्ष्यमाणरीत्या शुद्धबन्धुत्वादिभावसाधकानामपि बन्धुभावसिद्धश्रीगोकुलवास्यादि शीलानुसरणेन तादृशभगवद्गुणानुसरणेन चासौ जायते । जातभावानां त्वहिंसा चोपरमश्च स्वीय एव स्वभावः । यथा (भा० १।१८।२२) —

यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु सङ्गमूढम् ।
व्रजन्ति तत् पारमहंस्यमन्त्यं यस्मिन्नहिंसोपरमः स्वधर्मः ॥ २६६ ॥

इत्यनुसारेण परमसिद्धानां च “सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः” (भा० ११।२।४५) इत्याद्यनुसारेण सिद्ध एव सः ।
तत्र साधकानां यत् तु “यथा तरोर्मूलनिषेचनेन” (भा० ४।३१।१४) इत्यादौ तदन्योपासनानां पुनरुक्तत्वमुपलभ्यते तत् पुनः केवलस्वतन्त्रतत्तद्दृष्टोपासनानामेव । अत्र तु तत्तदधिष्ठानकभगवदुपासनमेव विधीयते ।
तदादरावश्यकत्वं च तत्सम्बन्धेनैव सम्पद्यते । तच् चान्यत्र झटिति रागद्वेषनिवृत्त्यर्थमिति ज्ञेयम् । अत एव केवलभूतानुकम्पया श्रीभगवदर्चनं त्यक्तवतो भरतस्यान्तरायः ।
तस्माद् भूतदयैव भगवद्भक्तिर्मुख्या नार्चनमिति निरस्तम् ।
तथैव तदव्यवहितपूर्वं निर्गुणभक्त्युपायत्वेन “क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः” (भा० ३।२९।१५) इत्यत्र अतिशब्देन पाञ्चरात्रिकार्चनलक्षणक्रियायोगार्था पत्रपुष्पावचयादिलक्षणा किञ्चिद्धिंसापि विहिता ।
तस्मादन्येषामनादरो न कर्तव्यस्तत्सम्बन्धेनादरादिकं च कर्तव्यम् । स्वातन्त्र्येणोपासनं तु धिक्कृतमिति साध्वेवोक्तम् “अविस्मितं तं परिपूर्णकामम्” (भा० ६।९।२२) इत्यादि ॥ देवाः श्रीमदादिपुरुषम् ॥

१०७ । तथा (भा० १०।४८।२६) —

> कः पण्डितस्त्वदपरं शरणं समीयाद् भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
> सर्वान् ददाति सुहृदो भजतोऽभिकामानात्मनमप्युपचयापचयौ न यस्य ॥ २६७ ॥

सुहृदो हितकारिस्वभावात् तत्रापि कृतज्ञादुपकाराभासेऽपि बहुमन्वानाद् यो भजतो भजमानाय सर्वान् कामानभीष्टानभि सर्वतोभावेन ददाति । तत्रापि सुहृदः सुहृदे सप्रीतये त्वात्मानमपि ददाति । न च सर्वतोभावेन दाने तादृशेभ्यो बहुभ्यो दाने वा समावेशाभावः स्यादित्याह — उपचयेति ॥ अक्रूरः श्रीभगवन्तम् ॥

१०८ । तदभक्तमात्रानादरेणाह (भा० ३।१५।२४) —

> येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र ।
> नाराधनं भगवतो वितरन्त्यमुष्य सम्मोहिता विततया बत मायया ते ॥ २६८ ॥

यत्र यस्यां भगवद्धर्मपर्यन्तो धर्मो भवति भगवत्पर्यन्तस्य तत्त्वस्य ज्ञानं च भवतीत्यर्थः । तां प्राप्ता अपि सर्वेषां धर्माणां ज्ञानानां च मूलं ये भगवत आराधनं न वितरन्ति न कुर्वन्ति ते सम्मोहिताः । तदुक्तम् “बिले बतोरुक्रमविक्रमान् ये” (भा० २।३।२०) इत्यादि ।
तथा च ब्रह्मवैवर्ते —

> प्राप्यापि दुर्लभतरं मानुष्यं विबुधेप्सितम् ।
> यैराश्रितो न गोविन्दस्तैरात्मा वञ्चितश्चिरम् ॥ २६९ ॥

अशीतिं चतुरश्चैव लक्षांस्तान् जीवजातिषु ।
भ्रमद्भिः पुरुषैः प्राप्य मानुष्यं जन्मपर्ययात् ॥ २७० ॥
तदप्यफलतां जातं तेषामात्माभिमानिनाम् ।
वराकानामनाश्रित्य गोविन्दचरणद्वयम् ॥ २७१ ॥ इति ।

श्रीब्रह्मा देवान् ॥

१०९ । तथा (भा० ५।१८।१२) —

यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥ २७२ ॥

अकिञ्चना निष्कामा । गुणैर्ज्ञानवैराग्यादिभिः सह सर्वे शिवब्रह्मादयो देवाः सम्यगासते ॥ प्रह्लादः श्रीनृसिंहम् ॥

११० । अत एव तत्तन्मार्गसिद्धानां मुनीनामप्यनादरः (भा० ३।९।१०) —

अह्न्यापृतार्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः ।
दैवाहतार्थरचना मुनयोऽपि देव युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥ २७३ ॥

अह्नि व्यापृतेत्यादि युष्मद्भजनविमुखाः संसारिणो भवन्ति । किं बहुना ? तत्तन्मार्गसिद्धा मुनयोऽपि युष्मत्प्रसङ्गविमुखाश्चेदिह जगति तद्वदेव संसरन्ति । अथवा मुनयोऽपि तद्विमुखाश्चेत् तर्हि संसरन्त्येव । कथम्भूताः सन्तः संसरन्ति ? तत्राह — अह्न्यापृतेत्यादि "आरुह्य कृच्छ्रेण परं पदम्" (भा० १०।२।३२) इत्यादेः ।
अत उक्तं श्रीधर्मेण (भा० ६।३।१९-२२) —

धर्मं तु साक्षाद् भगवत्प्रणीतं न वै विदुर् ऋषयो नापि देवाः ।
न सिद्धमुख्या असुरा मनुष्याः कुतो नु विद्याधरचारणादयः ॥ २७४ ॥
स्वयम्भूर्नारदः शम्भुः कुमारः कपिलो मनुः ।
प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ २७५ ॥
द्वादशैते विजानीमो धर्मं भागवतं भटाः ।
गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते ॥ २७६ ॥
एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः ।
भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ २७७ ॥ इति ।

एते धर्मप्रवर्तका विजानीम एव न तु स्वस्मृत्यादिषु प्रायेणोपदिशाम इत्यर्थः । यतो गुह्यमप्रकाश्यं दुर्बोधमन्यैस्तथा ग्रहीतुमशक्यं च । गुह्यत्वे हेतुः — यं ज्ञात्वेति । अमृतं परमं फलम् ।
भ० र० सि० १।१।३८ —

ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः ।
नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥ २७८ ॥

इत्यादौ सूचितं परमत्वम् ।
"विक्रीडितं व्रजवधूभिरिदं च विष्णोः" (भा० १०।३३।४०) इत्यादौ । "भक्तिं पराम्" इत्यादिनोक्तम् ।
"कृष्णाधरामृतास्वादसिद्धिरत्र" इत्यादौ किञ्चिद् विशदितमश्नुते ।
अत एव वक्ष्यते "प्रायेण वेद तदिदं न महाजनोऽयम्" (भा० ६।३।२५) इत्यादि । महाजनो द्वादशभ्यस्तदनुगृहीतसम्प्रदायिभ्यश्चान्यो महागुणयुक्तोऽपीत्यर्थः । तस्मात् साधूक्तम् "अहृन्यापृतार्त" इत्यादि ॥ ब्रह्मा श्रीगर्भोदकशायिनम् ॥

१११ । तदेवं श्रीभगवदुक्तेरेव सर्वोर्ध्वमभिधेयत्वं स्थितम् । तथा च श्रीगीतासु (गीता ६।४६-४७) —

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन ॥ २७९ ॥
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ २८० ॥ इति ।

अत्र "योगिनामपि सर्वेषाम्" इति च पञ्चम्यर्थ एव षष्ठी । "तपस्विभ्यः" इत्यादिना तथैवोपक्रमात् । भजतः सर्वाधिक्यमेव विवक्षितं च । सर्वशब्दोऽत्र "दैवमेवापरे यज्ञं योगिनः पर्युपासते" (गीता ४।२५) इत्यादिना पूर्वपूर्वोक्तान् सर्वानुपायिनो गृह्णातीति ज्ञेयम् ।
तदेवमभक्तनिन्दाश्रवणात् श्रीमद्भगवद्भक्तेः सर्वेषु नित्यत्वमपि सिद्धम् । उक्तं च श्रीभगवतोद्धवं प्रति "भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसः" (भा० ११।१८।४२) इत्यादौ "सर्वेषां मदुपासनम्" (भा० ११।१८।४३) इति । तथा श्रीनारदेन च सार्ववर्णिकस्वधर्मकथने "श्रवणं कीर्तनं चास्य" (भा० ७।११।११) इत्यादि । अकरणे दोषश्रवणं चान्यत्र "मुखबाहूरुपादेभ्यः" (भा० ११।५।२) इत्यादि ।
तथा च महाभारते —

मातृवत् परिरक्षन्तं सृष्टिसंहारकारकम् ।
यो नार्चयति देवेशं तं विद्याद् ब्रह्मघातकम् ॥ २८१ ॥ इत्यादि ।

श्रीगीतोपनिषत्सु च (गीता ७।१५) —

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ २८२ ॥ इति ।

आग्नेये विष्णुधर्मे च —

> द्विविधो भूतसर्गोऽयं दैव आसुर एव च ।
> विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥ २८३ ॥

अन्यदप्युदाहृतम् "विप्राद् द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखात्" (भा० ७।९।१०) इति ।
"श्वपचोऽपि महीपाल" (नारदीये) इत्यादि ।
तथा गारुडे —

> अन्तं गतोऽपि वेदानां सर्वशास्त्रार्थवेद्यपि ।
> यो न सर्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ॥ २८४ ॥

बृहन्नारदीये च —

> हरिपूजाविहीनाश्च वेदविद्वेषिणस्तथा ।
> द्विजगोद्वेषिणश्चापि राक्षसाः परिकीर्तिताः ॥ २८५ ॥

अपरं च (भा० १०।२।३२) —

> येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।
> आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ॥ २८६ ॥ इति ।

प्रथमतस्तावत् त्वय्यस्तभावादविद्यमानभक्तित्वादविशुद्धबुद्धयः (भा० ११।१४।२२) —

> धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ।
> मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि ॥ २८७ ॥

इत्याद्युक्तेः । तथापि ज्ञानमार्गमाश्रित्य विमुक्तमानिनो देहद्वयातिरिक्तत्वेनात्मानं भावयन्तः । ततः "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" (गीता १२।५) इत्याद्युक्तेः कृच्छ्रेण परं पदं जीवन्मुक्तिरूपमारुह्य प्राप्यापि ततोऽधः पतन्ति भ्रश्यन्ति ।
कदेत्यपेक्षायामाहुः "अनादृत" इति । यदीति शेषः । तेषां भक्तिप्रभावस्याननुवृत्तेरबुद्धिपूर्वकस्य त्वदनादरस्य निवर्तकाभावात् । तथापि दग्धानामपि पापकर्मणां महाशक्तिश्रीभगवत्पादपद्मावज्ञया पुनर्विरोधात् ।
तथा च वासनाभाष्योत्थापितं भगवत्परिशिष्टवचनम् —

> जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्मभिः ।
> यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः ॥ २८८ ॥

अत एव तत्रैव —

जीवन्मुक्ताः प्रपद्यन्ते क्वचित् संसारवासनाम् ।
योगिनो वै न लिप्यन्ते कर्मभिर्भगवत्पराः ॥ २८९ ॥

तथा रथयात्राप्रसङ्गे विष्णुभक्तिचन्द्रोदयादिधृतं पुराणान्तरवचनम् —

नानुव्रजति यो मोहाद् व्रजन्तं परमेश्वरम् ।
ज्ञानाग्निदग्धकर्मापि स भवेद् ब्रह्मराक्षसः ॥ २९० ॥

एवमेवोक्तम् "योऽनादृतो नरकभाग्भिरसत्प्रसङ्गैः" (भा० ३।९।४) इति ।
अत एवोपदिष्टम् (भा० ११।१९।५) —

तस्माज् ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ।
ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः ॥ २९१ ॥ इति ।

तस्मात् सुतरामेव सर्वेषां श्रीहरिभक्तिर्नित्येत्यायातम् ॥ देवाः श्रीभगवन्तम् ॥

११२ । प्रेमकृतकर्माशयनिर्धूननानन्तरमपि भक्तिः श्रूयते (भा० ११।१४।२५) —

यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपम् ।
आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो माम् ॥ २९२ ॥

तथैवात्मा जीवो मत्प्रेम्णा कर्माशयं विधूय ततः शुद्धस्वरूपं च प्राप्य मां भजतीत्यर्थः । तदुक्तम् "मुक्ता अपि लीलया विग्रहं कृत्वा भगवन्तं भजन्ते" (भा० दी० १०।८७।२१ श्री-स्वामिटीकाधृतश्रीसर्वज्ञमुनिवाक्ये) इति ॥ श्रीभगवान् ॥

११३ । एवमप्युक्तं स्कान्दे रेवाखण्डे —

इन्द्रो महेश्वरो ब्रह्मा परं ब्रह्म तदैव हि ।
श्वपचोऽपि भवत्येव यदा तुष्टोऽसि केशव ॥ २९३ ॥
श्वपचादपकृष्टत्वं ब्रह्मेशानादयः सुराः ।
तदैवाच्युत यान्त्येते यदैव त्वं पराङ्मुखः ॥ २९४ ॥ इति ।

तथैवाह "यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्" (भा० ३।२८।२२) इति ।
स्पष्टम् ।

तस्माद् भक्तेर्महानित्यत्वेनाप्यभिधेयत्वमायातम् । अग्रे "स्वकृतपुरेषु" (भा० १०।८७।२०) इत्यादौ जीवानां स्वभावसिद्धा सैवेति व्याख्येयम् ॥ श्रीकपिलदेवः ॥

११४ । तदेवमवान्तरतात्पर्येण भक्तेरेवाभिधेयत्वं षड्विधैरपि लिङ्गैरवगम्यते । तत्रोपक्रमोपसंहारयोरेकत्वेन यथा "जन्माद्यस्य यतः" (भा० १।१।१) इत्यादावुपक्रमपद्ये "सत्यं परं धीमहि" इति ।
अत्र श्रीगीतासु "एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते" (गीता १२।१) इत्यादौ श्रीभगवत्येव ध्यानस्याकष्टार्थत्वेन तद्ध्यानिनो युक्ततमत्वेन चोक्तत्वात् "मत्तः परतरं नान्यत् किञ्चित्" (गीता ७।७) इत्यादौ "ब्रह्मणो हि प्रतिष्ठाहम्" (गीता १४।२७) इत्यादौ परत्वस्य श्रीभगवद्रूप एव पर्यवसानात् तस्यैव सर्वज्ञत्वसर्वशक्तित्वाभ्यां जगज्जन्मादिहेतुत्वात् तत्र श्रीभगवत्येव ध्यानमभिधीयते । तथैव हि तत् पद्यं परमात्मसन्दर्भे (अनु० १०४) विवृतमस्ति ।
"कस्मै येन विभाषितोऽयमतुलो ज्ञानप्रदीपः पुरा" (भा० १२।१३।१९) इत्यादावुपसंहारपद्येऽपि "सत्यं परं धीमहि" इति । अत एव स्पष्टमेवास्य श्रीभगवत्त्वं श्रीभागवतवक्तृत्वात् । पूर्वं च "तेने ब्रह्म हृदा य आदिकवये" (भा० १।१।१) इत्युक्तम् ।
अभ्यासेनोदाहरणं पूर्वं दर्शितमदर्शितं चानेकविधमेव ।
अपूर्वतया फलेन च दर्शितं श्रीव्याससमाधौ "अनर्थोपशमं साक्षात्" (भा० १।७।६) इत्यादि ।
प्रशंसालक्षणेनार्थवादेन चाभ्यासवद् बहुविधमेव तत्र तत्रास्ति ।
उपपत्त्या च "भयं द्वितीयाभिनिवेशतः स्यात्" (भा० ११।२।३७) इत्याद्यनेकमिति ।
अत्र गतिसामान्ये च "इदं हि पुंसस्तपसः श्रुतस्य वा" (भा० १।५।२२) इत्यादि ।
तथाह "मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः" (भा० ३।५।१२) इत्यादि । स्पष्टम् ॥ श्रीविदुरः ॥

११५ । इयमेव भक्तिः "धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्" (भा० १।१।२) इत्यत्रोक्ता । "अत्र सर्गो विसर्गश्च" (भा० २।१०।१) इत्यादौ दशलक्षण्यामपि "सद्धर्मः" (भा० २।१०।४) इत्येकलक्षणत्वेनोक्ता ।
तस्या अभिधेयत्वं श्रीभागवतबीजरूपायां चतुःश्लोक्यामप्युदाहृतम् (भा० २।९।३५) —

> एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
> अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा ॥ २९५ ॥ इत्यादि ।

पूर्वं हि ज्ञानविज्ञानरहस्यतदङ्गानि वक्तव्यत्वेन चत्वार्येव प्रतिज्ञातानि । तत्र चतुःश्लोक्याः प्राक्तनास्त्रयोऽर्था अपि भगवत्सन्दर्भे (अनु० ९६) क्रमेणैव प्राक्तनश्लोकत्रये व्याख्याताः । रहस्यशब्देन तत्र प्रेमभक्तिः । तदङ्गशब्देन साधनभक्तिरुच्यते । टीका च "रहस्यं भक्तिस्तदङ्गं साधनम्" इत्येषा ।
ततः क्रमप्राप्तत्वेन (भा० ११।१४।३) —

कालेन नष्टा प्रलये वाणीयं वेदसञ्ज्ञिता ।
मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ २९६ ॥

इति भगवद्वाक्यानुसारेण च चतुर्थेऽस्मिन् पद्ये साधनभक्तिरेव व्याख्याता । अत्र च पुनर्व्याख्याविवरणायोत्थाप्यते । तथा हि — आत्मनो मम भगवतः । तत्त्वजिज्ञासुना प्रेमरूपं रहस्यमनुभवितुमिच्छुना । एतावन्मात्रमेव जिज्ञासितव्यं श्रीगुरुचरणेभ्यः शिक्षणीयम् । किं तत् ? यदेकमेव अन्वयेन विधिमुखेन व्यतिरेकेण निषेधमुखेन च स्यादुपपद्यते ।
तत्रान्वयेन यथा "एतावानेव लोकेऽस्मिन्" (भा० ७।७।५५) इत्यादि ।
"मन्मना भव मद्भक्तः" (गीता ९।३४) इत्यादि च ।
व्यतिरेकेण यथा (भा० ११।५।२–३) —

मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ।
चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ २९७ ॥
य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् ।
न भजन्त्यवजानन्ति स्थानाद् भ्रष्टाः पतन्त्यधः ॥ २९८ ॥

"न मां दुष्कृतिनो मूढाः" (गीता ७।१५) इत्यादि ।

यावज् जनो भजति नो भुवि विष्णुभक्तिवार्तासुधारसमशेषरसैकसारम् ।
तावज् जरामरणजन्मशताभिघातदुःखानि तानि लभते बहुदेहजानि ॥ २९९ ॥

इति पद्मपुराणे च ।
कुत्र कुत्रोपपद्यते ? सर्वत्र शास्त्रकर्तृदेशकरणद्रव्यक्रियाकार्यफलेषु समस्तेष्वेव ।
(१) तत्र समस्तशास्त्रेषु यथा स्कान्दे ब्रह्मनारदसंवादे —

संसारेऽस्मिन् महाघोरे जन्ममृत्युसमाकुले ।
पूजनं वासुदेवस्य तारकं वादिभिः स्मृतम् ॥ ३०० ॥

तत्राप्यन्वयेन यथा "भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया" (भा० २।२।३४) इत्यादि ।
तथा स्कान्दे पाद्मे च —

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेव सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ३०१ ॥

व्यतिरेकेण यथा गारुडे "अन्तं गतोऽपि वेदानाम्" इत्यादिकं सर्वत्रावगन्तव्यम् । तच् चान्ते दर्शयिष्यते ।
( २ ) सर्वकर्तृषु यथा (भा० २।७।४६) —

ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ।
यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ३०२ ॥
इति ।

गारुडे च —

कीटपक्षिमृगाणां च हरौ सन्न्यस्तचेतसाम् ।
ऊर्द्ध्वामेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम् ॥ ३०३ ॥

अत्रैव साचारे दुराचारे ज्ञानिन्यज्ञानिनि विरक्ते रागिणि मुमुक्षौ मुक्ते भक्त्यसिद्धे भक्ति-सिद्धे तस्मिन् भगवत्पार्षदतां प्राप्ते तस्मिन् नित्यपार्षदे च सामान्येन दर्शनादपि सार्व-त्रिकता ।
तत्र ( क ) साचारे दुराचारे च यथा (गीता ९।३०) —

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ॥ ३०४ ॥ इति ।

सदाचारस्तु किं वक्तव्य इत्यपेरर्थः ।
( ख ) ज्ञानिन्यज्ञानिनि च "ज्ञात्वाज्ञात्वाथ ये वै माम्" (भा० ११।११।३३) इत्यादि ।
"हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः" (ना० पु० १।११।१००) इत्यादि ।
( ग ) विरक्ते रागिणि च (भा० ११।१४।१८) —

बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः ।
प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ ३०५ ॥

अबाध्यमानस्तु सुतरां नाभिभूयत इत्यपेरर्थः ।
( घ ) मुमुक्षौ मुक्ते च "मुमुक्षवो घोररूपान्" (भा० १।२।२६) इत्यादि ।
"आत्मारामाश्च मुनयः" (भा० १।७।१०) इत्यादि च ।
( ङ ) भक्त्यसिद्धे भक्तिसिद्धे च (भा० ६।१।१५) —

केचित् केवलया भक्त्या वासुदेवपरायणाः ।
अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥ ३०६ ॥ इति ।

“न चलति भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः” (भा० ११।२।५३) इति च ।
( च ) भगवत्पार्षदतां प्राप्ते (भा० ९।४।६७) —

मत्सेवया प्रतीतं ते सालोक्यादिचतुष्टयम् ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम् ॥ ३०७ ॥ इति ।

नित्यपार्षदे च (भा० ३।१५।२२) —

वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशम् ।
अभ्यर्चती स्वलकमुन्नसमीक्ष्य वक्त्रमुच्छेषितं भगवतेत्यमताङ्ग यच्छ्रीः ॥ ३०८ ॥

( ३ ) सर्वेषु वर्षेषु भुवनेषु ब्रह्माण्डेषु तेषां बहिश्च तैस्तैः श्रीभगवदुपासनायाः क्रियमाणायाः श्रीभागवतादिषु प्रसिद्धिः सिद्धैवेति सर्वदेशोदाहरणं ज्ञेयम् ।
( ४ ) सर्वेषु करणेषु यथा —

मानसेनोपचारेण परिचर्य हरिं मुदा ।
परेऽवाङ्मनसागम्यं तं साक्षात् प्रतिपेदिरे ॥ ३०९ ॥ इत्यादि ।

एवम्भूतवचने ह्यस्तु तावद् बहिरिन्द्रियेण मनसा वचसापि तत्सिद्धिप्रसिद्धिः ।
( ५ ) सर्वद्रव्येषु यथा (भा० १०।८१।४) —

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ३१० ॥ इति ।

( ६ ) सर्वक्रियासु यथा (भा० ११।२।१२) —

श्रुतोऽनुपठितो ध्यात आदृतो वानुमोदितः ।
सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि ॥ ३११ ॥ इति ।

गीता ९।२१ —

यत् करोषि यदश्नासि यज् जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥ ३१२ ॥

एवं भक्त्याभासेषु भक्त्याभासापराधेष्वपि अजामिलमूषिकादयो दृष्टान्ता गम्याः ।
( ७ ) सर्वेषु कार्येषु यथा (स्कान्दे) —

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ३१३ ॥ इति ।

(८) सर्वफलेषु यथा "अकामः सर्वकामो वा मोक्षकाम उदारधीः" (भा० २।३।१०) इत्यादि ।
तथा "यथा तरोर्मूलनिषेचनेन" (भा० ४।३१।१४) इत्यादिवाक्येन हरिपरिचर्यायां क्रियमाणायां सर्वेषामन्येषामपि देवादीनामुपासना स्वत एव सिध्यतीत्यतोऽपि सार्वत्रिकता ।
यथोक्तं स्कान्दे श्रीब्रह्मनारदसंवादे —

अर्चिते देवदेवेशे शङ्खचक्रगदाधरे ।
अर्चिताः सर्वदेवाः स्युर्यतः सर्वगतो हरिः ॥ ३१४ ॥

एवं यो भक्तिं करोति यद् गवादिकं भगवते दीयते येन द्वारभूतेन भक्तिः क्रियते यस्मै श्रीभगवत्प्रीणनार्थं दीयते यस्माद् गवादिकात् पयआदिकमादाय भगवते निवेद्यते यस्मिन् देशादौ कुले वा कश्चिद् भक्तिमनुतिष्ठति तेषामपि कृतार्थत्वं पुराणेषु दृश्यत इति कारकगतापि । एवं सार्वत्रिकत्वं साधितम् ।
सदातनत्वमाह — सर्वदेति ।
(१) तत्र सर्गादौ यथा "कालेन नष्टा प्रलये वाणीयं वेदसञ्ज्ञिता" (भा० ११।१४।३) इत्यादि ।
सर्गमध्ये बहुत्रैव ।
(२) चतुर्विधप्रलयेष्वपि "तत्रेमं क उपासीरन् क उ स्विदनुशेरते" (भा० ३।७।३७) इति विदुरप्रश्ने ।
(३) सर्वेषु युगेषु (भा० १२।३।५२) —

कृते यद् ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥ ३१५ ॥ इति ।

किं बहुना ? —

सा हानिस्तन् महच्छिद्रं स मोहः स च विभ्रमः ।
यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥ ३१६ ॥

इत्यपि वैष्णवे ।
(४) सर्वावस्थास्वपि — (क) गर्भे श्रीनारदकारितश्रवणेन श्रीप्रह्लादे प्रसिद्धम् (ख) बाल्ये श्रीध्रुवादिषु (ग) यौवने श्रीमदम्बरीषादिषु (घ) वार्धक्ये धृतराष्ट्रादिषु (ङ) मरणेऽजामिलादिषु (च) स्वर्गितायां श्रीचित्रकेत्वादिषु (छ) नारकितायामपि —

यथा यथा हरेर्नाम कीर्तयन्ति स्म नारकाः ।
तथा तथा हरौ भक्तिमुद्वहन्तो दिवं ययुः ॥ ३१७ ॥

इति श्रीनृसिंहपुराणात् ।
अत एवोक्तं दुर्वाससा "मुच्येत यन्नाम्न्युदिते नारकोऽपि" (भा० ९।४।६२) इति ।
यथा (भा० २।१।११) —

एतन् निर्विद्यमानानामिच्छतामकुतोभयम् ।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥ ३१८ ॥ इत्यत्रापि ।

अथ तत्र तत्र व्यतिरेकोदाहरणानि च कियन्ति दर्श्यन्ते —

किं वेदैः किमु शास्त्रैर्वा किं वा तीर्थनिषेवणैः ।
विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः ॥ ३१९ ॥
किं तस्य बहुभिः शास्त्रैः किं तपोभिः किमध्वरैः ।
वाजपेयसहस्रैर्वा भक्तिर्यस्य जनार्दने ॥ ३२० ॥

इति बृहन्नारदीयपाद्मवचनादीनि ।
तथा (भा० २।४।१७, भा० ५।१९।२४, भा० १०।५९।४१) —

तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥ ३२१ ॥
न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ।
न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम् ॥ ३२२ ॥
ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनम् ।
सिद्धार्थ एतेन विगृह्यते महानहो सुराणां च तमो धिगाढ्यताम् ॥ ३२३ ॥

"सालोक्यसार्ष्टिसामीप्य" (भा० ३।२९।१३) इत्यादि "न दानं न तपो नेज्या" (भा० ७।७।५२) इत्यादि । "नैष्कर्म्यमप्यच्युतभाववर्जितम्" (भा० १।५।१२) इत्यादि । "नात्यन्तिकं विगणयन्त्यपि ते" (भा० ३।१५।४८) इत्यादि च ।
अथ "सर्वत्र सर्वदा यदुपपद्यते" इत्यादि योजनिकार्थो युगपद् यथा "तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा" (भा० २।२।३६) इत्यादि ।
अन्वयव्यतिरेकाभ्यां सदा यदुपपद्यत इत्यत्र यथा (पाद्मे) —

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥ ३२४ ॥

अन्वयव्यतिरेकाभ्यां सदा सर्वत्र यदुपपद्यत इति साकल्येऽपि यथा "न ह्यतोऽन्यः शिवः पन्थाः" (भा० २।२।३३) इत्युपक्रम्य तदुपसंहारे (भा० २।२।३६) —

तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान् नृणाम् ॥ ३२५ ॥ इति ।

नृणां जीवानाम् । "इति नृगतिं विविच्य कवयः" (भा० १०।८७।२०) इतिवत् ।
एतदुक्तं भवति — यत् "कर्म" तत् सन्न्यासभोगशरीरप्राप्त्यवधि । "योगः" सिद्ध्यवधिः । "साङ्ख्यम्" आत्मज्ञानावधि । "ज्ञानम्" मोक्षावधि । तथा तथा तत्तद्योग्यतादिकानि च सर्वाणि । एवम्भूतेषु तेषु कर्मादिषु शास्त्रादिव्यभिचारिता ज्ञेया । हरिभक्तेस्तु अन्वयव्यतिरेकाभ्यां सदा सर्वत्र तत्तन्महिमाभिरुपपन्नत्वात् तथाभूतस्य रहस्यस्याङ्गत्वं युक्तम् । यतो रहस्याङ्गत्वेन च ज्ञानरूपार्थान्तराच्छन्नतयैवेदमुक्तमिति ।
तदेवं श्रीभागवतं सङ्क्षेपेणोपदेक्ष्यन्तं श्रीनारदं श्रीब्रह्मापि तथैव सङ्कल्पं कारितवान् यथा (भा० २।७।५२) —

यथा हरौ भगवति नृणां भक्तिर्भविष्यति ।
सर्वात्मन्यखिलाधार इति सङ्कल्प्य वर्णय ॥ ३२६ ॥

भविष्यत्यवश्यं भवेदिति इमं प्रकारं सङ्कल्प्य नियमेनाङ्गीकृत्य ॥ श्रीब्रह्मा नारदम् ॥

११६ । श्रीनारदेनापि तन् महापुराणाविर्भावनार्थं तथैवोपदिष्टम् (भा० १।५।१३) —

अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ।
उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम् ॥ ३२७ ॥

अथो अतः "नैष्कर्म्यमप्यच्युतभाववर्जितम्" (भा० १।५।१२) इत्याद्युक्तेः कारणात् ।
अत्र विचेष्टितानुस्मरणेनाखण्डैव भक्तिर्लक्ष्यते ॥

११७ । अन्ते च (भा० १।५।४०) —

त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम् ।
प्राख्याहि दुःखैर्मुहुरर्दितात्मनां सङ्क्लेशनिर्वाणमुशन्ति नान्यथा ॥ ३२८ ॥

विदां विदुषाम् ॥ श्रीनारदः श्रीव्यासम् ॥

११८ । श्रीव्यासोऽपि तन्महापुराणप्रचारणारम्भे भक्तिमेव परमश्रेयः प्रदत्वेन समाधावनुभूतवानिति प्रथमसन्दर्भे दर्शितम् "भक्तियोगेन मनसि" (भा० १।७।४) इत्यादिप्रकरणे ।

तथैव “को लाभः” (भा० ११।१९।३०) इति प्रश्नान्तरं स्वयं श्रीभगवतैव सम्मतम् “भगो मे” (भा० ११।१९।४०) इत्यादौ “लाभो मद्भक्तिरुत्तमः” (भा० ११।१९।४०) इति ।
स्पष्टम् ॥ श्रीभगवान् ॥

११९ । अत एव स्वगतं विचारयति स्म (भा० १।४।३१) —

किं वा भागवता धर्मा न प्रायेण निरूपिताः ।
प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ ३२९ ॥

स्पष्टम् ॥ श्रीव्यासः ॥

१२० । अशेषोपदेष्टुरपि तदुपदेशेनैव भगवतः परम उत्कर्ष उच्यते । यथा “जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यम्” (भा० ६।१६।४०) इति ।
जितमित्यत्र भवतेति ज्ञेयम् । आहेत्यत्र तु भवानिति ॥ चित्रकेतुः श्रीसङ्कर्षणम् ॥

१२१ । तदेवं भक्तेरेवाभिधेयत्वं स्थितम् । तत्र यद् बहुत्र कर्मादिमिश्रत्वेन तद् धर्म उपदिश्यते तत् तु तत्तन्मार्गनिष्ठान् भक्तिसम्बन्धेन कृतार्थयितुं तानेव कांश्चिद् भक्त्यास्वादनेन शुद्धायामेव भक्तौ प्रवर्तयितुं चेति ज्ञेयम् ।
पुनश्च सर्वत्र तस्या एवाभिधेयत्वं वक्तुं तदीयमहिमा पूर्वत्र व्याख्यातोऽपि क्रमेण व्याख्यायते ।
सर्वैरेव विशेषतो भक्तैरन्यत् तु न कर्तव्यमित्यभिप्रायेण तत्र तस्याः परमधर्मत्वं सर्वकामप्रदत्वं च “एतावानेव लोकेऽस्मिन्” (भा० ६।३।२२) इत्यादौ “अकामः सर्वकामो वा” (भा० २।३।१०) इत्यादौ “सर्वासामपि सिद्धीनाम्” (भा० १०।८१।१९) इत्यादौ च दर्शितमेव ।
स्कान्दे च सनत्कुमारमार्कण्डेयसंवादे —

विशिष्टः सर्वधर्माणां धर्मो विष्ण्वर्चनं नृणाम् ।
सर्वयज्ञतपोहोमतीर्थस्नानैश्च यत् फलम् ॥ ३३० ॥
तत् फलं कोटिगुणितं विष्णुं सम्पूज्य चाप्नुयात् ।
तस्मात् सर्वप्रयत्नेन नारायणमिहार्चयेत् ॥ ३३१ ॥

तत्रैव ब्रह्मनारदसंवादे च —

अश्वमेधसहस्राणां सहस्रं यः करोति वै ।
न तत् फलमवाप्नोति मद्भक्तैर्यदवाप्यते ॥ ३३२ ॥

अशुभघ्नत्वमपि “सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः” (भा० ६।१।१७) इत्यादौ दर्शितम् ।

टीका च — “अतो न ज्ञानमार्ग इवासहायतानिमित्तं भयं नापि कर्ममार्गवन् मत्सरादियु-क्तेभ्यो भयमिति भावः” इत्येषा ।
तथा च स्कान्दे द्वारकामाहात्म्ये परमेश्वरवाक्यम् —

मद्भक्तिं वहतां पुंसामिह लोके परेऽपि वा ।
नाशुभं विद्यते लोके कुलकोटिं नयेद् दिवम् ॥ ३३३ ॥

विष्णुपुराणे च —

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ ३३४ ॥ इति ।

सर्वान्तरायनिवारकत्वमाहुः (भा० १०।२।३३) —

तथा न ते माधव तावकाः क्वचिद् भ्रश्यन्ति मार्गात् त्वयि बद्धसौहृदाः ।
त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्धसु प्रभो ॥ ३२५ ॥

पूर्वम् “येऽन्येऽरविन्दाक्ष” (भा० १०।२।३२) इत्यादिना मुक्तानामपि श्रीभगवदनादरेण परमार्थभ्रंश उक्तः । भक्तानां स नास्तीत्याहुः — तथेति । यथा पूर्वे आरूढपरमपदत्वाव-स्थातोऽपि भ्रश्यन्ति तथा तावका मार्गात् साधनावस्थातोऽपि न भ्रश्यन्ति किमुत मृग्यात् त्वत्त इत्यर्थः । श्रीवृत्रगजेन्द्रभरतादीनां सज्जन्मतो भ्रंशेऽपि भक्तिवासनानुगतिदर्शनात् ।
वासनाभाष्ये च —

मुक्ता अपि प्रपद्यन्ते पुनः संसारवासनाम् ।
यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः ॥ ३२६ ॥

इति तेषां तु पुनः संसारवासनानुगतेः ।
यद्वा येन निःसन्देहत्वादिरूपेण प्रकारेण “येऽन्येऽरविन्दाक्ष” (भा० १०।२।३२) इत्यादि-रूपैतत्पद्यपूर्वपद्योक्ता बहिर्मुखा भ्रश्यन्ति तेनैव निःसन्देहत्वादिरूपेण प्रकारेण तावका न भ्रश्यन्ति तद्भ्रंशतद्भ्रंशाभावयोरुभयोरपि निःसन्देहत्वादिरूपप्रकारेणैव सम इत्यर्थः । यतस्त्वयि बद्धसौहृदाः । सौहृदमत्र श्रद्धामार्गादिति साधकत्वप्रतीतेरेव । त्वद्बद्धसौहृद-त्वादेव त्वयेत्यादि । तथोक्तम् “त्वां सेवतां सुरकृताः” (भा० ११।४।१०) इत्यादौ ।
“धावन् निमील्य वा नेत्रे न स्खलेन् न पतेत्” (भा० ११।२।३५) इत्यादौ च ॥ ब्रह्मादयः श्रीभगवन्तम् ॥

१२२ । तथा (भा० ३।२१।२४) —

न वै जातु मृषैव स्यात् प्रजाध्यक्ष मदर्हणम् ।
भवद्विधेष्वतितरां मयि सङ्गृभितात्मनाम् ॥ ३३७ ॥

मयि सङ्गृभितः सङ्गृहीतो बद्ध आत्मा येषाम् । तथा "बाध्यमानोऽपि" (भा० ११।१४।१८) इत्यादिकमप्यत्रोदाहरणीयम् ।
अत्र प्रायो बाध्यमानत्वं कदाचित् कदाचित् तद्ध्यानादिताकृष्यमाणत्वमवगम्यते । तथाप्यनभिभूतत्वम् "वेद दुःखात्मकान् कामान् परित्यागेऽप्यनीश्वरः" (भा० ११।२०।२७) इत्यादिन्यायेन ।
तत्रापि भगवन्तं प्रति निजदैन्यादिनिवेदनादिना भक्तेरेवानुवृत्तिरिति ज्ञेयम् ॥ श्रीशुकः कर्दमम् ॥

१२३ । दुष्टजीवादिभयनिवारकत्वमाह (भा० ७।५।४३-४४) —

दिग्गजैर्दन्दशूकेन्द्रैरभिचारावपातनैः ।
मायाभिः सन्निरोधैश्च गरदानैरभोजनैः ॥ ३३८ ॥
हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि ।
न शशाक यदा हन्तुमपापमसुरः सुतम् ।
चिन्तां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥ ३३९ ॥

अत्र "दन्ता गजानां कुलिशाग्रनिष्ठुराः" (वि० पु० १।१७।४४) इत्यादिकं वैष्णववचनजात-मनुसन्धेयम् ।
"न यत्र श्रवणादीनि" (भा० १०।६।३) इत्यादिकं च ।
यथा बृहन्नारदीये —

यत्र पूजापरो विष्णोस्तत्र विघ्नो न बाधते ।
राजा च तस्करश्चापि व्याधयश्च न सन्ति हि ॥ ३४० ॥
प्रेताः पिशाचाः कुष्माण्डा ग्रहा बालग्रहास्तथा ।
डाकिन्यो राक्षसाश्चैव न बाधन्तेऽच्युतार्चकम् ॥ ३४१ ॥

श्रीनारदः श्रीयुधिष्ठिरम् ॥

१२४ । तथा (भा० ३।२२।३७) —

शारीरा मानसा दिव्या वैयासे ये च मानुषाः ।
भौतिकाश्च कथं क्लेशा बाधेरन् हरिसंश्रयम् ॥ ३४२ ॥

एवमप्युक्तं गारुडे —

न च दुर्वाससः शापो वज्रं चापि शचीपतेः ।
हन्तुं समर्थः पुरुषं हृदिस्थे मधुसूदने ॥ ३४३ ॥ इति ॥

श्रीमैत्रेयो विदुरम् ॥

१२५ । अथ पापघ्नत्वे तावदप्रारब्धपापघ्नत्वमाह (भा० ११।१४।१९) —

यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् ।
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥ ३४४ ॥

टीका च — "पाकाद्यर्थमपि प्रज्वालितोऽग्निर्यथा काष्ठानि भस्मीकरोति तथा वागादिनापि कथञ्चिन् मद्विषया भक्तिः समस्तपापानीति । भगवानपि स्वभक्तिमहिमाश्चर्येण सम्बोधयति 'अहो उद्धव !' विस्मयं शृणु" इत्येषा ।
अत्र दृष्टान्ते "सुसमिद्धार्चिः" इतिवद् दार्ष्टान्तिके "सुदृढा" इत्याद्यनुक्तेः "अदृढापि" इत्यादि उन्नीयते । अत्रैव "कृत्स्नशः" इत्युक्तम् ।
पाद्मपातालखण्डस्थवैशाख्यमाहात्म्ये च —

यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् ।
पापानि भगवद्भक्तिस्तथा दहति तत्क्षणात् ॥ ३४५ ॥

यद्यपि "हरिरित्यवशेनाह पुमान् नार्हति यातनाः" (भा० ६।२।१५) इत्यादौ ।
लिङादिप्रत्ययविरहेऽपि "पूषा प्रपिष्टभागः" (यजुः) "यदाग्नेयोऽष्टाकपालो भवति" (यजुः) इत्यादिवद् विधित्वमस्ति ।
भा० २।१।५ —

तस्माद् भारत सर्वात्मा भगवान् ईश्वरो हरिः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् ॥ ३४६ ॥

इत्यादौ साक्षाद् विधिश्रवणमप्यस्ति ।
"तस्मात्" इति हेतुनिर्देशश्चाकरणे दोषं क्रोडीकरोति तथापि विधिसापेक्षेयं न भवतीति तथाभूतस्वभावाग्निलक्षणवस्तुदृष्टान्तेन सूचितम् ।
अत एव "यानास्थाय नरो राजन्" (भा० ११।२।३५) इत्यादिकमपि दृश्यते ।
"सुसमिद्धार्चिः" इत्यनेन साधनान्तरसापेक्षत्वमशक्यसाध्यत्वं विलम्बितत्वं च निराकृतम् । तदेव व्यक्तं पाद्मात् "तत्क्षणात्" इति ॥ श्रीभगवान् ॥

१२६ । तथा च (भा० ६।१।१५) —

केचित् केवलया भक्त्या वासुदेवपरायणाः ।
अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥ ३४७ ॥

टीका च — "केचिदित्यनेनैवम्भूता भक्तिप्रधाना विरला इति दर्शयति । केवलया तपआदिनिरपेक्षया 'वासुदेवपरायणाः' इति नाधिकारिविशेषणमेतत् किन्तु अन्येषामश्रद्धया तत्राप्रवृत्तेरर्थात् तेष्वेव पर्यवसानादनुवादमात्रम्" इत्येषा ।
अत्र भास्करो हि केवलेन स्वरश्मिना स्वभावत एव नीहारं निःशेषं धुनोति । न तदर्थं प्रयत्नतस्तथा वासुदेवपरायणा अपि भक्त्येति ज्ञेयम् ॥

१२७ । किं च (भा० ६।१।१६) —

न तथा ह्यघवान् राजन् पूयेत तपआदिभिः ।
यथा कृष्णार्पितप्राणस्तत्पुरुषनिषेवया ॥ ३४८ ॥

टीका च — "एतच्च ज्ञानमार्गादपि श्रेष्ठमित्याह न तथा पूयेत शुध्येत् । यथा तत्पुरुषनिषेवया कृष्णे अर्पिताः प्राणा येन" इत्येषा ।
अत्र "प्रायश्चित्तं विमर्शनम्" (भा० ६।१।११) इति ज्ञानस्यापि प्रायश्चित्तत्वं पूर्वमुक्तम् । अत एव टीकोक्तम् "एतच् च" इत्यादि ।
तदा "ऋतम्भरध्याननिवारिताघः" (भा० ६।१३।१७) इत्याद्युक्त्या भगवद्ध्याननिवारितवृत्रहत्यापापस्येन्द्रस्य "तं च" (भा० ६।१३।१८) इत्यादौ पुनरश्वमेधविधानं साधारणलोके पापप्रसिद्धेरेव निवारणार्थमिति ज्ञेयम् ।
ननु कथं तदानीमप्याविर्भूतभगवत्प्रेमत्वात् परमभागवतस्य वृत्रस्य हत्या भगवदाराधनेनापि गच्छतु ? महदपराधमात्रमपि भोगैकनाश्यं तत्प्रसादनाश्यं वेति मतम् ?
उच्यते — तथापि भगवत्प्रेरणया तत्र प्रवृत्तस्येन्द्रस्य न तादृशो दोष इति तदाराधनमेवात्र प्रायश्चित्तं विहितम् । श्रीभगवतापि तदासुरभवनिवारणायैव तथोपदिष्टमित्यनवद्यम् ॥ श्रीशुकः ॥

१२८ । क्वचित् प्रारब्धपापहारित्वमप्याह द्वाभ्याम् (भा० ३।३३।६-७) —

यन्नामधेयश्रवणानुकीर्तनाद् यत्प्रह्वणाद् यत्स्मरणादपि क्वचित् ।
श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन् नु दर्शनात् ॥ ३४९ ॥
अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥ ३५० ॥

श्वादत्वमत्र श्वभक्षकजातिविशेषत्वमेव । श्वानमत्तीति निरुक्तौ वर्तमानप्रयोगात् क्रव्यादवत् तच्छीलत्वप्राप्तेः । कादाचित्कभक्षणप्रायश्चित्तविवक्षायां त्वतीतप्रयोगः क्रियेत । "रूढिर्योगमपहरति" इति न्यायेन च तद् विरुध्यते । अत एव श्वपच इति तैर्व्याख्यातम् ।

सवनं चात्र सोमयाग उच्यते । ततश्चास्य भगवन्नामश्रवणाद्येकतरात् सद्य एव सवनयोग्यताप्रतिकूलदुर्जातित्वप्रारम्भकप्रारब्धपापनाशः प्रतिपद्यते । तस्मात् "भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात्" (भा० ११।१४।२१) इति तु कैमुत्यार्थमेव प्रोक्तमित्यायाति । किन्तु योग्यत्वमत्र श्वपचत्वप्रापकप्रारब्धपापविच्छिन्नत्वमात्रमुच्यते । सवनार्थं तु गुणान्तराधानमपेक्षत एव । ब्राह्मणकुमाराणां शौक्रे जन्मनि योग्यत्वे सत्यपि सावित्रदैक्ष्यजन्मापेक्षावत् ।

सावित्रादिजन्मनिमित्तसवनसदाचारप्राप्तेरिति सवने प्रवृत्तिर्नास्य युज्यते ।

तस्मात् पूज्यत्वमात्रतात्पर्यमित्यभिप्रेत्य टीकाकृद्भिरप्युक्तम् "अनेन पूज्यत्वं लक्ष्यते" इति । तथापि प्रारब्धहारित्वं तु व्यक्तमेवायातम् ।

तदुपपादयति — "अहो बत" इत्याश्चर्ये यस्य जिह्वाग्रे तव नाम वर्तते स श्वपचोऽपि । अतोऽस्मादेव हेतोर्गरीयान् यद् यस्माद् वर्तत अत इति वा । कुतः ? इत्यत आह "त एव तपस्तेपुः" इत्यादि त्वन्नामकीर्तने तपआद्यन्तर्भूतमतस्ते पुण्यतमा इत्यर्थः ।

एवं प्रारब्धपापहेतुकव्याध्यादिहरत्वं च स्कान्दे —

आधयो व्याधयो यस्य स्मरणान् नामकीर्तनात् ।
तदैव विलयं यान्ति तमनन्तं नमाम्यहम् ॥ ३५१ ॥

उक्तं च नामकौमुद्याम् "प्रारब्धपापहरत्वं क्वचिदुपासकेच्छावशात्" इति ॥ श्रीदेवहूतिः ॥

१२९ । तद्वासनाहारित्वमाह (भा० ६।२।१७) —

तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः ।
नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया ॥ ३५२ ॥

अधर्माज् जातं तेषामघानां हृदयं संस्काराख्यं न शुद्ध्यति । तदपीशाङ्घ्रिसेवया शुद्ध्यतीत्यर्थः । पाद्मे च —

अप्रारब्धफलं पापं कूटं बीजं फलोन्मुखम् ।
क्रमेणैव प्रलीयेत विष्णुभक्तिरतात्मनाम् ॥ ३५३ ॥

अप्रारब्धफलं वक्ष्यमाणेभ्योऽन्यत् । कूटं बीजत्वोन्मुखम् । बीजं प्रारब्धत्वोन्मुखम् । फलोन्मुखं प्रारब्धमित्यर्थः ॥ श्रीविष्णुदूता यमदूतान् ॥

१३० । अविद्याहरत्वमाह (भा० ४।११।३०) —

त्वं प्रत्यगात्मनि तदा भगवत्यनन्त आनन्दमात्र उपपन्नसमस्तशक्तौ ।
भक्तिं विधाय परमां शनकैरविद्याग्रन्थिं बिभेत्स्यसि ममाहमिति प्ररूढम् ॥ ३५४ ॥

तथा च पाद्मे —

कृतानुयात्रा विद्याभिर्हरिभक्तिरनुत्तमा ।
अविद्यां निर्दहत्याशु दावज्वालेव पन्नगीम् ॥ ३५५ ॥ इति ॥

श्रीमनुर्ध्रुवम् ॥

१३१ । सर्वप्रीणनहेतुत्वमुक्तम् "यथा तरोर्मूलनिषेचनेन" (भा० ४।३१।१४) इत्यादिना । तथाह (भा० ४।९।४६-४७) —

सुरुचिस्तं समुत्थाप्य पादावनतमर्भकम् ।
परिष्वज्याह जीवेति बाष्पगद्गदया गिरा ॥ ३५६ ॥
यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः ।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम् ॥ ३५७ ॥

सुरुचिर्निजविद्वेषिणी मातुः स्वपत्न्यपि तं भगवदाराधनत आगतं श्रीध्रुवम् । यथा पाद्मे —

येनार्चितो हरिस्तेन तर्पितानि जगन्त्यपि ।
रज्यन्ति जन्तवस्तत्र जङ्गमाः स्थावरा अपि ॥ ३५८ ॥

श्रीमैत्रेयः ॥

१३२ । ज्ञानवैराग्यादिसद्गुणहेतुत्वमुक्तम् (भा० ५।१८।१२) —

यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥ ३५९ ॥ इति ।

स्वर्गापवर्गभगवद्धामादिसर्वानन्दहेतुत्वमप्युक्तम् "यत् कर्मभिर्यत् तपसा" (भा० ११।२०।३२) इत्यादिना ।
स्वतः परमसुखदानेन कर्मादिज्ञानानन्तसाधनसाध्यवस्तूनां हेयत्वकारितामाह (भा० ११।१४।१४) —

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद् विनान्यत् ॥ ३६० ॥

रसाधिपत्यं पातालादिस्वामित्वम् । अपुनर्भवं ब्रह्मकैवल्यरूपं मोक्षम् । किं बहुना ? यत् किञ्चिदन्यदपि साध्यजातं तत् सर्वं नेच्छत्येव किन्तु मद् मां विना तादृशभक्तिसाध्यं मामेव सर्वपुरुषार्थाधिकमिच्छतीत्यर्थः । मय्यर्पितात्मा कृतात्मनिवेदनः ॥ श्रीभगवान् ॥

१३३ । अथ साक्षाद् भक्तेर्निर्गुणत्वं वक्तुं भगवदर्पितकर्मारभ्य सर्वेषां कर्मणां तावत् सगुणत्वमाहैकेन (भा० ११।२५।२३) —

मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तत् ।
राजसं फलसङ्कल्पं हिंसाप्रायादि तामसम् ॥ ३६१ ॥

मयि अर्पणं यस्य मदर्पितमित्यर्थः । निष्फलं निष्कामम् । फलं सङ्कल्प्यते यस्मिन् तत् । आदिशब्दाद् दम्भमात्सर्यादिभिः कृतम् ॥

१३४ । अथानुष्ठानान्तराणां त्रिगुणान्तर्गतत्वं वदन् चतुर्थकक्षायां साक्षाद्भक्तेर्निर्गुणत्वमाह चतुर्षुः (भा० ११।२५।२४) —

कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं तु यत् ।
प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥ ३६२ ॥

प्राकृतं बालमूकादिज्ञानतुल्यम् । वैकल्पिकं देहादिविषयं यत् तद् रजो राजसम् । केवलस्य निर्विशेषस्य ब्रह्मणः शुद्धजीवाभेदेन ज्ञानं कैवल्यं त्वम्पदार्थमात्रज्ञानस्य कैवल्यत्वानुपपत्तिस्तत्पदार्थज्ञानसापेक्षत्वात् ।
सत्त्वयुक्ते हि चित्ते प्रथमतः शुद्धं सूक्ष्मं जीवचैतन्यं प्रकाशते । ततश्चिदेकाकारत्वाभेदेन तस्मिन् शुद्धं पूर्णं ब्रह्मचैतन्यमप्यनुभूयते । ततः सत्त्वगुणस्यैव तत्र कारणताप्राचुर्यात् सात्त्विकत्वम् । तथा च श्रीगीतोपनिषदि "सत्त्वात् सञ्जायते ज्ञानम्" (गीता १४।१७) इत्यादि ।
भगवज्ज्ञानस्य तु (भा० ६।१४।२, ५) —

देवानां शुद्धसत्त्वानामृषीणां चामलात्मनाम् ।
भक्तिर्मुकुन्दचरणे न प्रायेणोपजायते ॥ ३६३ ॥
मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥ ३६४ ॥

इत्याद्युक्त्या सत्त्वादिसद्भावेऽप्यभावात् ।
भा० ६।१४।१ —

रजस्तमःस्वभावस्य ब्रह्मन् वृत्रस्य पाप्मनः ।
नारायणे भगवति कथमासीद् दृढा मतिः ॥ ३६५ ॥

इत्युक्त्या तदभावेऽपि सद्भावान् न तत्कारणत्वं किन्तु तदुत्तरत्वेन तस्य पूर्वजन्मनि श्रीनारदादिसङ्गवर्णनया ।
भा० ७।५।३२ —

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥ ३६६ ॥

इत्युक्त्या च भगवत्कृपापरिमलपात्रभूतस्य श्रीमतो महतः सङ्ग एव कारणम् ।
तत्सङ्गश्च (भा० १।१८।१३) —

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ ३६७ ॥

इत्युक्त्या निर्गुणावस्थातोऽप्यधिकत्वात् परमनिर्गुण एव ।
सप्तमस्य प्रथमे च "समः प्रियः सुहृद् ब्रह्मन्" (भा० ७।१।१) इत्यादौ सगुणे देवादौ तस्य कृपा वास्तवी न भवति किन्तु श्रीमत्प्रह्लादादिष्वेवेति प्रतिपादनान् महतां निर्गुणत्वाभिव्यक्त्या तत्सङ्गस्यापि निर्गुणत्वं व्यक्तम् ।
तथा भक्तेरपि गुणसङ्गनिर्धूननानन्तरं चानुवृत्तिः श्रूयते । यदुक्तमुद्धवं प्रति श्रीभगवता (भा० ११।२५।३३) —

तस्माद् देहमिमं लब्ध्वा ज्ञानविज्ञानसम्भवम् ।
गुणसङ्गं विनिर्धूय मां भजन्तु विचक्षणाः ॥ ३६८ ॥ इति ।

परमेश्वरज्ञानस्य नैर्गुण्यहेतुत्वेन निर्गुणत्वोक्तिस्तु लक्षणामयकष्टकल्पना । तथा कैवल्यज्ञानस्यापि नैर्गुण्यहेतुत्वादवैशिष्ट्येनोदाहरणभेदाप्रवृत्तिश्च स्यात् । तस्मात् स्वत एव निर्गुणं भगवज्ज्ञानम् ।
अत एव (भा० ११।२५।२९) —

सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् ।
तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम् ॥ ३६९ ॥

इत्यत्र तत्सुखस्यापि निर्गुणत्वं वक्ष्यते ।
एवं श्रवणादिलक्षणक्रियारूपाया अपि भक्तेः (भा० १।२।१६) —

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान् महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥ ३७० ॥

इत्युक्त्या तदेकनिदानत्वेन निर्गुणत्वमेव ।
ननु (भा० ८।२४।३८) —

मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ।
वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि ॥ ३७१ ॥

इति श्रीमत्स्यदेवस्य वचनेन ब्रह्मज्ञानमपि श्रीभगवत्प्रसादोत्थं श्रूयते । तत् कथं तस्य सगुणत्वम् ?

उच्यते—ब्रह्मज्ञानं द्विविधानां जायते । तत्र भगवदुपासकानामानुषङ्गिकत्वेन ब्रह्मोपासकानां स्वतन्त्रत्वेन । भगवदुपासकैस्तु भगवच्छक्तिरूपया भक्त्या किञ्चिद्भेदेनैव गृह्यते । तच्च "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति" (गीता १८।५४) इत्यादिश्रीगीतोक्त्युनुसारेण "आत्मारामाश्च मुनयः" (भा० १।७।१०) इत्याद्यनुसारेण च भगवतः पराख्यभक्तिपरिकरो भवतीति ।

ब्रह्मोपासकैस्तु पूर्ववदभेदेनैव गृह्यते तत्फलस्य "नात्यन्तिकं विगणयन्त्यपि ते प्रसादम्" (भा० ३।१५।४८) इत्युक्तदिशा परैरात्यन्तिकत्वेन मतस्यापि परमविद्भिरनादृतत्वात् तथा भक्तिविरुद्धत्वेन "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः" (भा० ६।१०।२८) इत्युक्त्या ।

नरकवदपवर्गस्यापि हेयत्वात् प्रसादाभास एवासौ ।

स्वमत्यनुसारेण प्रसादतया गृह्यमाणश्चेन् मतिकल्पितत्वात् सगुण एव । ततः कैवल्यज्ञानमपि तथा । विशेषतस्तस्य गुणसम्बन्धेन जन्माङ्गीकृतमिति ।

ननु अन्तर्बहिश्च करणं पुरुषस्य गुणमयमेव । तदुद्भवयोर्ज्ञानक्रिययोः कथं निर्गुणत्वम् ?

उच्यते—ज्ञानशक्तिः क्रियाशक्तिर्वा न तावज् जडस्य त्रैगुण्यस्य धर्मो घटस्येव । न च चिद्रूपस्यापि जीवस्य ईश्वराधीनशक्तित्वेनामुख्यत्वात् देवताविष्टपुरुषस्येव । ततः परमात्मचैतन्यस्यैवेत्यायाति ।

तथोक्तम् "देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु" (भा० ६।१६।२४) इति ।

तथा च श्रुतिः "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोतस्य श्रोत्रं मनसो मनः" (बृ० ४।४।१८) इति "न ऋते तत् क्रियते किञ्चनारे" (ऋक्० १०।११२।९) इत्यादिका । तदेवं सति त्रैगुण्यकार्यप्राधान्येन भवन्त्यौ ते गुणमयत्वेनोच्येते । परमेश्वरप्राधान्येन तु स्वतो गुणातीते एव ।

तदुक्तं देवामृतपानाध्याये श्रीशुकेन (भा० ८।९।२९)—

> यद् युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत् पृथक्त्वात् ।
> तैरेव सद् भवति यत् क्रियतेऽपृथक्त्वात् सर्वस्य तद् भवति मूलनिषेचनं यत् ॥
> ३७२ ॥

पृथक्त्वात् परमात्मेतराश्रयत्वादपृथक्त्वात् तदेकाश्रयत्वादित्यर्थः । अतो युक्तमेव ज्ञानक्रियात्मिकाया हरिभक्तेर्निर्गुणत्वम् ।

विशेषतस्तस्या गुणसम्बन्धेन जन्माभावश्चाङ्गीकृतः । न तु ब्रह्मज्ञानस्येव गुणसम्बन्धेन जन्मभाव इति । अतोऽसौ भक्तिस्तस्यापि प्रीणनत्वादिगुणैरुदाहरिष्यते । यत् तु श्रीकपिलदेवेन भक्तेरपि निर्गुणसगुणावस्थाः कथितास्तत्पुनः पुरुषान्तःकरणगुणा एव तस्यामुपचर्यन्त इति स्थितम् ॥

१३५ । तदेवमभिप्रेत्य ज्ञानरूपाया भक्तेर्निर्गुणत्वमुक्त्वा क्रियारूपाया व्याचष्टे । तत्राप्यस्तु तावत् श्रवणकीर्तनादिरूपाया भगवत्सम्बन्धेन वासमात्ररूपाया आह (भा० ११।२५।२५) —

> वनं तु सात्त्विको वासो ग्राम्यो राजस उच्यते ।
> तामसं द्यूतसदनं मन्निकेतं तु निर्गुणम् ॥ ३७३ ॥

"वनं वासः" इति तत्सम्बन्धिनी वसनक्रियेत्यर्थः । वानप्रस्थानामिति ज्ञेयम् । एवं ग्राम्य इति गृहस्थानाम् । तामसमिति दुराचाराणाम् । द्यूतसदनमित्युपलक्षणम् । मन्निकेतमिति मत्सेवापराणामिति च । वनादीनां वासेन सह "आयुर्घृतम्" इतिवदेकाधिकरणत्वम् ।
वनस्य वृक्षषण्डरूपस्य रजस्तमः प्राधान्यादत एव विविक्तत्वलक्षणतदीयसात्त्विकगुणस्यापि तद्युगलमिश्रत्वेन गौणत्वम् । वासक्रियायास्तु सत्त्वोत्पन्नत्वात् तद्वर्धनत्वाच्च सात्त्विकत्वे मुख्यत्वमिति तस्या एवाभिधेयत्वमुचितम् ।
अत एव ग्राम्य इति तद्धितान्त एव पठितः । एवम् "द्यूतसदनम्" इत्यत्र च वासक्रियैव विवक्षिता ।
"मन्निकेतम्" इत्यत्रापि । किन्तु भगवत्सम्बन्धमाहात्म्येन निकेतस्यापि निर्गुणत्वं भवेत् स्पर्शमणिन्यायेन । तादृशत्वं तु तादृशभक्तिचक्षुर्भिरेवोपलब्धव्यम् "दिविष्ठास्तत्र पश्यन्ति सर्वानेव चतुर्भुजान्" (ब्राह्मे) इतिवत् ।
एवमेव टीका च — "भगवन्निकेतं तु साक्षात् तदाविर्भावान् निर्गुणं स्थानम्" इत्येषा ॥

१३६ । एवं वासमात्रस्य तादृशत्वमुक्त्वा सर्वासामेव तत्क्रियाणामाह (भा० ११।२५।२६) —

> सात्त्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः ।
> तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥ ३७४ ॥

अत्र च क्रियायामेव तात्पर्यं न तदाश्रये द्रव्ये । सात्त्विककारकस्य शरीरादिकं हि गुणत्रयपरिणतमेव ॥

१३७ । तदेवं क्रियामात्रस्य तादृशत्वमुक्त्वा तत्प्रवृत्तिहेतुभूतायाः श्रद्धाया अप्याह (भा० ११।२५।२७) —

> सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी ।
> तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥ ३७५ ॥

अधर्मोऽपरधर्मः । अन्यत् पूर्ववत् ॥ श्रीभगवान् ॥

१३८ । अत आह "धर्मं भागवतं शुद्धं त्रैवेद्यं च गुणाश्रयम्" (भा० ६।२।२४) इति ।
"शुद्धं निर्गुणं त्रैवेद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयम्" इति टीका च ।
वेदशब्देनात्र कर्मकाण्डमेवोच्यते "एवं त्रयीधर्मम्" (गीता ९।२१) इत्यादेः ॥ श्रीशुकः ॥

१३९ । अत एव भक्तेः श्रीभगवत्स्वरूपशक्तित्वबोधकं स्वयम्प्रकाशत्वमाह (भा० ५।१४।४५) —

यज्ञाय धर्मपतये विधिनैपुणाय योगाय साङ्ख्यशिरसे प्रकृतीश्वराय ।
नारायणाय हरये नम इत्युदारं हास्यन् मृगत्वमपि यः समुदाजहार ॥ ३७६ ॥

य आर्षभेयो भरतो मरणसमये तत्रापि मृगशरीरे तद्वचनजन्मात्यन्तासम्भावात् स्वप्रकाशत्वमेव तस्याः कीर्तनलक्षणाया भक्तेः सिध्यति । एवं गजेन्द्रेऽपि ज्ञेयम् ॥ श्रीशुकः ॥

१४० । परमसुखरूपत्वं च दृश्यते । तत्र साधनदशायाम् "अतो वै कवयो नित्यं भक्तिं परमया मुदा" (भा० १।२।२२) इत्यादौ "कर्मण्यस्मिन्ननाश्वासे" (भा० १।१८।१२) इत्यादौ च तद्रूपत्वाभिव्यक्तिर्दर्शितैव ।
सिद्धदशायां तु सुतरां तत् प्रकटीभवति । यथा (भा० ९।४।६७) —

मत्सेवया प्रतीतं ते सालोक्यादिचतुष्टयम् ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम् ॥ ३७७ ॥

अत्रान्यस्य कालविप्लुतत्वमिति सेवायास्तदभावप्राप्तेर्निर्गुणत्वं सिद्धम् । अत्र कालविप्लुतं सालोक्यादिभ्योऽतिशये तु किमुतेति ॥ श्रीविष्णुर्दुर्वाससम् ॥

१४१ । श्रीभगवद्विषयकरतिप्रदत्वमुक्तम् "एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे" (भा० ७।७।३३) इत्यादिना ।
यत् तु "अस्त्वेवमङ्ग भजतां भगवान् मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्" (भा० ५।६।१८) इत्युक्त्यापि तद्रतिर्न प्राप्यत इति शङ्क्यते तत् खल्वविवेकादेव ।
कर्हिचिदिति भक्तियोगाख्यतद्रतिपुरुषार्थतायां शैथिल्ये सत्येवेत्यर्थलाभात् कर्हिचिदपीत्यनुक्तत्वात् "असाकल्ये तु चिच्चनौ" इत्यमरकोषाच् च ।
तथापि यद्यपि चिरमावृत्तिः स्यात् तदा रतिमपि ददाति "सत्यं दिशत्यर्थितमर्थितो नृणाम्" (भा० ५।१९।२७) इत्यादेरिति च कर्हिचित्पदेन गम्यते ।
भक्तविषयकभगवत्प्रीत्येकहेतुत्वमप्युदाहृतम् "नालं द्विजत्वं देवत्वम्" (भा० ७।७।५१) इत्यादि ।
तथा चाह (भा० ७।९।९) —

मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ।
नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ॥ ३७८ ॥

अभिजनः सत्कुलजन्म । बुद्धिर्ज्ञानयोगः । योगोऽष्टाङ्गः ॥ प्रह्लादः श्रीनृसिंहदेवम् ॥

१४२ । ननु निरतिशयनित्यानन्दरूपस्य भगवतः कथं तया सुखमुत्पद्येत निरतिशयत्वनित्यत्वयोर्विरोधात् ? उच्यते — शास्त्रे खलु निरतिशयानन्दत्वं नित्यत्वं च भगवतः श्रूयते । भक्तेरपि तथा तत्प्रीतिहेतुत्वं श्रूयते । तत एवं गम्यते —
तस्य परमानन्दैकरूपस्य स्वपरानन्दिनी स्वरूपशक्तिर्या ह्लादिनीनाम्नी वर्तते प्रकाशवस्तुनः स्वपरप्रकाशनशक्तिवत् तत्परमवृत्तिरूपैवैषा । तां च भगवान् स्ववृन्दे निक्षिपन्नेव नित्यं वर्तते । तत्सम्बन्धेन च स्वयमतितरां प्रीणातीति ।
अत एव तस्य प्रीतिरूपस्यापि भक्तिप्रीणनीयत्वमाह (भा० ५।१५।१३) —

यत्प्रीणनाद् बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणम आविरिञ्चात् ।
प्रीयेत सद्यः स ह विश्वजीवः प्रीतिः स्वयं प्रीतिमगाद् गयस्य ॥ ३७९ ॥

विश्वजीवः सर्वजीवनहेतुः । देवादीनां द्वन्द्वैक्यम् । प्रीतिः सुखरूपोऽपि ॥ श्रीशुकः ॥

१४३ । अत एव तथाभूतत्वेनात्मारामस्य पूर्णकामस्यापि तस्य क्षुद्रगुणवस्त्वपि परितोषाय कल्पत इति दृष्टान्तेनाह (भा० १।११।४–५) —

तत्रोपनीतबलयो रवेर्दीपमिवादृताः ।
आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥ ३८० ॥
प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ।
पितरं सर्वसुहृदमवितारमिवार्भकाः ॥ ३८१ ॥

तत्र श्रीद्वारकायाम् । रवेरुपहाररूपं दीपमादृतवन्तो जना इवेत्यर्थः । एवं स्तुत्यादिकमपि तत्प्रीणनतामर्हतीत्याह — प्रीत्येति । पितरमर्भका इवेति दृष्टान्तः । तस्य प्रीतावसाधारणं गुणविशेषमप्याह — सर्वसुहृदमिति । सर्वसुहृत्त्वे लिङ्गम् "अवितारम्" इति ।
तथा आत्मारामपूर्णकामत्वेऽपि तादृशस्य स्वसम्बन्धाभिमानिप्रीतिमत्पुत्रादिषु प्रीतिविशेषोदयो यथा दृश्यते तथा तेषु तं प्रीतिमन्तमित्यर्थः । एवं कल्पतरुदृष्टान्तेऽपि भगवतो भक्तविषयिका कृपा यथार्थमेवोपपद्यते — ये खलु सहजतत्प्रीतिमेवात्मनि प्रार्थयमाना भजन्ते तेभ्यस्तद्दानयाथार्थ्यस्यावश्यकत्वात् । तस्मादस्त्येवानन्दरूपस्यापि भक्तावानन्दोल्लास इति ॥ सूतः ॥

१४४ । एवं भक्तिरूपायास्तच्छक्तेर्जीवेऽभिव्यक्तौ भगवानेव कारणम् । तत्तदिन्द्रियादिप्रवृत्तौ च स एवेति तस्मिंस्तया जीवस्योपकारकाभासत्वमेव । तथापि भक्तानुरज्यदात्मत्वे भगवतः स्वकृपाप्राबल्यमेव कारणमिति वदन् पूर्वार्थमेव साधयति (भा० १२।८।४०) —

किं वर्णये तव विभो यदुदीरितोऽसुः संस्पन्दते तमनु वाङ्मन इन्द्रियाणि ।
स्पन्दन्ति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबन्धुः ॥
३८२ ॥

हे विभो ! तव किमहं वर्णये ? त्वत्कृपालुतायाः कियन्तमंशं वर्णयेयमित्यर्थः । यतो येन त्वयैव उदीरितः प्रेरितोऽसुः प्राणः संस्पन्दन्ते प्रवर्तते । तमसुमनु च वागादयः स्पन्दन्ते । तत्र हेतुः — "वै" अन्वयव्यतिरेकाभ्याम् "श्रोतस्य श्रोत्रम्" (बृ० ४।४।१८) इत्यादिश्रुतिभिश्च तत् प्रसिद्धमित्यर्थः ।

न केवलं प्राकृतानां तनुभृतां किन्तु अजशर्वयोश्च । अतः स्वस्य ममापि तथैव । एवं यद्यपि न क्वचिदपि कस्यापि स्वातन्त्र्यं तथापि दारुयन्त्रवत् त्वत्प्रवर्तितैरपि वागादिभिर्भजतां पुंसां भावेन स्वदत्तयैव भक्त्या बन्धुरसि इति ॥ मार्कण्डेयः श्रीनरनारायणौ ॥

१४५ । श्रीभगवदनुभवकर्तृत्वेऽनन्यहेतुत्वमाह (भा० १।८।३६) —

> शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः ।
> त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥ ३८३ ॥

स्पष्टम् ॥ श्रीकुन्ती श्रीभगवन्तम् ॥

१४६ । श्रीभगवत्प्रापकत्वमाह (भा० ११।१८।४५) —

> भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरम् ।
> सर्वोत्पत्त्यप्ययं ब्रह्मकारणं मोपयाति सः ॥ ३८४ ॥

टीका च — "महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात् । अत एव तत्कारणं मा मां ब्रह्मस्वरूपं वैकुण्ठनिवासिनम् । यद्वा ब्रह्मणो वेदस्य कारणं मामुपयाति सामीप्येन प्राप्नोति" इत्येषा ।

श्रीगीतासु "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया" (गीता ८।२२) इति ॥ श्रीभगवान् ॥

१४७ । तथा मनसोऽप्यगोचरफलदाने श्रीध्रुवचरितं प्रमाणं परमभक्तिसंवलितस्वलोकदानात् । तद्वशीकारित्वं तूदाहृतम् "न साधयति मां योगः" (भा० ११।१४।२०) इत्यादौ । तथा तत्पद्यान्ते "भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम्" (भा० ११।१४।२१) इति । अत्रैवं विवेचनीयम् — यद्यप्यस्य वाक्यस्यैकादशचतुर्दशाध्यायप्रकरणे साध्यसाधनभक्त्योरविविक्ततयैव महिमनिरूपणमिति साधनपरत्वं दुर्निर्णेयं तथापि फलभक्तिमहिमद्वारापि साधनमहिमपरत्वमेव यत्रेदृशमपि फलं भवतीति "वदन्ति कृष्ण श्रेयांसि" (भा० ११।१४।१) इत्यादिप्रश्नमारभ्य साधनस्यैवोपक्रान्तत्वात् "यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः" (भा० ११।१४।२६) इत्यादिना तस्यैवोपसंहृतत्वाच् च ।

विशेषतस्तु तत्र "बाध्यमानोऽपि मद्भक्तः" (भा० ११।१४।१८) इत्यारभ्य "धर्मः सत्यदयोपेतः" (भा० ११।१४।२२) इत्याद्यन्तं तदीयमन्तःप्रकरणं प्रायः साधनमहिमपरमेव ।

तत्र "बाध्यमानोऽपि" इति पद्यम् — साध्यभक्तौ जातायां बाध्यमानत्वायोगात् "दधति सकृन् मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान्" (भा० १०।८७।३५) इत्युक्तेः ।

> विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः ।
> वारुणीदिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयात् ॥ ३८५ ॥

इति विष्णुपुराणाच्च तन्महिमपरत्वेन गम्यते ।
अत्रैव तावद् वक्ष्यते (भा० ११।१४।२३) —

> कथं विना रोमहर्षं द्रवता चेतसा विना ।
> विनानन्दाश्रुकलया शुध्येद् भक्त्या विनाशयः ॥ ३८६ ॥

इत्यनेन "मद्भक्तियुक्तो भुवनं पुनाति" (भा० ११।१४।२४) इति कैमुत्यवाक्येन च साध्यभक्तेः संस्कारहारित्वम् । ततो विषया एव बाध्यमाना भवन्तीति ।
अथ "यथाग्निः सुसमिद्धार्चिः" (भा० ११।१४।१९) इति पद्यं नामाभासादेः सर्वपापक्षयकारित्वप्रसिद्धेस्तत्परम् ।
अथ "न साधयति मां योगः" (भा० ११।१४।२०) इत्येतत् सार्धपद्यं योगादीनां साधनरूपाणां प्रतियोगित्वेन निर्दिष्टत्वात् श्रद्धासहायत्वेन विधानाच्च तत्परम् । साध्यायां श्रद्धोल्लेखः पुनरुक्त इति ।
यद्यपि फलभक्तिद्वारैव तद्वशीकारित्वं तस्यास्तथाप्यत्र साधनरूपाया मुख्यत्वेन प्राप्तत्वात् तत्रैवोदाहृतम् ।
किं वा "अस्त्वेवमङ्ग भजतां भगवान् मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्" (भा० ५।६।१८) इति न्यायेन नावशः सन् प्रेमाणं ददातीति तस्या एव साक्षात् तद्गुणकत्वं ज्ञेयम् ।
अथ "धर्मः सत्यदयोपेतः" (११।१४।२२) इति पद्यं च धर्मादिसाधनप्रतियोगित्वेन निर्देशात् साधनभक्तेरेवान्यत्रापि तत्फलतयोदाहृतत्वाच्च तत्परम् ।
यत् तु "कथं विना" (भा० ११।१४।२३) इत्यादिकं तच्च साधनभक्तिफलस्य शोधकत्वातिशयप्रतिपादनेन तत्परमिति । तस्मात् साध्वेव "बाध्यमानोऽपि" (११।१४।१८) इत्यादिपद्यानि तत्तत्प्रसङ्गे दर्शितानि ॥ श्रीभगवान् ॥

१४८ । तत्रास्तु तावत् तस्याः साक्षाद् भक्तेः परधर्मत्वादिकम् । भगवदर्पणसिद्धतदनुगतिकस्य लौकिककर्मणोऽपि परधर्मत्वमुदाहरिष्यते "यो यो मयि परे धर्मः" (भा० ११।२९।२१) इत्यादौ ।
तथा पापघ्नत्वादिकं तस्याः श्रवणादिनापि भवतीत्युक्तम् "श्रुतोऽनुपठितो ध्यातः" (भा० ११।२।१२) इत्यादौ ।
पाद्मे माघमाहात्म्ये देवदूतवाक्यं च —

> प्राहास्मान् यमुनाभ्राता सादरं हि पुनः पुनः ।
> भवद्भिर्वैष्णवस्त्याज्यो विष्णुं चेद् भजते नरः ॥ ३८७ ॥
> वैष्णवो यद्गृहे भुङ्क्ते येषां वैष्णवसङ्गतिः ।
> तेऽपि वः परिहार्याः स्युस्तत्सङ्गहतकिल्बिषाः ॥ ३८८ ॥

बृहन्नारदीये यज्ञमाल्युपाख्यानान्ते —

हरिभक्तिपराणां तु सङ्गिनां सङ्गमाश्रितः ।
मुच्यते सर्वपापेभ्यो महापातकवानपि ॥ ३८९ ॥

ततः सुतरामेवेदमादिदेश (भा० ६।३।२९) —

जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ ३९० ॥

आस्तां तावत् "तानानयध्वम्" (भा० ६।३।२८) इत्यादिकेनैतत्पूर्वद्वितीयपद्येनोक्तानां मुकुन्दपादारविन्दमकरन्दरसविमुखानामानयनवार्ता तथा "ते देवसिद्ध" (भा० ६।३।२७) इत्यादिकेनैतत्पूर्वतृतीयपद्येनोक्तानां देवसिद्धपरिगीतपवित्रगाथानां साधूनां समदृशां भगवत्पराणां निकटगमननिषेधवार्तापि यद् यस्य जिह्वापि श्रीभगवतो गुणं च नामधेयं च वैकदा जन्ममध्ये यदा कदापि न वक्ति जिह्वाया अभावे चेतश्च तच्चरणारविन्दमेकदापि न स्मरति चेतसो विक्षिप्तत्वे शिरश्च कृष्णाय कृष्णं लक्षीकृत्य नो नमति —

शाठ्येनापि नमस्कारं कुर्वतः शार्ङ्गधन्विने ।
शतजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ ३९१ ॥

इति स्कान्दोक्तमहिमानं नमस्कारं न करोति तानानयध्वम् ।
तत्र हेतुः — असतः । असत्त्वे हेतुः — अकृतविष्णुकृत्यान् ।
यथा स्कान्दे रेवाखण्डे श्रीब्रह्मोक्तौ —

स कर्त्ता सर्वधर्माणां भक्तो यस्तव केशव ।
स कर्त्ता सर्वपापानां यो न भक्तस्तवाच्युत ॥ ३९२ ॥
पापं भवति धर्मोऽपि तवाभक्तैः कृतो हरे ।
निःशेषधर्मकर्ता वाप्यभक्तो नरके हरे ।
सदा तिष्ठति भक्तस्ते ब्रह्महापि विमुच्यते ॥ ३९३ ॥

पाद्मे च —

मन्निमित्तं कृतं पापमपि धर्माय कल्पते ।
मामनादृत्य धर्मोऽपि पापं स्यान् मत्प्रभावतः ॥ ३९४ ॥

युक्तं चैतत् "श्रवणं कीर्तनं चास्य" (भा० ७।११।११) इत्यादिना "मुखबाहूरुपादेभ्यः" (भा० ११।५।२) इत्यादिना "सर्वेषां मदुपासनम्" (भा० ११।१८।४३) इत्यादिना "सर्वे विधिनिषेधाः स्युः" (पाद्मे) इत्यादिना च परमनित्यत्वादिप्रतिपादनात् ।
एषां कीर्तनादीनां त्रयाणामपि सुकराणामभावे परेषां सुतरामेवाभावो भवेदिति सामान्येनैव विष्णुकृत्यरहितत्वमुक्तम् ।
जिह्वादीनां करणभूतानामपि कर्तृत्वेन निर्देशः पुरुषानिच्छयापि यथाकथञ्चित् कीर्तनादिकमादत्ते ।
"चरणारविन्दम्" इति विशेषाङ्गनिर्देशः श्रीयमस्य भक्तिख्यापक एव न तु तन्मात्रस्मरणनियामकः । अत्राभक्तानामानयनेन भक्तानामनानयनमेव विधीयते — आनयनस्योत्सर्गसिद्धत्वात् "वैवस्वतं संयमनं प्रजानाम्" इति श्रुतेः ।
भा० ६।१।१९ —

सकृन् मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ ३९५ ॥

इत्यत्र "तद्गुणरागि" इति विशेषणं तु तेषां तद्दृष्टिपथगमनसामर्थ्यस्यापि यद् घातकं तादृशतत्स्मरणस्य प्रभावविशेषमेव बोधयतीति ज्ञेयम् ।
यथैव नारसिंहे —

अहममरगणार्चितेन धात्रा यम इति लोकहिताहिते नियुक्तः ।
हरिगुरुविमुखान् प्रशास्मि मर्त्यान् हरिचरणप्रणतान् नमस्करोमि ॥ ३९६ ॥

तथैवामृतसारोद्धारे स्कान्दवचनम् —

न ब्रह्मा न शिवाग्नीन्द्रा नाहं नान्ये दिवौकसः ।
शक्तास्तु निग्रहं कर्तुं वैष्णवानां महात्मनाम् ॥ ३९७ ॥

श्रीयमः स्वदूतान् ॥

१४९ । तथा सकृद्भजनेनैव सर्वमप्यायुः सफलमित्युदाहृतमेव श्रीशौनकवाक्येन "आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ" (भा० २।३।१७) इत्यादिग्रन्थेन ।
एवं भक्त्याभासेनाप्यजामिलादौ पापघ्नत्वं दृश्यते । तथा सर्वकर्मादिविध्वंसपूर्वकपरमगतिप्राप्तावपि स्वल्पायासेनैव भक्तेः कारणत्वं श्रूयते । लघुभागवते —

वर्तमानं च यत् पापं यद् भूतं यद् भविष्यति ।
तत् सर्वं निर्दहत्याशु गोविन्दानलकीर्तनात् ॥ ३९८ ॥

तथैव च तत्र यथाकथञ्चित् तद्भक्तिसम्बन्धस्य कारणत्वं दृश्यते । ब्रह्मवैवर्ते —

स समाराधितो देवो मुक्तिकृत् स्याद् यथा तथा ।
अनिच्छयापि हुतभुक् संस्पृष्टो दहति द्विजाः ॥ ३९९ ॥

स्कान्दे उमामहेश्वरसंवादे—

दीक्षामात्रेण कृष्णस्य नरा मोक्षं लभन्ति वै ।
किं पुनर्ये सदा भक्त्या पूजयन्त्यच्युतं नराः ॥ ४०० ॥

बृहन्नारदीये—

अकामादपि ये विष्णोः सकृत् पूजां प्रकुर्वते ।
न तेषां भवबन्धस्तु कदाचिदपि जायते ॥ ४०१ ॥

पाद्मे देवद्युतिस्तुतौ—

सकृदुच्चारयेद् यस्तु नारायणमतन्द्रितः ।
शुद्धान्तःकरणो भूत्वा निर्वाणमधिगच्छति ॥ ४०२ ॥

तथान्यत्र—

सम्पर्काद् यदि वा मोहाद् यस्तु पूजयते हरिम् ।
सर्वपापविनिर्मुक्तः प्रयाति परमं पदम् ॥ ४०३ ॥

इतिहाससमुच्चये श्रीनारदपुण्डरीकसंवादे च—

ये नृशंसा दुराचाराः पापाचाररताः सदा ।
ते यान्ति परं धाम नारायणपदाश्रयाः ॥ ४०४ ॥
लिप्यन्ते न च पापेन वैष्णवा वीतकल्मषाः ।
पुनन्ति सकलान् लोकान् सहस्रांशुरिवोदितः ॥ ४०५ ॥
जन्मान्तरसहस्रेषु यस्य स्यान् मतिरीदृशी ।
दासोऽहं वासुदेवस्य सर्वान् लोकान् समुद्धरेत् ॥ ४०६ ॥
स याति विष्णुसालोक्यं पुरुषो नात्र संशयः ।
किं पुनस्तद्गतप्राणाः पुरुषाः संयतेन्द्रियाः ॥ ४०७ ॥

अत एव—

सकृदेव प्रपन्नो यस्तवास्मीति च याचते ।
अभयं सर्वथा तस्मै ददाम्येतद् व्रतं मम ॥ ४०८ ॥

इति रामायणे श्रीरामचन्द्रवाक्यं च ।

सकृदेव प्रपन्नो यस्तवास्मीति च याचते ।
अभयं सर्वथा तस्मै ददाम्येतद् व्रतं हरेः ॥ ४०९ ॥

इति च गरुडपुराणम् ।
तथा चाह (भा० १।१।१४) —

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततः सद्यो विमुच्येत यद् बिभेति स्वयं भयम् ॥ ४१० ॥ इति ॥

स्पष्टम् ॥ श्रीशौनकः ॥

१५० । तथा (भा० ६।१६।४४) —

न हि भगवन्नघटितमिदं त्वद्दर्शनान् नृणामखिलपापक्षयः ।
यन्नाम सकृच्छ्रवणात् पुक्कशोऽपि विमुच्यते संसारात् ॥ ४११ ॥

स्पष्टम् ॥ चित्रकेतुः श्रीसङ्कर्षणम् ॥

१५१ । अत एवोक्तं श्रीविष्णुधर्मोत्तरे —

जीवितं विष्णुभक्तस्य वरं पञ्च दिनानि वै ।
न तु कल्पसहस्राणि भक्तिहीनस्य केशवे ॥ ४१२ ॥

अतो यदत्र तृतीये (भा० ३।३१।१२–२१) गर्भस्थस्य जीवस्य भगवतः स्तुतिः श्रूयते तस्यैव च संसारोऽपि वर्ण्यते ।
तत्रोच्यते — जात्येकत्वेनैकवर्णनमिति । वस्तुतस्तु कश्चिदेव जीवो भाग्यवान् भगवन्तं स्तौति । स च निस्तरत्यपि । न तु सर्वस्यापि भगवज्ज्ञानं भवति ।
तथा च नैरुक्ताः पठन्ति "नवमे सर्वाङ्गसम्पूर्णो भवति" (नि० १३।१९) इति पठित्वा "मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः" इत्यादि तद्भावनापाठान्तरम् —

अवाङ्मुखः पीड्यमानो जन्तुभिश्च समन्वितः ।
साङ्ख्यं योगं समभ्यसेत् पुरुषं वा पञ्चविंशकम् ।
ततश्च दशमे मासि प्रजायते ॥ ४१३ ॥ इत्यादि ।

अत्र “पुरुषं वा” इति वाशब्दात कस्यचिदेव भगवज्ज्ञानमिति गम्यते ।
सर्वास्वप्यवस्थासु भक्तेः समर्थत्वं वर्णितम् । भेदेऽप्येकवद्वर्णनमन्यत्रापि दृश्यते । तृतीये (भा० ३।१२।४) यथा पाद्मकल्पसृष्टिकथनेऽपि श्रीसनकादीनां सृष्टिः कथ्यत इति टीकायां च ब्रह्मकृतसृष्टिमात्रकथनसाम्येनैकीकृत्योक्तिरियमिति योजितम् ।
श्रीवराहावतारवच् च तत्र प्रथममन्वन्तरस्यादौ पृथिवीमज्जने ब्रह्मनासिकातोऽवतीर्णः श्रीवराहस्तामुद्धरन् हिरण्याक्षेण सङ्ग्रामं कृतवानिति वर्ण्यते । हिरण्याक्षश्च षष्ठमन्वन्तरस्यावसानजातप्राचेतसदक्षकन्याया दितेर्जातः । तस्मात् तथावर्णनं तदवतारमात्रत्वपृथिवीमज्जनमात्रत्वैक्यविवक्षयैव घटते तद्वदत्रापीति । कश्चिदेवान्यो जन्यो जीवः स्तौत्यन्यः संसरतीत्येव मन्तव्यम् ।
अत्र पूर्ववत् परमगतिप्राप्तौ भक्तेः परम्पराकारणत्वं च दृश्यते । बृहन्नारदीये ध्वजारोपणमाहात्म्ये —

> यतीनां विष्णुभक्तानां परिचर्यापरायणैः ।
> ईक्षिता अपि गच्छन्ति पापिनोऽपि परां गतिम् ॥ ४१४ ॥

एवं विष्णुधर्मे —

> कुलानां शतमागामि समतीतं तथा शतम् ।
> कारयन् भगवद्धाम नयत्यच्युतलोकताम् ॥ ४१५ ॥
> ये भविष्यन्ति येऽतीता आकल्पात् पुरुषाः कुले ।
> तांस्तारयति संस्थाप्य देवस्य प्रतिमां हरेः ॥ ४१६ ॥ इति ।

दूतान् प्रति यमाज्ञा चेयम् —

> येनार्चा भगवद्भक्त्या वासुदेवस्य कारिता ।
> नवायुतं तत्कुलजं भवतां शासनातिगम् ॥ ४१७ ॥ इति ।

यथाह (भा० ७।१०।१८) —

> त्रिःसप्तभिः पिता पूतः पितृभिः सह तेऽनघ ।
> यत् साधोऽस्य गृहे जातो भवान् वै कुलपावनः ॥ ४१८ ॥

त्रिःसप्तभिः प्राचीनकल्पगततदीयपूर्वपूर्वजन्मसम्बन्धिभिः पितृभिः सह । अस्मिन् जन्मनि हिरण्यकशिपुकश्यपमरीचिब्रह्माण एव तत्पितर इति” ॥ श्रीनृसिंहः प्रह्लादम् ॥

१५२ । तथा भक्त्याभासस्यापि सर्वपापक्षयपूर्वकश्रीविष्णुपदप्रापकत्वं यथा बृहन्नारदीये कोकिलामालिनोर्मदिरोन्मत्तयोर्धृतकुचीरखण्डदण्डयोर्जीर्णभगवन्मन्दिरे नृत्यतोर्ध्वजारोपणफलप्राप्त्या तादृशत्वं जातम् ।

तथा व्याधहतस्य पक्षिणः कुक्कुरमुखगतस्य तत्पलायनवृत्त्या भगवन्मन्दिरपरिक्रमणफलप्राप्त्या तादृशत्वप्राप्तिरिति ।
क्वचित् तत्र महाभक्तिप्राप्तिश्च यथा बृहन्नारसिंहपुराणे श्रीप्रह्लादस्य । तस्य प्राग्जन्मनि वेश्यया सह विवादेन श्रीनृसिंहचतुर्दश्यां दैवादुपवासः सम्पन्नो जागरणं चेति ।
तथा चाह (भा० ३।९।१५) —

यस्यावतारगुणकर्मविडम्बनानि नामानि येऽसुविगमे विवशा गृणन्ति ।
तेऽनैकजन्मशमलं सहसैव हित्वा संयान्त्यपावृतामृतं तमजं प्रपद्ये ॥ ४१९ ॥

असुविगमेऽपीति तदानीन्तनमात्रत्वमशुद्धवर्णत्वं च व्यञ्जितम् । विवशा इति तदिच्छां विनापि केनचित् कारणान्तरेणापीत्यर्थः । "वश कान्तौ" इत्यमरः ।
तादृशशक्तित्वे हेतुमाह — अवतारेति । अवतारादिसदृशानि तत्तत्तुल्यशक्तीनीत्यर्थः । तत्रावतारविडम्बनानि नृसिंहेत्यादीनि गुणविडम्बनानि भक्तवत्सलेत्यादीनि कर्मविडम्बनानि गोवर्धनधरेत्यादीनि च ॥ ब्रह्मा श्रीगर्भोदकशायिनम् ॥

१५३ । अस्तु तावत् शुद्धभक्त्याभासस्य वार्ता । अपराधत्वेन दृश्यमानोऽप्यसौ महाप्रभावो दृश्यते । यथा विष्णुधर्मे भगवन्मन्त्रेण कृतनिजरक्षं विप्रं प्रति राक्षसवाक्यम् —

त्वामत्तुमागतः क्षिप्तो रक्षया कृतया त्वया ।
तत्संस्पर्शाच्च मे ब्रह्मन् साध्वेतन् मनसि स्थितम् ॥ ४२० ॥
का सा रक्षा न तां वेद्मि वेद्मि नास्याः परायणम् ।
किन्त्वस्याः सङ्गमासाद्य निर्वेदं प्रापितः परम् ॥ ४२१ ॥ इति ।

यथा वा विष्णुधर्माद्युदाहृतायाः श्रीभगवद्गृहदीपतैलं पिबन्त्याः कस्याश्चिन् मूषिकाया दैवतो मुखोद्धृतवर्तौ दीपे समुज्ज्वलिते सति मुखदाहेन मरणात् राज्ञीत्वं प्राप्य दीपदानादिलक्षणभक्तिनिष्ठाप्राप्तिरन्ते परमपदप्राप्तिश्च ।
यथा च ब्रह्माण्डपुराणे जन्माष्टमीमाहात्म्ये कृतजन्माष्टमीकाया दास्या दुःसङ्गेनापि कस्यचित् तत्फलप्राप्तिः । तथा च बृहन्नारदीये तादृशदुष्टकार्यार्थमपि भगवन्मन्दिरं मार्जयित्वा कश्चिदुत्तमां गतिमवाप ।
न त्वीदृशत्वं ब्रह्मज्ञानस्यापि । यथोक्तं ब्रह्मवैवर्ते —

विषयस्नेहसंयुक्तो ब्रह्माहमिति यो वदेत् ।
गर्भवाससहस्रेषु पच्यते पापकृन् नरः ॥ ४२२ ॥

अथ श्रीभगवद्वशीकारितायामपि सकृदल्पप्रयासात्मिकाया अपि भक्तेः कारणता दृश्यते । यथा ब्रह्मपुराणे श्रीशिववाक्यम् —

दृष्टः पश्येदहरहः संश्रितः प्रतिसंश्रयेत् ।
अर्चितश्चार्चयेन् नित्यं स देवो द्विजपुङ्गवाः ॥ ४२३ ॥

यथा च विष्णुधर्मे —

तुलसीदलमात्रेण जलस्य चुलुकेन च ।
विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः ॥ ४२४ ॥

तदीदृशं माहात्म्यवृन्दं न प्रशंसामात्रमजामिलादौ प्रसिद्धत्वात् । दर्शिताश्च न्यायाः श्रीभगवन्नामकौमुद्यादौ । तथैव नाम्न्यर्थवादकल्पनायां दोषोऽपि श्रूयते "तथार्थवादो हरिनाम्नि" इति हि पाद्मे नामापराधगणने —

अर्थवादं हरेर्नाम्नि सम्भावयति यो नरः ।
स पापिष्ठो मनुष्याणां निरये पतति स्फुटम् ॥ ४२५ ॥

इति कात्यायनसंहितायाम् ।

मन्नामकीर्तनफलं विविधं निशम्य न श्रद्दधाति मनुते यदुतार्थवादम् ।
यो मानुषस्तमिह दुःखचये क्षिपामि संसारघोरविविधार्त्तिनिपीडिताङ्गम् ॥ ४२६ ॥

इति ब्रह्मसंहितायां बौधायनं प्रति श्रीपरमेश्वरोक्तौ ।
ततोऽन्तर्भूतनामानुसन्धानेष्वन्येषु तद्भजनेषु च सुतरामेवार्थवादे दोषोऽवगम्यते । तदेवं यथार्थ एव तन्माहात्म्ये सत्यपि यत्र सम्प्रति तत्तद्भजनफलोदयो न दृश्यते कुत्रचिच्छास्त्रे च पुरातनानामप्यन्यथा श्रूयते तत्र नामार्थवादकल्पना वैष्णवानादरादयो दुरन्ता अपराधा एव प्रतिबन्धकारणं वक्तव्यम् ।
अत एवोक्तं श्रीशौनकेन (भा० २।३।२४) —

तदश्मसारं हृदयं बतेदं यद् गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ ४२७ ॥

यथा प्रायेणाधुनिकानां यथा वा (भा० १०।६४।२५) —

ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव ।
स्मृतिर्नाद्यापि विध्वस्ता भवत्सन्दर्शनार्थिनः ॥ ४२८ ॥

तदुक्तरीत्याध्यवसितभक्तेरपि नृगस्य "जिह्वा न वक्ति" (भा० ६।३।२९) इत्यादियमवाक्यविरुद्धं यमलोकगमनं प्राप्तवतो विना चार्थवादकल्पनामयं भावं श्रुतशास्त्रस्यापि तस्य सत्यां तादृशमाहात्म्यायां भक्तौ श्रीमदम्बरीषादिवत् सेवाग्रहं परित्यज्य दानकर्माग्रहो न स्यात् ।
तादृशापराधे भक्तिस्तम्भश्च श्रूयते । यथा पाद्मे नामापराधभञ्जनस्तोत्रे —

नामैकं यस्य वाचि स्मरणपथगतं श्रोत्रमूलं गतं वा
शुद्धं वाशुद्धवर्णं व्यवहितरहितं तारयत्येव सत्यम् ।
तच् चेद् देहद्रविणजनतालोभपाषण्डमध्ये
निक्षिप्तं स्यान् न फलजनकं शीघ्रमेवात्र विप्र ॥ ४२९ ॥

देहादिलोभार्थं ये पाषण्डा गुर्ववज्ञादिदशापराधयुक्तास्तन्मध्य इत्यर्थः । स्कान्दे प्रह्लादसंहितायां द्वारकामाहात्म्ये —

पूजितो भगवान् विष्णुर्जन्मान्तरशतैरपि ।
प्रसीदति न विश्वात्मा वैष्णवे चावमानिते ॥ ४३० ॥

स्कान्द एवान्यत्र मार्कण्डेयभगीरथसंवादे —

दृष्ट्वा भागवतं दूरात् सम्मुखे नोपयाति हि ।
न गृह्णाति हरिस्तस्य पूजां द्वादशवार्षिकीम् ॥ ४३१ ॥
दृष्ट्वा भागवतं विप्रं नमस्कारेण नार्चयेत् ।
देहिनस्तस्य पापस्य न च वै क्षमते हरिः ॥ ४३२ ॥

एवं बहून्येवापराधान्तराण्यपि दृश्यते । एवमेव श्रीविष्णुपुराणे शतधनुर्नाम्नो राज्ञो भगवदाराधनतत्परस्यापि वेदवैष्णवनिन्दकाल्पसम्भाषयैव कुक्कुरादियोनिप्राप्तिरुक्ता । अतः "शुश्रूषोः श्रद्दधानस्य" (भा० १।२।१६) इत्यादौ "आवृत्तिरसकृदुपदेशात्" (ब्र० सू० ४।१।१) इत्यादौ च पुरुषाणां प्रायः सापराधत्वाभिप्रायेणैवावृत्तिविधानम् ।
सापराधानामावृत्त्यपेक्षा चोक्ता पाद्मे नामापराधभञ्जनस्तोत्रे नामोपलक्ष्य —

नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।
अविश्रान्तिप्रयुक्तानि तान्येवार्थकराणि च ॥ ४३३ ॥

एतदपेक्षयैव त्रैलोक्यसम्मोहनतन्त्रादावष्टादशाक्षरादेरावृत्तिविधानम् । यथा —

इदानीं शृणु देवि त्वं केवलस्य मनोर्विधिम् ।
दशकृत्वो जपेन् मन्त्रमापत्कालेन मुच्यते ॥ ४३४ ॥
सहस्रजप्तेन तथा मुच्यते महतैनसा ।
अयुतस्य जपेनैव महापातकनाशनम् ॥ ४३५ ॥

तथा ब्रह्मवैवर्ते नामोपलक्ष्य —

हनन् ब्राह्मणमत्यन्तं कामतो वा सुरां पिबन् ।
कृष्ण कृष्णेत्यहोरात्रं सङ्कीर्त्य शुचितामियात् ॥ ४३६ ॥

अत्रापराधालम्बनत्वेनैव वर्तमानानां पापवासनानां सहैवापराधेन नाश इति तात्पर्यम् । एतादृशप्रतिबन्धापेक्षयैवोक्तं विष्णुधर्मे —

रागादिदूषितं चित्तं नास्पदं मधुसूदने ।
बध्नाति न रतिं हंसः कदाचित् कर्दमाम्बुनि ॥ ४३७ ॥
न योग्या केशवं स्तोतुं वाग्दुष्टा चानृतादिना ।
तमसो नाशनायालं नेन्दोर्लेखा घनावृता ॥ ४३८ ॥

सिद्धानामावृत्तिस्तु प्रतिपदमेव सुखविशेषोदयार्था । असिद्धानामावृत्तिनियमः फलपर्याप्तिपर्यन्तस्तदन्तरायेऽपराधावस्थितिवितर्कात् ।
यतः कौटिल्यमश्रद्धा भगवन्निष्ठाच्यावकवस्त्वन्तराभिनिवेशो भक्तिशैथिल्यं स्वभक्त्यादिकृतमानित्वमित्येवमादीनि महत्सङ्गादिलक्षणभक्त्यापि निवर्तयितुं दुष्कराणि चेत् तर्हि तस्यापराधस्यैव कार्याणि तान्येव च प्राचीनस्य तस्य लिङ्गानि ।
अत एव कुटिलात्मनामुत्तममपि नानोपचारादिकं नाङ्गीकरोति भगवान् यथा दूत्यगतो दुर्योधनस्य ।
आधुनिकानां च श्रुतशास्त्राणामप्यपराधदोषेन श्रीभगवति श्रीगुरौ तद्भक्तादिषु चान्तरानादरादावपि सति बहिस्तदर्चनाद्यारम्भः कौटिल्यम् ।
अत एवाकुटिलमूढानां भजनाभासादिनापि कृतार्थत्वमुक्तम् । कुटिलानां तु भक्त्यनुवृत्तिरपि न भवतीति स्कान्दे श्रीपराशरवाक्ये दृश्यते —

न ह्यपुण्यवतां लोके मूढानां कुटिलात्मनाम् ।
भक्तिर्भवति गोविन्दे कीर्तनं स्मरणं तथा ॥ ४३९ ॥ इति ।

एतदपेक्षयोक्तं विष्णुधर्मे —

सत्यं शतेन विघ्नानां सहस्रेण तथा तपः ।
विघ्नायुतेन गोविन्दे नृणां भक्तिर्निवार्यते ॥ ४४० ॥ इति ।

अत एवाह (भा० ३।१९।३६) —

तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः ।
कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ॥ ४४१ ॥

स्पष्टम् ॥ श्रीसूतः ॥

१५४ । यथैव भगवद्भक्ता अप्यकुटिलात्मनोऽज्ञाननुगृह्णन्ति न तु कुटिलात्मनो विज्ञानिति दृश्यते । यथा (भा० ११।५।४-५) —

दूरे हरिकथाः केचिद् दूरे चाच्युतकीर्तनाः ।
स्त्रियः शूद्रादयश्चैव तेऽनुकम्प्या भवादृशाम् ॥ ४४२ ॥
विप्रो राजन्यवैश्यौ वा हरेः प्राप्ताः पदान्तिकम् ।
श्रौतेन जन्मनाथापि मुह्यन्त्याम्नायवादिनः ॥ ४४३ ॥

टीका च — "तत्र येऽज्ञास्ते भवद्विधानामनुग्राह्या इत्याह — दूर इति । ज्ञानलवदुर्विदग्धास्त्वचिकित्स्यत्वादुपेक्ष्या इत्याशयेनाह — विप्र इति" इत्येषा ॥ श्रीचमसो निमिम् ॥

१५५ । अथाश्रद्धा — दृष्टे श्रुतेऽपि तन्महिमादौ विपरीतभावनादिना विश्वासाभावः । यथा दुर्योधनस्यैव विश्वरूपदर्शनादावपि ।
अत एव यथा "आपन्नः संसृतिं घोरां यन् नाम विवशो गृणन्" (भा० १।१।१४) इत्यादिशौनकस्य "दन्ता गजानां कुलिशाग्रनिष्ठुराः" (वि० पु० १।१७।४४) इति श्रीप्रह्लादस्यानुभवसिद्धं न तथा सर्वेषाम् ।
ईदृशमानुषङ्गिकं फलं तु शुद्धभक्तैर्भगवन्महिमख्यापनेच्छा यदि स्यात् तदैवेष्यते न तु स्वरक्षणाय स्वमहिमदर्शनाय वा । यथैवोक्तम् (वि० पु० १।१७।४४) —

दन्ता गजानां कुलिशाग्रनिष्ठुराः शीर्णा यदेते न बलं ममैतत् ।
महाविपत्पातविनाशनोऽयं जनार्दनानुस्मरणानुभावः ॥ ४४४ ॥

श्रीपरीक्षित्प्रभृतिभिस्तु तदपि नेष्टं यथा "द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः" (भा० १।१९।१५) इति ।
स्पष्टम् ॥ राजा ॥

१५६ । अत एवाधुनिकेषु महानुभावलक्षणवत्सु तद्दर्शनेऽपि नाविश्वासः कर्तव्यः । कुत्रचिद् भगवदुपासनाविशेषेणैव तादृशमानुषङ्गिकं फलमुदयते । यथा (भा० ४।८।७९) —

यदैकपादेन स पार्थिवात्मजस्तस्थौ तदङ्गुष्ठनिपीडिता मही ।
ननाम तत्रार्धमिभेन्द्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥ ४४५ ॥

अत्र सर्वात्मकतयैव विष्णुसमाधिना तादृक् फलमुदितम् । एतादृश्युपासना चास्य भाविज्योतिर्मण्डलात्मकविश्वचालनपदोपयोगितयोदितेति ज्ञेयम् ॥ श्रीमैत्रेयः ॥

१५७ । अथ भगवन्निष्ठाच्यावकवस्त्वन्तराभिनिवेशो यथा "एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः स योगतापसो भगवदाराधनलक्षणाच् च" (भा० ५।८।२६) इति ।
स श्रीभरतः । अत्रैवं चिन्त्यम् — भगवद्भक्त्यन्तरायकं सामान्यम् प्रारब्धकर्म न भवितुमर्हति दुर्बलत्वात् । ततः प्राचीनापराधात्मकमेव तल्लभ्यत इन्द्रद्युम्नादीनामिवेति ॥ श्रीशुकः ॥

१५८ । केचित् तु साधारणस्यैव प्रारब्धस्य तादृशेषु भक्तेषु प्राबल्यं तदुत्कण्ठावर्धनार्थं स्वयं भगवतैव क्रियत इति मन्यन्ते । सा च वर्णिता मृगदेहं प्राप्तस्य तस्य । यथैव श्रीनारदस्य पूर्वजन्मनि जातरतेरपि कषायरक्षणमाह (भा० १।६।२२) —

> हन्तास्मिन् जन्मनि भवान् मा मां द्रष्टुमिहार्हति ।
> अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम् ॥ ४४६ ॥

स्पष्टम् ॥ श्रीभगवान् ॥

१५९ । तदेवमपराधहेतुकतदभिनिवेशोदाहरणं गजेन्द्रादीनां विषयावस्थायां कार्यम् । अथ भक्तिशैथिल्यं येनाध्यात्मिकादिसुखदुःखनिष्ठैवोल्लसति । भक्तितत्पराणां तु तत्रानादरो भवति । यथा सहस्रनामस्तोत्रे —

> न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
> जन्ममृत्युजराव्याधिभयं चाप्युपजायते ॥ ४४७ ॥ इति ।

या तु सत्साधकस्य मनुष्यदेहरिरक्षिषा जायते साप्युपासनावृद्धिलोभेन न तु देहमात्ररिरक्षिषयेति । न तथा च भक्तितात्पर्यहानिः ।
तदेवं विवेकसामर्थ्ययुक्तस्यापि भक्तितात्पर्यव्यतिरेकगम्यं तच्छैथिल्यं मध्ये मध्ये रुच्यमाणया भक्त्या यन् न दूरीक्रियते तदपराधालम्बनमेवेति गम्यते । अत एवापराधानुमानाप्रवृत्तेर्मूढे चासमर्थे चाल्पेन सिद्धिः समर्थैव । तत्र दीनदयालोः श्रीभगवतः कृपा चाधिका प्रवर्तते ।
किं तु विवेकसामर्थ्ययुक्ते सम्प्रत्यपि योऽपराधापातो भवति सोऽत्यन्तदौरात्म्यादेव । तद्विपरीते तु नातिदौरात्म्यादिति विदुषः समर्थस्य शतधनुषोऽन्तरायोऽनन्तरविहितभगवदुपासनस्यापि युक्त एव । मूढानां तु मूषिकादीनामपराधेऽपि सिद्धिस्तथैव युक्ता — दौरात्म्याभावेन भजनस्वरूपप्रभावस्यापराधमतिक्रम्योदयात् ।
अथ भक्त्यादिकृताभिमानित्वं चापराधकृतमेव — वैष्णवावमानादिलक्षणापराधान्तरजनकत्वात् । यथा दक्षस्य प्राक्तनश्रीशिवापराधेन प्राचेतसत्वावस्थायां श्रीनारदापराधजन्मापि दृश्यते ।
तदेवं यत् सकृद् भजनादिनैव फलोदय उक्तस्तद् यथावदेव यदि प्राचीनोऽर्वाचीनो वापराधो न स्यात् । मरणे तु सर्वथा सकृदेव यथाकथञ्चिदपि भजनमपेक्ष्यते ।

तत्र हि तस्यैव सकृदपि भगवन्नामग्रहणादिकं जायते यस्य पूर्वत्र वात्र वा जन्मनि सिद्धेन भगवदाराधनादिना तदानीं स्वीयप्रभावं प्रकटयतानन्तरमेव भगवत्साक्षात्कारो भाव्यते ।
गीता ८।६—

यं यं वापि स्मरन् भावं त्यजन्त्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ४४८ ॥
इति श्रीगीतोपनिषद्भ्यः ।

ततोऽपराधाभावात् तत्क्षयार्थं न तत्रावृत्त्यपेक्षा यथाजामिलस्य न तथा कृततन्नामश्रवणादीनामपि यमदूतानाम् । यथाह (भा० ६।२।३२)—

अथापि मे दुर्भगस्य विबुधोत्तमदर्शने ।
भवितव्यं मङ्गलेन येनात्मा मे प्रसीदति ॥ ४४९ ॥

"पूर्वेण मङ्गलेन महता पुण्येन" इति टीका च ॥

१६० । व्यतिरेकेणाह (भा० ६।२।३३)—

अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः ।
वैकुण्ठनामग्रहणं जिह्वा वक्तुमिहार्हति ॥ ४५० ॥

स्पष्टम् ॥ श्रीमानजामिलः ॥

१६१ । यत् तु श्रीभरतस्य मृगशरीरं त्यजतो नामानि गृहीत्वापि शरीरान्तरप्राप्तिस्तत्रापि साक्षाद्भगवत्प्राप्तिरेव—तादृशानां हृदि सदाविर्भावात् । एवमजामिलस्य पूर्वशरीरावस्थितावपि ज्ञेयम् । ततो मरणसमये सकृद्भजनस्यानन्तरमेव कृतार्थत्वप्रापणे व्यभिचारो न स्यात् ।
अत एवाह (भा० २।१।६)—

एतावान् साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ।
जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥ ४५१ ॥

टीका च—"एतावानेव जन्मनो लाभः फलम् । तमाह 'नारायणस्मृतिः' इति । साङ्ख्यादिभिः साध्य इति तेषां स्वातन्त्र्येण लाभत्वं वारयति । अन्ते च स्मृतिः परो लाभः । न तन्महिमा वक्तुं शक्यत इत्यर्थः" इत्येषा ।
नामकौमुदीकारैश्च "अन्तिमप्रत्ययोऽभ्यर्हितः" इत्युक्तम् ॥ श्रीशुकः ॥

१६२ । अत एवाजामिलस्यान्यदापि पुत्रोपचारितं नारायणनाम गृह्णतः—

प्रयाणे चाप्रयाणे च यन्नामस्मरणान् नृणाम् ।
सद्यो नश्यति पापौघो नमस्तस्मै चिदात्मने ॥ ४५२ ॥

इति पाद्मे देवद्युतिस्तुत्यनुसारेण "ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि" (भा० ५।३।१२) इति पञ्चमोक्तगद्यस्थितापिशब्देन प्रथमनामग्रहणादेव क्षीणसर्वपापस्यापि मरणे यन्नामग्रहणं तत्प्रशंसैव श्रूयते ।
तत्राप्यावृत्त्या (भा० ६।२।१३) —

अथैनं मापनयत कृताशेषाघनिष्कृतिम् ।
यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ ४५३ ॥

अशेषशब्दोऽत्र वासनापर्यन्तः । अघशब्दश्चापराधपर्यन्त इति । अत्र मरणे सर्वेषां दैन्योदयोऽपि श्रीभगवत्कृपातिशयद्वारमिति द्रष्टव्यम् ॥ श्रीविष्णुदूता यमदूतान् ॥

१६३ । तदेवमधिकारिविशेषं प्राप्यैव तत्तत्फलोदयो दृष्टः । यथैव पूर्वमुदाहृतम् । यथा च जातरुचिं प्राप्य (भा० ११।६।४४) —

तव विक्रीडितं कृष्ण नृणां परममङ्गलम् ।
कर्णपीयूषमास्वाद्य त्यजन्त्यन्यस्पृहां जनाः ॥ ४५४ ॥

अत एवोक्तम् —

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ ४५५ ॥ इति ॥

श्रीमदुद्धवः ॥

१६४ । जातप्रेमाणं प्राप्य (भा० १०।१।१३) —

नैषातिदुःसहा क्षुन् मां त्यक्तोदमपि बाधते ।
पिबन्तं त्वन्मुखाम्भोजच्युतं हरिकथामृतम् ॥ ४५६ ॥

स्पष्टम् ॥ श्रीराजा ॥

१६५ । व्याख्याते यथाकथञ्चिद्भजनसम्यग्भजनावृत्ती । तदेवं भगवदर्पितधर्मादिसाध्यत्वात् तां विनान्येषामकिञ्चित्करत्वात् तस्याः स्वत एव समर्थत्वात् स्वलेशेन स्वाभासादिनापि परमार्थपर्यन्तप्रापकत्वात् सर्वेषां वर्णानां नित्यत्वाच्च साक्षाद् भक्तिरूपं तत्साम्मुख्यमेवात्राभिधेयं वस्त्विति स्थितम् ।
इयमेव केवलत्वादनन्यताख्या (गीता ९।२२-३३) —

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ४५७ ॥
येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ ४५८ ॥

इत्यव्यवहितवाक्यद्वयेऽन्वयव्यतिरेकोक्त्यानन्यत्वं नाम ह्यन्योपासनाराहित्येन तद्भजनमुच्यते ।
इत्थमेवाङ्गीकृतम् "अपि चेत् सुदुराचारो भजते मामनन्यभाक्" (गीता ९।३०) इत्यादौ ।
तस्याश्च महादुर्बोधत्वं महादुर्लभत्वं चोक्तम् "धर्मं तु साक्षाद् भगवत्प्रणीतं न वै विदुर् ऋषयो नापि देवाः" (भा० ६।३।१९) इत्यादौ "येऽभ्यर्थितामपि च नो नृगतिं प्रपन्नाः" (भा० ३।१५।२४) इत्यादौ च ।
तदेवं तस्याः श्रवणादिरूपायास्तत्साक्षाद्भक्तेः सर्वविघ्ननिवारणपूर्वकसाक्षाद्भगवत्प्रेमफलदत्वे स्थिते परमदुर्लभत्वे च सत्यन्यकामनया च नाभिधेयत्वम् । तथा चोक्तं चतुर्थे (भा० ४।२४।५५) —

तं दुराराध्यमाराध्य सतामपि दुरापया ।
एकान्तभक्त्या को वाञ्छेत् पादमूलं विना बहिः ॥ ४५९ ॥

इति तन्मात्रकामनायां च भक्तेरेवाकिञ्चनत्वमकामत्वं च सञ्ज्ञापितम् (भा० ५।५।२५) —

मत्तोऽप्यनन्तात् परतः परस्मात् स्वर्गापवर्गाधिपतेर्न किञ्चित् ।
येषां किमु स्यादितरेण तेषामकिञ्चनानां मयि भक्तिभाजाम् ॥ ४६० ॥

इति श्रीऋषभदेववाक्यात् ।
"अकामः सर्वकामो वा" (भा० २।३।१०) इत्यादेश्च ।
तथेयमेवैकान्तितेत्युच्यते "एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः" (भा० ८।३।२०) इति गजेन्द्रवाक्यम् ।
भा० ७।९।५५ —

एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ।
एकान्तित्वाद् भगवति नैच्छत् तानसुरोत्तमः ॥ ४६१ ॥

इति नारदवाक्याच्च ।
अत एवोक्तं गारुडे —

एकान्तेन सदा विष्णौ यस्मादेव परायणाः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥ ४६२ ॥ इति ।

एषैवोपदिष्टा श्रीगीतोपनिषत्सु (गीता ११।५४–५५) —

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ ४६३ ॥
मत्कर्मकृन् मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ४६४ ॥ इति ।

मत्कर्म श्रवणकीर्तनादि । अहमेव परमः साधनत्वेन साध्यत्वेन च यस्य । अत एव साधन-साध्यान्तरसङ्गविवर्जित इति व्याख्येयम् ।
इमामेव भक्तिमाह (भा० ७।७।४८) —

तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ।
भजतानीहयात्मानमनीहं हरिमीश्वरम् ॥ ४६५ ॥

यदपाश्रया यदधीनास्तं हरिमित्यन्वयः । अनीहया कामनात्यागेन । अनीहं तथैव कामना-शून्यम् "इच्छाकाङ्क्षास्पृहेहातृट्" इत्यमरः ॥ श्रीप्रह्लादोऽसुरबालकान् ॥

१६६ । तथैवोभयोः कामनाशून्यत्वं स्वयमेवाह (भा० ७।१०।५–६) —

आशासानो न वै भृत्यः स्वामिन्याशिषमात्मनः ।
न स्वामी भृत्यतः स्वाम्यमिच्छन् यो राति चाशिषः ॥ ४६६ ॥
अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ।
नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ४६७ ॥

स्पष्टम् ॥ प्रह्लादः श्रीनृसिंहदेवम् ॥

१६७ । एवमेवाह (भा० ७।९।११) —

नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ।
यद् यज् जनो भगवते विदधीत मानं तच् चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥
४६८ ॥

अयं प्रभुरात्मनो मानं पूजां जनान् निजभक्तान् न वृणीते नेच्छति । तत्र हेतुः — निजस्य भक्तस्यैव लाभेन पूर्णः परमसन्तुष्टः । हेत्वन्तरम् — करुणः पूजार्थं तत्प्रयासादावसहि-ष्णुः ।

कथम्भूताज् जनात् ? अविदुषः पितुरग्रे बालकवत् तस्याग्रे न किञ्चिदपि जानतः । एषा स्वस्य जनैकवर्गत्वेन दैन्योक्तिः । यद्वा तदावेशेनान्यत् किञ्चिदपि न जानत इत्यर्थः । उभयत्र पक्षेऽपि तच्च तस्य कारुण्यहेतुरिति भावः ।
तर्हि किं जनस्तस्य मानं न कुरुत एवेत्याशङ्क्याह — यदिति । स च जनो यद् यद् यं यं मानं भगवते विदधीत सम्पादयति स सर्वोऽप्यात्मार्थमेव । तत्सम्मानमात्रेणैव स्वसम्माननाभिमाननात् सुखं मन्यमानस्तन्मानं करोत्येवेत्यर्थः ।
तत्सम्मानमात्रेण स्वसम्मानश्च तदेकजीवनस्य तज्जनस्य युक्त एवेति दृष्टान्तमाह — यथा मुखे या शोभा क्रियते तन्मात्रमेव प्रतिमुखस्य शोभायै भवति नान्यदिति ॥ श्रीप्रह्लादः श्रीनृसिंहम् ॥

१६८ । अत एवाह (भा० ७।७।५१-५२) —

नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः ।
प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ॥ ४६९ ॥
न दानं न तपो नेज्या न शौचं न व्रतानि च ।
प्रीयतेऽमलया भक्त्या हरिरन्यद् विडम्बनम् ॥ ४७० ॥

अमलया निष्कामया । विडम्बनं नटनमात्रम् । अतः सकामभक्तस्यापि भक्तेर्नटनमात्रत्वं स्वार्थसाधनमात्रतात्पर्येण भक्त्यनुकरणमात्रत्वात् । यथा परेषामपि नटानां क्वचित् तदनुकरणं तथैवेति ।
तत्र सकामत्वमैहिकं पारलौकिकं चेति द्विविधम् । तत् सर्वमेव निषिध्यते श्रीनागपत्नीवचनादौ "न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यम्" (भा० १०।१६।३७) इत्यादिना ।
तस्माद् वैवस्वतमनुपुत्रस्य पृषध्रस्य तु मुमुक्षोरप्येकान्तित्वव्यपदेशो गौण एव बोद्धव्यः । भा० ७।१०।२ —

मा मां प्रलोभयोत्पत्त्या सक्तं कामेषु तैर्वरैः ।
तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ॥ ४७१ ॥

इत्यत्र श्रीप्रह्लादवाक्ये मुमुक्षा तु कामत्यागेच्छैव ।
भा० ७।१०।७ —

यदि दास्यसि मे कामान् वरांस्त्वं वरदर्षभ ।
कामानां हृद्यसंरोहं भवतस्तु वृणे वरम् ॥ ४७२ ॥

इति वक्ष्यमाणात् ।

"भक्तियोगस्य तत् सर्वमन्तरायतयार्भकः" (भा० ७।१०।१) इति श्रीनारदेन प्रागुक्तत्वाच्च ।
एवं श्रीमदम्बरीषस्य यज्ञविधानमपि लोकसङ्ग्रहार्थकमेव ज्ञेयम् । तमुद्दिश्याप्येकान्तभक्तिभावेनेत्युक्तमस्ति ।
तत्र चैहिकं निष्कामत्वं भक्त्या जीविकाप्रतिष्ठाद्युपार्जनं यत् तदभावमयमपि बोद्धव्यम् ।
"विष्णुं यो नोपजीवति" इति गारुडे शुद्धभक्तलक्षणात् ।
भा० ७।९।४६ —

मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ।
प्रायः परं पुरुष ते त्वजितेन्द्रियाणां वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम् ॥ ४७३ ॥

इति श्रीप्रह्लादवाक्यवत् ।
मौनादय एवाजितेन्द्रियाणां वार्ता जीवनोपाया भवन्ति । दाम्भिकानां तु वार्ता अपि भवन्ति न वा दम्भस्यानियतफलत्वादित्यर्थः ।
अत एवोक्तम् (भा० ६।१८।७४) —

आराधनं भगवत ईहमाना निराशिषः ।
ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः ॥ ४७४ ॥ इति ।

"परं मोक्षमपि" इति टीका च ।
तस्मात् साधूक्तम् "नालं द्विजत्वम्" (भा० ७।७।५१) इत्यादि ॥ श्रीप्रह्लादोऽसुरबालकान् ॥

१६९ । ततोऽस्या एव भक्तेः सर्वशास्त्रसारत्वमाह (भा० ७।५।२३-२४) —

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ ४७५ ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन् नवलक्षणा ।
क्रियेत भगवत्यद्धा तन् मन्येऽधीतमुत्तमम् ॥ ४७६ ॥

श्रवणकीर्तने तदीयनामादीनां स्मरणं च । पादसेवनं परिचर्या । अर्चनं विध्युक्तपूजा । वन्दनं नमस्कारः । दास्यं तद्दासोऽस्मीत्यभिमानः । सख्यं बन्धुभावेन तदीयहिताशंसनम् । आत्मनिवेदनं गवाश्वादिस्थानीयस्य स्वदेहादिसङ्घातस्य तदेकभजनार्थं विक्रयस्थानीयं तस्मिन्नर्पणं यत्र तद्भरणपालनचिन्तापि स्वयं न क्रियते ।
उदाहृतानि चैतानि प्राचीनैः —

> श्रीविष्णोः श्रवणे परीक्षिदभवद् वैयासकिः कीर्तने प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।
> अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः सर्वस्वात्मनिवेदने बलिरभूत् कृष्णाप्तिरेषां परम् ॥ ४७७ ॥

इति नवलक्षणानि यस्याः सा भगवति तद्विषयिका । अद्धा साक्षाद्रूपा न तु कर्माद्यर्पणरूपा पारम्परिकी भक्तिरियम् । तत्रापि श्रीविष्णावेवार्पिता तदर्थमेवेदमिति भाविता न तु धर्मार्थादिष्वर्पिता । एवम्भूता चेत् क्रियते तदा तेन कर्त्रा यदधीतं तदुत्तमं मन्य इत्यर्थः । तथा च श्रीगोपालतापनीश्रुतिः "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन् मनः कल्पनमेतदेव च नैष्कर्म्यम्" (गो० ता० उ० १।१५) इति ।
अत "नवलक्षणा" इति समुच्चयो नावश्यकः । एकेनैवाङ्गेन साध्याव्यभिचारश्रवणात् क्वचिदन्याङ्गमिश्रणं तु तथापि भिन्नश्रद्धारुचित्वात् ।
ततो नवलक्षणाशब्देन भक्तिसामान्योक्त्या तन्मात्रानुष्ठानं विधीयत इति ज्ञेयम् । नवलक्षणत्वं चास्या अन्येषामप्यङ्गानां तदन्तर्भावादुक्तम् ॥ श्रीप्रह्लादः स्वपितरम् ॥

१७० । अथास्या अकिञ्चनाख्याया भक्तेः सर्वोर्ध्वभूमिकावस्थितिमधिकारिविशेषनिष्ठत्वं च दर्शयितुं प्रक्रियान्तरम् । तत्र परतत्त्वस्य वैमुख्यपरिहाराय यथाकथञ्चित् साम्मुख्यमात्रं कर्तव्यत्वेन लभ्यते । तच्च त्रिधा — ( १ ) निर्विशेषरूपस्य तदीयब्रह्माख्याविर्भावस्य ज्ञानरूपम् ( २ ) सविशेषरूपस्य च तदीयभगवदाख्याविर्भावस्य भक्तिरूपमिति द्वयम् ( ३ ) तृतीयं च तस्य द्वयस्यैव द्वारं कर्मार्पणरूपमिति ।
तदेतत् त्रयं पुरुषयोग्यताभेदेन व्यवस्थापयितुं लोके सामान्यतो ज्ञानकर्मभक्तीनामेवोपायत्वं नान्येषामित्यनुवदति (भा० ११।२०।६) —

> योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
> ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥ ४७८ ॥

योगा उपायाः । मया शास्त्रयोनिना । श्रेयांसि मुक्तित्रिवर्गप्रेमाणि । अनेन भक्तेः कर्मत्वं च व्यावृत्तम् ॥

१७१ । तेष्वधिकारिहेतूनाह द्वाभ्याम् (भा० ११।२०।७-८) —

> निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ।
> तेष्वनिर्विण्णचित्तानां कर्मयोगश्च कामिनाम् ॥ ४७९ ॥
> यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
> न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥ ४८० ॥

इह एषां मध्ये निर्विण्णानामैहिकपारलौकिकविषयप्रतिष्ठासुखेषु विरक्तचित्तानामत एव तत्साधनभूतेषु लौकिकवैदिककर्मसु न्यासिनां तानि त्यक्तवतामित्यर्थः । पदद्वयेन दृढजातमुमुक्षूणामित्यभिप्रेतम् । तेषां ज्ञानयोगः सिद्धिद इत्युत्तरेणान्वयः ।

कामिनां तत्तत्सुखेषु रागिणामत एव तेषु तत्साधनभूतेषु कर्मस्वनिर्विण्णचित्तानां तानि त्यक्तुमसमर्थानां कर्मयोगः सिद्धिदस्तत्सङ्कल्पानुरूपः फलदः ।
अथ "ते वै विदन्त्यतितरन्ति च देवमायाम्" (भा० २।७।४६) इत्यादौ "तिर्यग्जना अपि" इत्यनेन भक्त्यधिकारे कर्मादिवज् जात्यादिकृतनियमातिक्रमात् ।
श्रद्धामात्रं हेतुरित्याह "यदृच्छया" (भा० ११।८।२०) इति । यदृच्छया केनापि परमस्वतन्त्र-भगवद्भक्तसङ्गतत्कृपाजातमङ्गलोदयेन । यदुक्तम् "शुश्रूषोः श्रद्दधानस्य" (भा० १।२।१६) इत्यादि ॥ श्रीभगवान् ॥

१७२ । तदेतत् पद्यं स्वयमेवाग्रे व्याख्यास्यते द्वाभ्याम् (भा० ११।२०।२७-२८) —

> जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु ।
> वेद दुःखात्मकान् कामान् परित्यागेऽप्यनीश्वरः ॥ ४८१ ॥
> ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः ।
> जुषमाणश्च तान् कामान् दुःखोदर्कांश्च गर्हयन् ॥ ४८२ ॥

कथेत्युपलक्षणं मत्कथादिषु । एतदेव केवलं परमं श्रेय इति जातविश्वासः । अत एवान्येषु कर्मसु उद्विग्नः किन्तु वर्तमानेषु प्राचीनपुण्यकर्मफलभोगेषु एवम्भूत इत्याह — वेदेति । ततस्तां वेदेत्यादिव्याख्याताम् "न निर्विण्णो नातिसक्तः" (भा० ११।२०।८) इत्येवंलक्षणा-मवस्थां आरभ्यैवेत्यर्थः । मां भजेत मदीयानन्यताख्यभक्तावधिकारी स्यान् न तु ज्ञानवज् जाते सम्यग्वैराग्य एव । तस्याः स्वतः सर्वशक्तिमत्त्वेनान्यनिरपेक्षत्वादित्यर्थः । अनन्तरं च वक्ष्यते (भा० ११।२०।३१) —

> तस्मान् मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
> न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ४८३ ॥

"यत् कर्मभिर्यत् तपसा" (भा० ११।२०।३२) इत्यादि ।
न च कर्मनिर्वेद सापेक्षत्वमापतितम् । स तु भक्तेः सर्वोत्तमत्वविश्वासेन स्वत एव प्रवर्तते । अतो निर्विण्ण इत्यनुवादमात्रम् ।
अत एव यद्यपि ज्ञानकर्मणोरपि श्रद्धापेक्षास्त्येव तां विना बहिरन्तः सम्यक् प्रवृत्त्यनुपप-त्तेस्तथाप्यत्र श्रद्धामात्रस्य कारणत्वेन विशेषतस्तदङ्गीकारः ।
अत्रापि च तदपेक्षा पूर्ववत् सम्यक्प्रवृत्त्यर्थैव । तां विनानन्यताख्यभक्तिस्तथा न प्रवर्तते । कदाचित् किञ्चित् प्रवृत्ता च नश्यतीति ।
अत एव "न निर्विण्णो नातिसक्तः" इत्यस्यानन्तरमपि "मत्कथाश्रवणादौ वा" (भा० ११।२०।९) इत्यत्र श्रद्धायां जातायामेव कर्मपरित्यागो विहितः ।
भक्तिमात्रं तु तां विनापि सिद्ध्यति । स्कान्दे प्रभासखण्डे "सकृदपि परीगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत् कृष्णनाम" इत्यादौ ।
भा० ३।२५।२५ —

> सतां प्रसङ्गान् मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः ।
> तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥ ४८४ ॥ इत्यादौ च ।

तत्पूर्वतोऽपि तस्याः फलदातृत्वश्रवणात् ।
भा० ६।२।४९—

> म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम् ।
> अजामिलोऽप्यगाद् धाम किमुत श्रद्धया गृणन् ॥ ४८५ ॥ इत्यादौ ।

तथा फलदातृत्वसौष्ठवश्रवणाच्च ।
सा च श्रद्धा शास्त्राभिधेयावधारणस्यैवाङ्गं तद्विश्वासरूपत्वात् । ततो नानुष्ठानाङ्गत्वे प्रविशति ।
भक्तिश्च फलोत्पादने विधिसापेक्षापि न स्यात् दाहादिकर्मणि वह्न्यादिवत् । भगवच्छ्रवणकीर्तनादीनां स्वरूपस्थतादृशशक्तित्वात् । ततस्तस्याः श्रद्धाद्यपेक्षा कुतः स्यात् ? अतः श्रद्धां विना क्वचिन्मूढादावपि सिद्धिर्दृश्यते "श्रद्धया हेलया वा" इत्यादौ ।
हेला त्वपराधरूपाप्यबुद्धिपूर्वककृता चेद् दौरात्म्याभावे न भक्त्या बाध्यत इत्युक्तमेव । ज्ञानलवदुर्विदग्धादौ तु तद्वैपरीत्येन बाध्यते यथा मत्सरेण नामादिकं गृह्णति वेणे । क्वचिद् वस्तुशक्तिर्बाधिता दृश्यते । आर्द्रेन्धनादौ वह्निशक्तिरिव ।
"श्रद्धयोपाहृतं प्रेष्ठ भक्तेन मम वार्यपि" (भा० ११।२७।१७) "भूर्यप्यभक्तोपाहृतं न मे तोषाय कल्पते" इत्यत्र श्रद्धाभक्तिशब्दाभ्यामादर एवोच्यते ।
स तु भगवत्तोषणलक्षणफलविशेषस्योत्पत्तावनादरलक्षणतद्विघातकापराधस्य निरसनपरः । तस्मात् श्रद्धा न भक्त्यङ्गं किन्तु कर्मण्यर्थिसमर्थविद्वत् तावदनन्यताख्यायां भक्तौ अधिकारिविशेषणमेवेति । अत एव तद्विशेषणत्वेनैवोक्तम् "यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्" (भा० ११।२०।८) इति "जातश्रद्धो मत्कथासु" (भा० ११।२०।२७) इति च ।
अत्र तामारभ्येत्यर्थेन ल्यब्लोपे पञ्चम्यन्तेन तत इति पदेनानवधिकनिर्देशेनात्मारामतावस्थायामपि सा केषाञ्चित् प्रवर्तत इति तस्याः साम्राज्यमभिप्रेतम् । अनन्तरं च वक्ष्यते "न किञ्चित् साधवो धीराः" (भा० ११।२०।३४) इति ।
अतः साम्राज्यज्ञापनया तां विना कर्मज्ञाने अपि न सिध्यत इति च ज्ञापितम् ।
तदेवमनन्यभक्त्यधिकारे हेतुं श्रद्धामात्रमुक्त्वा स यथा भजेत् तथा शिक्षयति — स श्रद्धालुर्विश्वासवान् । प्रीतो जातायां रुचावासक्तः । दृढनिश्चयः साधनाध्यवसायभङ्गरहितश्च सन् ।
सहसा त्यक्तुमसमर्थत्वात् कामान् जुषमाणश्च गर्हयंश्च । गर्हणे हेतुः — दुःखोदर्कान् शोकादिकृदुत्तरफलानिति । अत्र कामा अपापकरा एव ज्ञेयाः शास्त्रे कथञ्चिदप्यन्यानुविधानायोगात् ।
प्रत्युत —

परपत्नीपरद्रव्यपरहिंसासु यो मतिम् ।
न करोति पुमान् भूप तोष्यते तेन केशवः ॥ ४८६ ॥

इति विष्णुपुराणवाक्यादौ कर्मार्पणात् पूर्वमेव तन्निषेधात् ।
अत्रैव च निष्कामकर्मण्यपि "यद्यन्यन् न समाचरेत्" (भा० ११।२०।१०) इति वक्ष्यमाणनिषेधात् ।
कर्मपरित्यागविधानेन सुतरां दुष्कर्मपरित्यागप्रत्यासत्तेः ।
विष्णुधर्मे —

मर्यादां च कृतां तेन यो भिनत्ति स मानवः ।
न विष्णुभक्तो विज्ञेयः साधुधर्मार्चनो हरिः ॥ ४८७ ॥

इति वैष्णवेष्वपि तन्निषेधात् ।
"यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः । सद्यः क्षिणोति" (भा० ४।२१।३१) इत्यत्र सद्यःशब्दप्रयोगेण जातमात्ररुचीनाम् —

यदा नेच्छति पापानि यदा पुण्यानि वाञ्छति ।
ज्ञेयस्तदा मनुष्येन्द्र हृदि तस्य हरिः स्थितः ॥ ४८८ ॥

इति विष्णुधर्मनियमेन च ।
"विकर्म यच् चोत्पतितं कथञ्चिद् धुनोति सर्वं हृदि सन्निविष्टः" (भा० ११।५।४२) इत्यत्रापि कथञ्चिच्छब्दप्रयोगेण लब्धभक्तीनां च स्वतस्तत्प्रवृत्त्ययोगात् । "नाम्नो बलाद् यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः" इति पाद्मनामापराधभञ्जनस्तोत्रादौ हरिभक्तिबलेनापि तत्प्रवृत्तावपराधापाताच्च ।
"अपि चेत् सुदुराचारः" (गीता ९।३०) इति तु तदनादरदोषपर एव न तु दुराचारताविधानपरः "क्षिप्रं भवति धर्मात्मा" (गीता ९।३१) इत्यनन्तरवाक्ये तु दुराचारतापगमस्य श्रेयस्त्वनिर्देशादिति ॥ श्रीभगवान् ॥

१७३ । नन्वेवं केवलानां कर्मज्ञानभक्तीनां व्यवस्थोक्ता । नित्यनैमित्तिकं कर्म तु सर्वेष्वेवावश्यकम् । तर्हि साङ्कर्ये कथं शुद्धे ज्ञानभक्ती प्रवर्तेयातां तदेतदाशङ्क्य तयोः कर्माधिकारितां वारयति (भा० ११।२०।९) —

तावत् कर्माणि कुर्वीत न निर्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन् न जायते ॥ ४८९ ॥

"कर्माणि नित्यनैमित्तिकादीनि" इति टीका च ।
अत एव —

श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते ।
आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णवः ॥ ४९० ॥

इत्युक्तदोषोऽप्यत्र नास्ति । आज्ञाकरणात् । प्रत्युत जातयोरपि निर्वेदश्रद्धयोस्तत्करण एवाज्ञाभङ्गः स्यात् ।
यथा च व्याख्यातम् "आज्ञायैवं गुणान् दोषान्" (भा० ११।११।३२) इत्यस्य टीकायाम् — "भक्तिदार्ढ्येन निवृत्त्यधिकारतया सन्त्यज्य" इति ।
निवृत्त्यधिकारित्वं चोक्तं श्रीकरभाजनेन (भा० ११।५।४१) —

देवर्षिभूताप्तनृणां पितृणां न किङ्करो नायमृणी च राजन् ।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्तम् ॥ ४९१ ॥

इति तेषां न किङ्करः किन्तु श्रीभगवत एवेत्यनधिकारित्वम् । कर्तं कृत्यम् । कर्तं भेदमित्यर्थे ततो देवतादीनां स्वातन्त्र्यमिति यावत् ।
एवमेवोक्तं गारुडे —

अयं देवो मुनिर्वन्द्य एष ब्रह्मा बृहस्पतिः ।
इत्याख्या जायते तावद् यावन् नार्चयते हरिम् ॥ ४९२ ॥

न च विकर्मप्रायश्चित्तरूपं कर्मान्तरं कर्तव्यं तस्य तच्छरणस्य विकर्मप्रवृत्त्यभावात् । कथञ्चिदापतितेऽपि विकर्मणि तदनुस्मरणेनैव प्रायश्चित्तस्याप्यानुषङ्गिकसिद्धिरित्यप्युक्तमनन्तरपद्येनैव (भा० ११।५।४२) —

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ।
विकर्म यच् चोत्पतितं कथञ्चिद् धुनोति सर्वं हृदि सन्निविष्टः ॥ ४९३ ॥ इति ।

त्यक्तोऽन्यत्र देवतान्तरे भावो भगवतीव भावो भक्तिर्येनेति च व्याख्येयम् । अत्र कर्मपरित्यागहेतुत्वेनाभिधानात् श्रद्धाशरणापत्त्योरैकार्थ्यं लभ्यते तच्च युक्तम् । श्रद्धा हि शास्त्रार्थविश्वासः शास्त्रं च तदशरणस्य भयं तच्छरणस्याभयं वदति । ततो जातायाः श्रद्धायास्तच्छरणापत्तिरेव लिङ्गमिति ।
न च देवादितर्पणमात्रतात्पर्येणापि पृथक्पृथगाराधनं कर्तव्यम् "यथा तरोर्मूलनिषेचनेन" (भा० ४।३१।१४) इत्यादौ तत्पौनरुक्त्यप्राप्तेः ।
न च त्यक्तकर्मणो मध्ये विघ्नस्थगितायामपि भक्तौ तत्त्यागानुतापो युज्यते "त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत् ततो यदि" (भा० १।५।१७) इत्याद्युक्तेः ।
श्रीगीतासु च (गीता १८।६६) —

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ४९४ ॥

इत्यस्य "देवर्षिभूताप्तनृणाम्" (भा० ११।५।४१) इत्यादिद्वयेनैकार्थ्यं दृश्यते । अतो भक्त्यारम्भ एव तु स्वरूपत एव कर्मत्यागः कर्तव्यः । परित्यज्येत्यत्र परिशब्दस्य हि तथैवार्थः ।
"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु" (गीता १८।६५) इत्यादिना चानन्यामेव भक्ति-मुपदिदेश ।
गौतमीये च —

न जपो नार्चनं नैव ध्यानं नापि विधिक्रमः ।
केवलं सततं कृष्णचरणाम्भोजभाविनाम् ॥ ४९५ ॥

तथा विष्णुपुराणेऽपि भरतमुद्दिश्य (वि० पु० २।१३।९-१०) —

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेशेत्याह राजा स केवलम् ॥ ४९६ ॥
नान्यज् जगाद मैत्रेय किञ्चित् स्वप्नान्तरेष्वपि ॥ ४९७ ॥ इति ।

अत्र वचनान्तरस्याप्यनवकाशात् । सुतरामेव तत्तद्वचनमयकर्मान्तरपरित्यागोऽङ्गी-कृतः । कथञ्चित् क्रियमाणमपि तन्नाम्नैव कृतमित्यवगतेश्च सर्वत्र तदीक्षणाच्छुद्धभक्ति-त्वमेवाङ्गीकृतम् ।
यथोक्तं पाद्मे —

सर्वधर्मोज्झिता विष्णोर्नाममात्रैकजल्पकाः ।
सुखेन यां गतिं यान्ति न तां सर्वेऽपि धार्मिकाः ॥ ४९८ ॥ इति ।

तस्मान् मतान्तरेणाप्युचितः श्रद्धावतोऽनन्यभक्त्यधिकारः कर्माद्यनधिकारश्चेति ।
किन्तु श्रद्धासद्भाव एव कथं ज्ञायते ? इति विचार्यम् । तत्र च लिङ्गत्वेन पूर्वपूर्वं शरणा-पत्तिरुपदिष्टैव । यस्यां च शरणापत्तौ वक्ष्यमाणानि "आनुकूल्यस्य सङ्कल्पः" इत्यादीनि लिङ्गानि । तथा व्यवहारकार्पण्याद्यभावोऽपि श्रद्धालिङ्गं ज्ञेयम् । शास्त्रं हि तथैव श्रद्धामु-त्पादयति (गीता ९।२२) —

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ४९९ ॥ इत्यादि ।

किं च श्रद्धावतः पुरुषस्य भगवत्सम्बन्धिद्रव्यजातिगुणक्रियाणां शास्त्रे श्रूयमाणेष्वैहिकव्यवहारिकप्रभावेष्वपि न कथञ्चिदनाश्वासो भवति । ततस्तासु प्राकृतद्रव्यादिसाधारणदृष्ट्या दोषविशेषानुसन्धानतो न कदाचिदप्रवृत्तिः स्यात् । ते च तादृशप्रभावाः (बृहन्नारदीये) —

> अकालमृत्युशमनं सर्वव्याधिविनाशनम् । सर्वदुःखोपशमनं हरिपादोदकं शुभम् ॥ ५०० ॥ इत्यादयः ।

केचित् तु तत्र तत्र श्रद्धावन्तोऽपि स्वापराधदोषेण सम्प्रति तत्फलं नोदेतीति स्थगितायन्ते ।

यत् तु "यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः" (गारुडे) इत्यादौ श्रद्दधाना अपि स्नानादिकमाचरन्ति तत् खलु श्रीमन्नारदव्यासादिसत्परम्पराचारगौरवादेव । अन्यथा तदतिक्रमेऽप्यपराधः स्यात् । ते च तथा मर्यादां लोकस्य कदर्यवृत्त्यादिनिरोधायैव स्थापितवन्त इति ज्ञेयम् ।

किं च जातायां श्रद्धायां सिद्धावसिद्धौ च स्वर्णसिद्धिलिप्सोरिव सदा तदनुवृत्तिचेष्टैव स्यात् । सिद्धिश्चात्रान्तःकरणकामादिदोषक्षयकारिपरमानन्दपरमकाष्ठागामिश्रीहरिस्फुरणरूपैव ज्ञेया ।

तस्यां स्वार्थसाधनानुप्रवृत्तौ च दम्भप्रतिष्ठालिप्सादिमयचेष्टालेशोऽपि न भवति । न सुतरां ज्ञानपूर्वकं महदवज्ञादयोऽपराधाश्चापतन्ति विरोधादेव ।

अत एव चित्रकेतोः श्रीमहादेवापराधस्तस्य स्वचेष्टान्तरेणाच्छन्नस्वभावस्य भागवतत्वाज्ञानादेव मन्तव्यः ।

यदि वा श्रद्धावतोऽपि प्रारब्धादिवशेन विषयसम्बन्धाभ्यासो भवति तथापि तद्बाधया विषयसम्बन्धसमयेऽपि दैन्यात्मिका भक्तिरेवोच्छलिता स्यात् । यथोक्तम् "जुषमाणश्च तान् कामान् दुःखोदर्कांश्च गर्हयन्" (भा० ११।२०।२८) इत्यत्र "बाध्यमानोऽपि मद्भक्तः" (भा० ११।१४।१८) इत्यादौ च ।

"अपि चेत् सुदुराचारः" (गीता ९।३०) इत्याद्युक्तस्यानन्यभाक्त्वेन लक्षिता तु या श्रद्धा सा खलु "ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः" (गीता १७।१) इत्यादिवल्लोकपरम्पराप्राप्ता न तु शास्त्रार्थावधारणजाता ।

शास्त्रीयश्रद्धायां तु जातायां सुदुराचारत्वायोगः स्यात् । "परपत्नीपरद्रव्य" (विष्णुपुराणे) इत्यादिविष्णुतोषणशास्त्रविरोधात् "मर्यादां च कृतां तेन" (विष्णुधर्मे) इत्यादिना तद्भक्तत्वविरोधाच्च ।

न तु सा दुराचारता तद्भक्तिमहिमश्रद्धाकृतैव । अपिशब्देन दुराचारत्वस्य हेयत्वव्यञ्जनात् । तथा "क्षिप्रं भवति धर्मात्मा" (गीता ९।३१) इत्युत्तराप्रतिपत्तेः "नाम्नो बलाद् यस्य हि पापबुद्धिः" इत्यादिनामापराधाच्च ।

ततः सा श्रद्धा न शास्त्रीयभक्त्यधिकारिणो विशेषणत्वे प्रवेशनीया किन्तु भक्तिप्रशंसायामेव ।

तादृश्यापि श्रद्धया भक्तेः सत्त्वहेतुत्वं न तु देवतान्तरयजनवत् । “ये शास्त्रविधिमुत्सृज्य” (गीता १७।१) इत्यादावेवोक्तमन्यादृशत्वमिति ।
अस्याः श्रद्धायाः पूर्णतावस्था तु ब्रह्मवैवर्ते —

किं सत्यमनृतं चेह विचारः सम्प्रवर्तते ।
विचारेऽपि कृते राजन्नसत्यपरिवर्जनम् ।
सिद्धं भवति पूर्णा स्यात् तदा श्रद्धा महाफला ॥ ५०१ ॥ इति ।

तदेवंलक्षणेषु श्रद्धोत्पत्तिलक्षणेषु सत्सु विधीयते “यदृच्छया मत्कथादौ जातश्रद्धस्तु यः” (भा० ११।२०।८) इत्यादि “मत्कथाश्रवणादौ वा” (भा० ११।२०।९) इत्यादि च ।
अत एवमनधिकार्यधिकारिविषयत्वविवक्षयैव श्रीभगवन्नारदयोर्वाक्ये व्यवतिष्ठते (गीता ३।२६) —

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥ ५०२ ॥ इत्यादि ।

भा० १।५।१५ —

जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः ।
यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥ ५०३ ॥ इति च ।

एवमजितवाक्यं च तदधिकारिविषयमेव (भा० ६।९।५०) —

स्वयं निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्म हि ।
न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः ॥ ५०४ ॥ इति ।

अत्र यद्यप्यधिकारितायां श्रद्धैव हेतुः सा चाज्ञस्य न सम्भवतीति नैतत् तद्विषयं स्यात् तथापि कथमपि प्राचीनसंस्कारवितर्केण तदधिकारित्वनिर्णयान् न दोष इति ज्ञेयम् । अन्यथोपदेष्टुरेव दोषः स्यात् “अश्रद्दधाने विमुखेऽप्यशृण्वति यश्चोपदेशः” इति वक्ष्यमाणापराधश्रवणात् ॥

१७४ । अथ प्रकृतमनुसरामः । तदेवं योगत्रयं तदधिकारहेतूंश्चोक्त्वा कर्मणोऽपि यथा भगवत्साम्मुख्यरूपत्वं स्यात् तथाह (भा० ११।२०।१०–११) —

स्वधर्मस्थो यजन् यज्ञैरनाशीःकाम उद्धव ।
न याति स्वर्गनरकौ यद्यन्यन् न समाचरेत् ॥ ५०५ ॥
अस्मिन् लोके वर्तमानः स्वधर्मस्थोऽनघः शुचिः ।
ज्ञानं विशुद्धमाप्नोति मद्भक्तिं च यदृच्छया ॥ ५०६ ॥

टीका च — "अनाशीःकामोऽफलकामः । अन्यन् निषिद्धम् । नरकयानं हि द्विधैव भवति । विहितातिक्रमाद्वा निषिद्धाचरणाद्वा । अतः स्वधर्मस्थत्वान् निषिद्धवर्जनाच्च नरकं न याति । अफलकामत्वान् न स्वर्गमपीत्यर्थः ।
"किन्त्वस्मिंल्लोके अस्मिन्नेव देहे । अनघो निषिद्धपरित्यागी । अतः शुचिर्निवृत्तरागादि-मलः । यदृच्छयेति केवलज्ञानादपि भक्तेर्दुर्लभतां द्योतयति" इत्येषा ।
अत्राफलकामत्वं केवलेश्वराज्ञाबुद्ध्या कुर्वाणत्वम् । अत्र ज्ञानिसङ्गे सति तन्मात्रत्वमेव भगवदर्पणं भवेत् । भक्तसङ्गे तु तत्सन्तोषमयत्वम् ।
अतो यदृच्छयेति पूर्ववद् भक्तसङ्गतत्कृपालक्षणं भाग्यं बोधितम् । यदुक्तम् "एतावानेव यजतामिह निःश्रेयसोदयः" (भा० २।३।११) इत्यादि ॥ श्रीभगवान् ॥

१७५ । तदेवं कर्मार्पणकेवलज्ञानकेवलभक्तयोऽधिकारिभेदेन व्यवस्थापिताः । ततः स्वा-धिकारानुसारेणैव स्थातव्यमित्याह (भा० ११।२१।२) —

स्वे स्वेऽधिकारे या निष्ठा सा गुणः परिकीर्तितः ।
विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥ ५०७ ॥ इति ।

स्पष्टम् ॥ श्रीभगवान् ॥

१७६ । तत्र साम्मुख्यद्वारभूतस्य कर्मणः साक्षात्साम्मुख्यरूपज्ञानभक्त्युदयपर्यन्तत्वात् स्वयमेव ताभ्यां न्यक्कारः ।
अत्र साक्षात्साम्मुख्ये च निर्विशेषसाम्मुख्यं ज्ञानम् । सविशेषस्यापि तत्त्वस्य भगवत्त्वं परमात्मत्वं चेति मुख्यमाविर्भावद्वयमिति सविशेषसाम्मुख्यरूपाया भक्तेस्तु मुख्यं भेदद्वयं भगवन्निष्ठत्वं परमात्मनिष्ठत्वं चेति ।
तदेतत्त्रयं श्रीगीतासूक्तम् । तत्र "अक्षरं ब्रह्म परमम्" (गीता ८।३) इत्यक्षरशब्देन पूर्वो-क्तं ब्रह्म । तत्साम्मुख्यरूपं ज्ञानात्मकमुपासनं चोत्तरोक्तं यथा "यदक्षरं वेदविदो वदन्ति" (गीता ८।११) इत्यादि ।
तथा परमात्मानमपि "पुरुषश्चाधिदैवतम्" (गीता ८।४) इति "अधियज्ञोऽहमेवात्र देहे देहभृतां वर" (गीता ८।४) इति च ।
विराड् व्यष्टिरूपाधिष्ठानद्वयभेदेन भिन्नप्रायमुक्त्वा भक्तिरीतिद्वयी तयोरेकप्राया दर्शिता । तत्र "अभ्यासयोगयुक्तेन" (गीता ८।८) इत्यादिनैका "कविं पुराणमनुशासितारम्" (गीता ८।९) इत्यादिनान्या ।
तथा मच्छब्दोक्तश्रीकृष्णाख्यभगवद्भक्तिप्रकारश्चायम् (गीता ८।१४) —

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ ५०८ ॥ इति ।

तदेतत् साम्मुख्यत्रयं श्रीकपिलदेवेनाप्युक्तम् (भा० ३।३२।२६) —

ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् ।
दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते ॥ ५०९ ॥ इति ।

दृशिर्ज्ञानम् । पृथक् परस्परमन्यादृशो भावो भावना । येषु तथाविधैर्ज्ञानादिभिरेक एव परिपूर्णस्वरूपगुणः परब्रह्मेयते परमात्मेयते भगवांश्चेयते । तत्र ज्ञानेन परब्रह्मतया ज्ञायते भक्तिविशेषेण परमात्मतया पूर्णया भक्त्या भगवत्तयेति ज्ञेयम् । परब्रह्मणः स्वरूपलक्षणं ज्ञानमात्रमिति परमात्मन ईश्वरः पुमानिति भगवतो भगवानित्येव ।
विवृतं चैतत् साम्मुख्यत्रयं भगवत्परमात्मसन्दर्भयोः — ब्रह्मणः "तथापि भूमन्" (भा० १०।१४।६) इत्यादिना ।
परमात्मनः "केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्" (भा० २।२।८) इत्यादिना ।
भगवतः "भक्तियोगेन मनसि" (भा० १।७।४) इत्यादिना च ।
तथा च यद्यपि साम्मुख्यत्वेनाविशिष्टं ज्ञानादित्रयमपि तद्वैमुख्यप्रतियोगि भवेत् ।
तथापि "श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये तेषाम्" (भा० १०।१४।४) इत्यादिना भक्तिं विना केवलं ज्ञानस्याकिञ्चित्करत्वात् तत्रापि च "तस्मान् मद्भक्तियुक्तस्य" (भा० ११।२०।३१) इत्यादौ भक्तेस्तन्निरपेक्षत्वात् "यत् कर्मभिर्यत् तपसा" (भा० ११।२०।३२) इत्यादावानुषङ्गिकसर्वफलत्वाच्च ज्ञानमपि न्यक्कृतम् ।
ततोऽवशिष्टायां सविशेषोपासनारूपायां भक्तौ च श्रीविष्णुरूपमबहुमन्यमानाः केचिन् निराकारेश्वरस्यान्याकारेश्वरस्य चोपासनां यां मन्यन्ते सापि न्यक्कृतास्ति । यतो हिरण्यकशिपोरपि "नित्य आत्माव्ययः शुद्धः" (भा० ७।२।२२) इत्यादितद्वाक्येन "यदृच्छयेशः सृजतीदमव्ययः" (भा० ७।२।३९) इत्यादितदुदाहृतेतिहासवाक्येन तेन कृतब्रह्मस्तवेन च ब्रह्मज्ञानं निराकारेश्वरज्ञानमन्याकारेश्वरज्ञानं च तस्यास्तीति वर्ण्यते । श्रीविष्णौ देवतासामान्यदृष्टेर्निन्द्यते च स इति ।
तथान्यत्राहङ्ग्रहोपासना च न्यक्कृता पौण्ड्रकवासुदेवादौ यदुभिरिव शुद्धभक्तैरुपहास्यत्वात् "सालोक्यसार्ष्टिसामीप्य" (भा० ३।२९।१३) इत्यादिषु तत्फलस्य हेयतया निर्देशात् ।
तदुक्तं श्रीहनुमता "को मूढो दासतां प्राप्य प्राभवं पदमिच्छति" इति ।
तदेतत् सर्वमभिप्रेत्य निष्किञ्चनां भक्तिमेव तादृशभक्तप्रशंसाद्वारेण सर्वोर्ध्वमुपदिशति (भा० ११।२०।३४) —

न किञ्चित् साधवो धीरा भक्ता ह्येकान्तिनो मम ।
वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥ ५१० ॥

टीका च — "धीरा धीमन्तः । यतो ममैकान्तिनो मय्येव प्रीतियुक्ताः । अतो मया दत्तमपि न गृह्णन्ति किं पुनर्वक्तव्यं न वाञ्छन्तीत्यर्थः । अपुनर्भवमात्यन्तिकमपि कैवल्यम्" इत्येषा ।
ईदृशानामेकान्तिनामेव परममहिमा गारुडे —

ब्राह्मणानां सहस्रेभ्यः सत्रयाजी विशिष्यते ।
सत्रयाजिसहस्रेभ्यः सर्ववेदान्तपारगः ॥ ५११ ॥
सर्ववेदान्तवित्कोट्यां विष्णुभक्तो विशिष्यते ।
वैष्णवानां सहस्रेभ्य एकान्त्येको विशिष्यते ॥ ५१२ ॥ इति ।

१७७ । यस्मादेवं सर्वानन्दातिक्रमलिङ्गेन परमानन्दस्वरूपासौ भक्तिस्तस्मात् तत्र स्वभावत एव प्रवृत्तिर्गुणस्तथाभूतामपि तन्माधुरीं स्वदोषेणानुभवितुमसमर्थानां तु केवलविधिनिषेधसम्भवगुणदोषदृष्ट्यैव प्रवृत्तिरपि पूर्वापेक्षया दोष एव ।
यथोक्तमेतत् पूर्वाध्याये "शमो मन्निष्ठताबुद्धेः" (भा० ११।१९।३६) इत्यादौ साक्षाद्भक्तेरपि विधानाविधानयोर्गुणदोषताम् "किं वर्णितेन बहुना" (भा० ११।१९।४५) इत्यन्तेन ग्रन्थेन प्रतिपाद्य "गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः" (भा० ११।१९।४५) इति लब्धतन्माधुर्यानुभवानां तद्विधिनिषेधकृतगुणदोषौ नस्त एवेत्याह (भा० ११।२०।३६) —

न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः ।
साधूनां समचित्तानां बुद्धेः परमुपेयुषाम् ॥ ५१३ ॥

टीका च — "गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापादयः" इत्येषा ॥ श्रीभगवान् ॥

१७८ । इयमकिञ्चनाख्या भक्तिरेव जीवानां स्वभावत उचिता । स्वाभाविकतदाश्रया हि जीवाः "स कारणं करणाधिपाधिपः" (श्वे० उ० ६।९) इति श्रुतेः ।
अंशत्वेऽपि बहिरङ्गत्वस्वीकारात् तदाश्रयत्वं सूर्यमण्डलबहिरातपपरमाणूनामिव ।
अत एव पाद्मोत्तरखण्डे प्रणवव्याख्याने —

अकारश्चाप्युकारश्च मकारश्च ततः परम् ।
वेदत्रयात्मकं प्रोक्तं प्रणवं ब्रह्मणः पदम् ॥ ५१४ ॥
अकारेणोच्यते विष्णुः श्रीरुकारेण चोच्यते ।
मकारस्तु तयोर्दासः पञ्चविंशः प्रकीर्तितः ॥ ५१५ ॥

अन्ते च "भगवच्छेषरूपोऽसौ मकाराख्यः सचेतनः" इति ।
तथा —

अवधारणवाच्येव उकारः कैश्चिदिष्यते ।
श्रीश्च तत्पक्षपातित्वादकारेणैव चोच्यते ।
भास्करस्य प्रभा यद्वत् तस्य नित्यानपायिनी ॥ ५१६ ॥

अत एव श्रीवैष्णवानां प्रणव एव महावाक्यमिति स्थितम् । तथाष्टाक्षरव्याख्याने —

श्रीमते विष्णवे तस्मै दास्यं सर्वं करोम्यहम् ।
देशकालाद्यवस्थासु सर्वासु कमलापतेः ॥ ५१७ ॥
इति स्वरूपसंसिद्धं मुख्यं दास्यमवाप्नुयात् ।
एवं विदित्वा मन्त्रार्थं तद्वृत्तिं सम्यगाचरेत् ॥ ५१८ ॥
दासभूतमिदं तस्य जगत् स्थावरजङ्गमम् ।
श्रीमन्नारायणः स्वामी जगतां प्रभुरीश्वरः ॥ ५१९ ॥

तदेतदाहुः (भा० १०।८७।२०) —

स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं तव पुरुषं वदन्त्यखिलशक्तिधृतोऽंशकृतम् ।
इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः ॥ ५२० ॥

स्वेन त्वया कृतेषु पुरेषु देहेषु वर्तमानं तव पुरुषं जनं तवैवांशरूपेण त्वदीयस्वरूपेण कृतं नित्यसिद्धं वदन्ति ।
तत्र "अखिलशक्तिधृतस्तव" इत्युक्त्वा तदखिलशक्तिगुणान्तःपातिजीवाख्यतटस्थशक्तिविशिष्टस्यैव तवांशः । न तु स्वरूपशक्तिविशिष्टस्य केवलस्वरूपस्येत्यायातम् । ततो मूलमण्डलस्थानीयत्वदाश्रयकरश्मिपरमाणुस्थानीया जीवा इति भावः ।
अंशत्वे हेतुः — अबहिरन्तरसंवरणं बहिरन्तश्च यस्य संवरणं नास्ति किन्तु तैस्तैरुपाधिभिः संवरणमेवास्तीत्यर्थः । अतः संवरणहीनस्य तवायमंश एवेति भावः ।
इति एतत्प्रकारां नुर्जीवस्य गतिं स्वभावत एव त्वदाश्रयकस्त्वदेकजीवनश्चासौ जीव इति तत्त्वं विविच्य ज्ञात्वा कवयः पण्डिता विश्वसिताः श्रद्दधाना भवत एवाङ्घ्रिमुपासते ।
विश्वासे हेतुः — निगमावपनं सकलवेदबीजोज्जीवनैकाश्रयक्षेत्रं शास्त्रयोनिमित्यर्थः ।
अतो नित्यत्वदाश्रयैकजीवनानामपि तेषां त्वद्वैमुख्येन यत् संसारदुःखं भवति तदपि साम्मुख्येन स्वयमेव पलायत इत्याहुः — अभवमिति न विद्यते भवः संसारो यत्रेति ।
अथवा भजनीयस्य नित्यत्वेन भक्तेरप्यनश्वरत्वं प्रतिपादयन्ति — अभवं जन्मरहितमङ्घ्रिमिति । तस्मादकिञ्चानाख्या भक्तिरेव सर्वोर्ध्वमभिधेया ॥ श्रुतयः श्रीभगवन्तम् ॥

१७९ । अथ तस्या एव प्रकारान्तरेण स्थापनाय प्रकरणान्तरं यावत्तल्लक्षणप्रकरणम् ।
तदेवं परमदुर्लभस्वरूपं परमदुर्लभफलं चाकिञ्चनाख्यसाक्षाद्भक्तिरूपं साम्मुख्यं कथं स्यादिति वक्तुं साम्मुख्यमात्रस्य निदानमुपलक्षयति (भा० १०।५१।५३) —

भवापवर्गो भ्रमतो यदा भवेज् जनस्य तर्ह्यच्युत सत्समागमः ।
सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥ ५२१ ॥

यदा भ्रमतः संसरतो जनस्य भवापवर्गो भवेत् सम्प्राप्तकालः स्यात् तदा सत्सङ्गमो भवेत् । अत्र च यदा सत्सङ्गमो भवेत् तदा भवापवर्गो भवेदिति वक्तव्ये वैपरीत्येन निर्देशस्तत्र सत्सङ्गमस्य शीघ्रतयावश्यकतया च हेतुत्वविवक्षया ।

अत एवातिशयोक्तिनामालङ्कारस्य चतुर्थो भेदोऽयमित्यालङ्कारिकाः । तदुक्तं तद्विवृत्तौ "चतुर्थी सा कारणस्य गदितुं शीघ्रकारिताम् । या हि कार्यस्य पूर्वोक्तिः" इति ।
तथोक्तं नलकूबरमणिग्रीवौ प्रति श्रीभगवता (भा० १०।१०।४१) —

साधूनां समचित्तानां सुतरां मत्कृतात्मनाम् ।
दर्शनान् नो भवेद् बन्धः पुंसोऽक्ष्णोः सवितुर्यथा ॥ ५२२ ॥ इति ।

तत्र हेतुः — यर्हि यदा सत्सङ्गमस्तदैव परावरेशे त्वयि मतिर्भवति । तद्वैमुख्यकरानादि-सिद्धतज्ज्ञानसंसर्गाभावान्ते तत्साम्मुख्यकरं तज्ज्ञानं जायत इत्यर्थः । अत एवोक्तं श्रीवि-दुरेण (भा० ३।५।३) —

जनस्य कृष्णाद् विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ।
अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्य ॥ ५२३ ॥

अत्र दैवात् प्राचीनकर्मणो हेतोस्तदावेशादधर्मशीलस्य भगवद्धर्मरहितस्येत्यर्थः ।
मूलपद्ये "यर्हि तदैव" इति निर्देशान् न कालविलम्बेन । तत्र चैवकारान् नान्यदा कदाचि-दपीत्यर्थः ।
तेन तन्मतौ हेतुः — सद्गतौ यत्र यत्र सन्तः सङ्गच्छन्ते तत्र तत्र गतिः स्फुरणं यस्य तस्मिं-स्त्वयीति । तथा चेतिहाससमुच्चये —

यत्र रागादिरहिता वासुदेवपरायणाः ।
तत्र सन्निहितो विष्णुर्नृपते नात्र संशयः ॥ ५२४ ॥ इति ।

सतां गतावित्यत्र व्याखानेऽपि असतां त्वसौ न गतिः । अतस्तद्द्वारैवान्येषां तल्लाभो युक्त इति पूर्ववदेव ।
पिङ्गलाया अपि सत्सङ्गः "विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः" (भा० ११।८।३४) इत्यत्र व्यक्तोऽस्ति ।
टीका च — "सत्सङ्गतौ सत्यामप्यहो मम मोह इत्याह 'विदेहानाम्' इति" इत्येषा ।
तदेवं यत्र नोपलभ्यते सत्सङ्गस्तत्राप्याधुनिकः प्राक्तनो वा पारम्परिको वानुमेय एव ।
अत्र कृतश्रीनारदादिदर्शनादेरपि देवतादेः श्रीनलकूबरादिवत् तादृशत्वप्राप्तिर्न श्रूयत इत्यत एवं विवेचनीयम् — यद्यप्यपराधसद्भावो वर्तते पुरुषे तदा तद्दोषेण सत्सु निरादरा-णां साधारणपुण्यादिदृष्टीनां च तद्दोषशान्त्यर्थं सत्सङ्गस्य भगवत्साम्मुख्यकारणत्वेऽपि तत्कृपासाहाय्यमपेक्ष्यते । निरपराधत्वे सति सत्सङ्गेनैव जातपरमोत्तमदृष्टीनां तु तेषां मनोऽवधानाभावेऽपि सत्सङ्गमात्रं तत्कारणमिति ।
अतः सापराधानेवाधिकृत्योक्तमजानजदेवैः (भा० ३।५।४४) —

तान् वै ह्यसद्वृत्तिभिरक्षिभिर्ये पराकृतान्तर्मनसः परेश ।
अथो न पश्यन्त्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥ ५२५ ॥ इति ।

ते तव पदन्यासविलासलक्ष्म्याः सम्बन्धिनो ये भक्ता इत्यर्थः । ते तान् नूनं प्रायो न पश्यन्ति न कृपादृष्टिविषयीकुर्वन्तीत्यर्थः । कान् ? य असद्वृत्तिभिः सापराधचेष्टैरक्षिभिरिन्द्रियैः पराकृतान्तर्मनसो दूरीकृतान्तर्मुखचित्तवृत्तयो बहिर्मुखा इत्येवं व्याख्यानमत्राप्यनुसन्धेयम् ।

अत्र साधारणासद्वृत्तित्वं न गृह्यते । सर्वस्य तत्कृपायाः प्राक् तथाभूतत्वात् "जनस्य कृष्णाद् विमुखस्य दैवात्" (भा० ३।५।३) इत्यादिकमविषयं स्यादिति ।

तस्मादनपराधासद्वृत्तौ तेषां कृपा प्रवर्तत एव । कथञ्चिदवधानाभावेन तदप्रवृत्तावपि सङ्गमात्रेणैव तेषां सन्मतिः स्यात् । यत्र तु सापराधेऽपि स्वैरतयैव कृपां कुर्वन्ति तस्यैव तन्मतिः स्यान् नान्यस्य नलकूबरवत् साधारणदेवतावच् चेति ।

तथा श्रीभरतस्य रहूगणे यथा चोपरिचरवसोर्वृत्तं विष्णुधर्मे । स हि देवसाहाय्यायैव दैत्यान् हत्वा विरज्य च भगवदनुध्यानाय पातालं च प्रविष्टवान् । तं च निवृत्तमपि हन्तुं लब्धच्छिद्रा दैत्याः समागत्य तत्प्रभावेणोद्यतशस्त्रा एवातिष्ठन् । ततश्च व्यर्थोद्यमाः पुनः शक्रोपदेशेन तं प्रति पाषण्डमार्गमुपदिशन्तोऽपि जातया तत्कृपया भगवद्भक्ता बभूवुरिति । अत उक्तं विष्णुधर्म एव —

> अनेकजन्मसंसारचिते पापसमुच्चये ।
> नाक्षीणे जायते पुंसां गोविन्दाभिमुखी मतिः ॥ ५२६ ॥ इति ।

ननु "नैतान् विहाय कृपणान् विमुमुक्ष एको नान्यस्त्वदस्य शरणं भ्रमतोऽनुपश्ये" (भा० ७।९।४४) इत्येवं श्रीप्रह्लादस्य सर्वस्मिन्नपि संसारिणि कृपा जाता तर्हि कथं न सर्वमुक्तिः स्यात् ?

उच्यते — जीवानामनन्तत्वान् न ते सर्वे मनसि तस्यारूढास्ततो यावन्तो दृष्टश्रुतास्तच्चेतस्यारूढास्तावतां तत्प्रसादाद् भविष्यत्येव मोक्षः । नैतानित्येतच्छब्दप्रयोगात् ।

ये चान्ये तेषामपि तत्कीर्तनस्मरणमात्रेणैव कृतार्थतावरं स्वयमेव कृपया दत्तवान् श्रीनृसिंहदेवः (भा० ७।१०।१४) —

> य एतत् कीर्तयेन् मह्यं त्वया गीतमिदं नरः ।
> त्वां च मां च स्मरन् काले कर्मबन्धात् प्रमुच्यते ॥ ५२७ ॥ इति ।

यस्त्वां कीर्तयेदपि किं पुनस्त्वं यान् कृपया स्मरसीति भावः । तस्मात् साधूक्तम् "भवापवर्गो भ्रमतो यदा भवेत्" इति ॥ मुचुकुन्दः श्रीभगवन्तम् ॥

१८० । ततः सत्सङ्गस्यैव तत्र निदानत्वं सिद्धम् । तच्च युक्तम् । अनादिसिद्धतदज्ञानमयतद्वैमुख्यवतामन्यथा हि तदसम्भवः ।

तदुक्तम् (म० भा० ३।३१३।११७) —

> तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नासावृषिर्यस्य मतं न भिन्नम् ।
> धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ॥ ५२८ ॥ इति ।

तथैव श्रीप्रह्लादवाक्यम् "मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम्" (भा० ७।५।३०) इत्युपक्रम्य (भा० ७।५।३२) —

> नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ।
> महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥ ५२९ ॥ इति ।

तथा तद्विमुखकर्मादिभिस्तत्साम्मुख्यप्रतिपत्तेश्चात्यन्तायोगः "अन्यत्र धर्मादन्यत्राधर्माद-न्यत्रास्मात् कृताकृतादन्यत्र भूताच्च भव्याच् च" (क० उ० १।२।१४) इति श्रुत्यादेः ।
"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण दानेन तपसाऽनाशकेन" (बृ० आ० उ० ४।४।२२) इति श्रुत्यादिकं तु तत्साम्मुख्येनैव प्रयुक्तानि कर्माण्यभिदधाति ।
तर्हि तदेव साम्मुख्यं कथं स्यादिति पुनरपि हेतुरेव प्रष्टव्यः स्यात् ।
अथ भगवत्कृपैव तत्साम्मुख्ये प्राथमिकं कारणमिति च गौणम् । सा हि संसारदुरन्तानन्तसन्तापसन्तप्तेष्वपि तद्विमुखेषु स्वतन्त्रा न प्रवर्तते तदसम्भवात् ।
कृपारूपश्चेतोविकारो हि परदुःखस्य स्वचेतसि स्पर्शे सत्येव जायते । तस्य तु सदा परमानन्दैकरसत्वेनापहतकल्मषत्वेन च श्रुतौ जीवविलक्षणत्वसाधनात् तेजोमालिनस्तिमिरायोगवत् तच्चेतस्यापि तमोमयदुःखस्पर्शनासम्भवेन तत्र तस्या जन्मासम्भवः । अत एव सर्वदा विराजमाणेऽपि कर्तुमकर्तुमन्यथा कर्तुं समर्थे तस्मिंस्तद्विमुखानां न संसारसन्तापशान्तिः ।
अतः सत्कृपैवावशिष्यते । सन्तोऽपि तदानीं यद्यपि सांसारदुःखैर्न स्पृश्यन्त एव तथापि लब्धजागराः स्वप्नदुःखवत्त्वे कदाचित् स्मरेयुरपीत्यतस्तेषां संसारिकेऽपि कृपा भवति यथा श्रीनारदस्य नलकूबरमणिग्रीवयोः ।
तस्मात् प्रस्तुतेऽपि सांसारिकदुःखस्य तद्धेतुत्वाभावात् । परमेश्वरकृपा तु स एवात्र मम शरणमित्यादिदैन्यात्मकभक्तिसम्बन्धेनैव जायते यथा गजेन्द्रादौ व्यतिरेके नारक्यादौ ।
भक्तिर्हि भक्तकोटिप्रविष्टतदार्द्रीभावयितृतच्छक्तिविशेष इति विवृतं विवरिष्यते च । दैन्यसम्बन्धेन च साधिकमुच्छलिता भवतीति तत्र तदाधिक्यम् । तस्माद् या कृपा तस्य सत्सु वर्तते सा सत्सङ्गवाहनैव वा सत्कृपावाहनैव वा सती जीवान्तरे सङ्क्रमते न स्वतन्त्रेति स्थितम् ।
तथैव चाहुः (भा० १०।२।३१) —

> स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसौहृदाः ।
> भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥ ५३० ॥

हे द्युमन् ! स्वप्रकाश ! भवत्पदाम्भोरुहलक्षणा या नौर्भवार्णवतरणोपायस्तामत्र भवार्णवपारे निधाय उत्तरोत्तरजनेषु प्रकाश्येत्यर्थः ।
ननु कथं तां न स्वयं प्रकाशयामि ? कथमिव तेषामपेक्षा ? तत्राह — सद्भिरेव द्वारभूतैरन्याननुगृह्णाति यः स सदनुग्रहो भवानिति । यद्वा सन्त एवानुग्रहो यस्य सः । तवानुग्रहो यः प्रापञ्चिके चरति स तदाकारतयैव चरति नान्यरूपतयेत्यर्थः ।

तथोक्तं श्रीरुद्रगीते (भा० ४।२४।५८) —

> अथानघाङ्घ्रेस्तव कीर्तितीर्थयोरन्तर्बहिःस्नानविधूतपाप्मनाम् ।
> भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात् सङ्गमोऽनुग्रह एष नस्तव ॥ ५३१ ॥ इति ।

सत्स्वनुग्रहो यस्येति व्याख्यानेऽपि तद्विमुखेष्वसत्सु तवानुग्रहो नास्तीति प्राप्तेः सद्वारैव तत् प्रकाशनमुचितमित्येवायाति ।
तदेवम् —

> जायमानं हि पुरुषं पश्येद् यं मधुसूदनः ।
> सात्त्विकः स तु विज्ञेयो भवेन् मोक्षार्थनिश्चितः ॥ ५३२ ॥

इति मोक्षधर्मवचनमपि सत्सङ्गानन्तरजन्मपरमेव बोद्धव्यम् ॥ देवाः श्रीभगवन्तम् ॥

१८१ । ततः सत्सङ्गहेतुश्च सतां स्वैरचारितैव नान्यः । यथाह "त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया" (भा० ११।२।२४) इति ।
ते नवयोगेश्वरा यदृच्छया स्वैरतया न तु हेत्वन्तरप्रयुक्ततयेत्यर्थः "यदृच्छा स्वैरिता" इत्यमरः ।
सत्सु परमेश्वरप्रयोक्तृत्वं च सदिच्छानुसारेणैव । तदुक्तम् "स्वेच्छामयस्य" (भा० १०।१४।२) इति "अहं भक्तपराधीनः" (भा० ९।४।६३) इति च ॥ श्रीनारदः ॥

१८२ । तथा च (भा० ६।१४।१४) —

> तस्यैकदा तु भवनमङ्गिरा भगवानृषिः ।
> लोकाननुचरन्नेतानुपागच्छद् यदृच्छया ॥ ५३३ ॥

तस्य चित्रकेतोः ।
अत्रापि तदैव तस्य साम्मुख्यं जातम् । कालान्तरे तु प्रादुर्भूतमिति मन्तव्यम् । अत एव तद्विलापसमये श्रीमताङ्गिरसैव सम्प्रति "ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति" (भा० ६।१५।१९) इत्युक्तम् ॥ श्रीशुकः ॥

१८३ । सतां कृपा च दुरवस्थादर्शनमात्रोद्भवा न स्वोपासनाद्यपेक्षा यथा श्रीनारदस्य नलकूबरमणिग्रीवयोः । तदाह (भा० ११।२।६) —

> भजन्ति ये यथा देवान् देवा अपि तथैव तान् ।
> छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥ ५३४ ॥

स्पष्टम् ॥ श्रीमानानकदुन्दुभिः ॥

१८४ । सत्सङ्गस्यैव परमसंस्कारहेतुत्वात् तदर्थं न पुरुषस्य संस्कारहेत्वन्तरमपेक्ष्यं च ।
यत आह (भा० १०।८४।११) —

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ५३५ ॥ इति ।

ते कथं नाद्रियन्ते गौणत्वात् ? इत्याह "ते पुनन्ति" इति ॥ श्रीभगवान् मुनिवर्गम् ॥

१८५ । तदेवं सत्सङ्गमात्रस्य तत्साम्मुख्यमात्रे निदानत्वमुक्तम् । एतदेव व्यतिरेकेणाह (भा० ५।१२।११-१२) —

ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यम् ।
प्रत्यक् प्रशान्तं भगवच्छब्दसञ्ज्ञं यद् वासुदेवं कवयो वदन्ति ॥ ५३६ ॥
रहूगणैतत् तपसा न याति न चेज्यया निर्वपणाद् गृहाद्वा ।
न छन्दसा नैव जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥ ५३७ ॥

टीका च — "तर्हि किं सत्यम् ? तत्राह — ज्ञानं सत्यम् । व्यवहारिकसत्यत्वं व्यावर्तयति परमार्थम् ।

"वृत्तिज्ञानव्यवच्छेदार्थानि षड्विशेषणानि — विशुद्धं तत् तु आविद्यकम् । एकं तत् तु नानारूपम् । अनन्तरं त्वबहिर्बाह्याभ्यन्तरशून्यं तत् तु विपरीतम् । ब्रह्म परिपूर्णं तत् तु परिच्छिन्नम् । प्रत्यक् तत् तु विषयाकारम् । प्रशान्तं निर्विकारं तत् तु सविकारम् । तदेवं स्वरूपं ज्ञानं सत्यमित्युक्तम् ।

"कीदृशं तत् ? ऐश्वर्यादिषड्गुणत्वेन भगवच्छब्दः सञ्ज्ञा यस्य । यच्च ज्ञानं वासुदेवं वदन्ति ।

"तत्प्राप्तिश्च महत्सेवां विना न भवतीत्याह — हे रहूगण ! एतज्ज्ञानं तपसा पुरुषो न याति । इज्यया वैदिककर्मणा निर्वपणादन्नादिसंविभागेन गृहाद्वा तन्निमित्तपरोपकारेण छन्दसा वेदाभ्यासेन जलाग्न्यादिभिरुपासितैः" इत्येषा ।

अत्र ब्रह्मत्वादिना जीवस्वरूपं सूक्ष्मत्वादिधर्मकं ज्ञानमपि निरस्तं वेदितव्यम् ॥ श्रीब्राह्मणो रहूगणम् ॥

१८६ । तदेवं सत्सङ्ग एव तत्साम्मुख्यद्वारमित्युक्तम् । ते च सन्तस्तत्सम्मुखा एवात्र गृह्यन्ते न तु वैदिकाचारमात्रपरा अनुपयोगित्वात् । तत्र यादृशः सत्सङ्गस्तादृशमेव साम्मुख्यं भवतीति वक्तुं तेषु सत्सु ये महान्तस्तेषां द्वैविध्यमाह सार्धेन (भा० ५।५।२-३) —

महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥
ये वा मयीशे कृतसौहृदार्था जनेषु देहम्भरवार्तिकेषु ।
गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥ ५३८ ॥

ये समचित्ता निर्विशेषब्रह्मनिष्ठास्ते महान्तस्तेषां शीलमाह — प्रशान्ता इत्यादि । महद्विशेषमाह — ये वेति । वाशब्दः पक्षान्तरे । उत्तरपक्षत्वादस्यैव श्रैष्ठ्यम् ।

मयि कृतं सिद्धं यत् सौहृदं प्रेम तदेवार्थः परमपुरुषार्थो येषां तथाभूता ये ते महान्त इति पूर्वेणान्वयः ।
यतो मयि सौहृदार्थास्तत एव देहम्भरवार्त्तिकेषु विषयवार्तानिष्ठेषु जनेषु तथा गेहेषु जायात्मजबन्धुवर्गयुक्तेषु न प्रीतियुक्ताः किन्तु यावदर्था यावानर्थः श्रीभगवद्भजनानुरूपं प्रयोजनं तावानेवार्थो धनं येषां तथाभूता इत्यर्थः ।
उभयोर्महत्त्वं च महाज्ञानित्वान् महाभागवतत्वाच्च न तु द्वयोः साम्याभिप्रायेण "मुक्तानामपि सिद्धानां नारायणपरायणः" (भा० ६।१४।५) इत्याद्युक्तेः ।
अत्र ज्ञानमार्गे ब्रह्मानुभविनो महान्तो भक्तिमार्गे लब्धभगवत्प्रेमाणो महान्त इति लक्षणसामान्यमिति ज्ञेयम् ॥ श्रीऋषभः स्वपुत्रान् ॥

१८७ । अत्र चैवं विवेचनीयम् । तत्तन्मार्गे सिद्धा महान्तो द्विविधा दर्शिताः । अत्र च ज्ञानसिद्धाः "देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत् स्वरूपम्" (भा० ११।१३।३६) इत्यादौ वर्णिताः ।
अथ भक्तिसिद्धास्त्रिविधाः — प्राप्तभगवत्पार्षददेहाः । निर्धूतकषायाः । मूर्च्छितकषायाश्च । यथा श्रीनारदादयः श्रीशुकदेवादयः प्राग्जन्मगतनारदादयश्च (भा० १।६।२९) —

> प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् ।
> आरब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिकः ॥ ५३९ ॥ इत्यादौ ।

"स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारः" (भा० १२।१२।६९) इत्यादौ ।
भा० १।६।२२ —

> हन्तास्मिन् जन्मनि भवान् मा मां द्रष्टुमिहार्हति ।
> अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम् ॥ ५४० ॥

इत्यादौ च प्रसिद्धेः ।
श्रीनारदस्य पूर्वजन्मनि स्थितकषायस्य प्रेम वर्णितं स्वयमेव (भा० १।६।१८) —

> प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः ।
> आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने ॥ ५४१ ॥

श्रीभरत एवात्रोदाहरणीयः । तस्य च भूतपिपालयिषारूपः प्रारब्धालम्बनः सात्त्विककषायो निगूढ आसीत् प्रेमा च वर्णित इति ।
तदेवं समानप्रेम्णि त्रिविधे पूर्वपूर्वाधिक्यं ज्ञेयम् । क्वचित् स्थितेऽपि प्राकृतदेहादित्वे यदि प्रेम्णः परिमाणतः स्वरूपतो वाधिक्यं दृश्यते तदा प्रेमाधिक्येनैवाधिक्यं ज्ञेयम् । तच्च

भजनीयस्य भगवतोऽंशांशित्वभेदेन भजतश्च दास्यसख्यादिभेदेन स्वरूपाधिक्यं प्रेमाङ्कुरप्रेमादिभेदेन परिमाणाधिक्यं च प्रीतिसन्दर्भे विवृत्य दर्शयिष्यामः ।
साक्षात्कारमात्रस्यापि यद्यपि पुरुषप्रयोजनत्वं तथापि तस्मिन्नपि साक्षात्कारे यावान् यावान् श्रीभगवतः प्रियत्वधर्मानुभवस्तावांस्तावानुत्कर्षः ।
निरुपाधिप्रीत्यास्पदतास्वभावस्य प्रियत्वधर्मानुभवं विना तु साक्षात्कारोऽप्यसाक्षात्कार एव । माधुर्यं विना दुष्टजिह्वया खण्डस्येव ।
अत एवोक्तं श्रीऋषभदेवेन "प्रीतिर्न यावन् मयि वासुदेवे न मुच्यते देहयोगेन तावत्" (भा० ५।५।६) इति ।
ततः प्रेमतारतम्येनैव भक्तमहत्तारतम्यं मुख्यम् । अत एव "मयीशे कृतसौहृदार्थाः" (भा० ५।५।३) इत्येव तल्लक्षणत्वेनोक्तम् ।
यत्र तु प्रेमाधिक्यं साक्षात्कारः कषायादिराहित्यादिकमप्यस्ति स परमो मुख्यः । तत्रैकैकाङ्गवैकल्ये न्यूनन्यून इति ज्ञेयम् । तदेवम् "ये वा मयीशे" (भा० ५।५।७) इत्यादिना ये उक्तास्ते तु प्राप्तपार्षददेहा न भवन्ति तथा विषयवैराग्येऽपि गूढं संस्कारवन्तोऽपि सम्भवन्ति ।
ततस्तद्विवेचनाय प्रकरणान्तरमुत्थाप्यते । यथा राजोवाच (भा० ११।२।४४) —

अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणाम् ।
यथाचरति यद् ब्रूते यैर्लिङ्गैर्भगवत्प्रियः ॥ ५४२ ॥

अथ अनन्तरं भागवतं ब्रूत । तज्ज्ञानार्थं स च नृणां मध्ये यद्धर्मो यत्स्वभावस्तं स्वभावं ब्रूत । यथा च स आचरत्यनुतिष्ठति तदनुष्ठानं ब्रूत । यद् ब्रूते तद्वचनं च ब्रूतेति मानसकायिकवाचिकलिङ्गपृच्छा ।
ननु पूर्वम् "शृण्वन् सुभद्राणि रथाङ्गपाणेः" (भा० ११।२।३९) इत्यादिना ग्रन्थेन तत्तल्लिङ्गं श्रीकविनैवोक्तम् ?
सत्यम् । तथापि पुनस्तदनुवादेन तेषु लिङ्गेषु यैर्लिङ्गैः स भगवत्प्रियो यादृश उत्तममध्यमतादिभेदविविक्तो भवति तानि लिङ्गानि विविच्य ब्रूतेत्यर्थः ॥

१८८ । तत्रोत्तरं श्रीहविरुवाच (भा० ११।२।४५) —

सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ५४३ ॥

तत्र तत्तदनुभावद्वारावगम्येन मानसलिङ्गेन महाभागवतं लक्षयति — सर्वभूतेष्विति "एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः" (भा० ११।२।४०) इति श्रीकविवाक्योक्तरीत्या यश्चित्तद्रवहासरोदनाद्यनुभावकानुरागवशत्वात् "खं वायुमग्निम्" (भा० ११।२।४१) इत्यादितदुक्तप्रकारेणैव चेतनाचेतनेषु सर्वभूतेष्वात्मनो भगवद्भावमात्माभीष्टो यो भगवदाविर्भावस्तमेवेत्यर्थः ।

पश्येदनुभवति । अतस्तानि च भूतानि आत्मनि स्वचित्ते तथा स्फुरति यो भगवान् तस्मिन्नेव तदाश्रिततत्वेनैवानुभवति । एष भागवतोत्तमो भवति ! इत्थमेव श्रीव्रजदेवीभिरुक्तम् "वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः" (भा० १०।३५।९) इत्यादि ।

यद् वात्मनो यो भगवति भावः प्रेमा तमेव चेतनाचेतनेषु भूतेषु पश्यति । शेषं पूर्ववत् । अत एव भक्तरूपतदधिष्ठानबुद्धिजातभक्त्या तानि नमस्करोतीति "खं वायुम्" इत्यादौ पूर्वमुक्तमिति भावः । तथैव चोक्तं ताभिरेव "नद्यस्तदा तदुपधार्य मुकुन्दगीतमावर्तलक्षितमनोभवभग्नवेगाः" (भा० १०।२१।१५) इत्यादि ।

यद्वा श्रीपट्टमहिषीभिरपि "कुररि विलपसि त्वम्" (भा० १०।९०।१५) इत्यादि ।

अत्र न ब्रह्मज्ञानान्यभिधीयते भागवतैस्तज्ज्ञानस्य तत्फलस्य च हेयत्वेन जीवभगवद्विभागाभावेन च भागवतत्वविरोधात् "अहैतुक्यव्यवहिता" (भा० ३।२९।१२) इत्यादिकात्यन्तिकभक्तिलक्षणानुसारेण सुतरामुत्तमत्वविरोधाच्च ।

न च निराकारेश्वरज्ञानम् "प्रणयरसनया धृताङ्घ्रिपद्मः" (भा० ११।२।५५) इत्युपसंहारगतलक्षणपरमकाष्ठाविरोधादेवेति विवेचनीयम् ॥

१८९ । अथ मानसलिङ्गविशेषणेनैव मध्यमभागवतं लक्षयति (भा० ११।२।४६) —

> ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
> प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ५४४ ॥

परमेश्वरे प्रेम करोति तस्मिन् भक्तियुक्तो भवतीत्यर्थः । तथा तदधीनेषु भक्तेषु च मैत्रीं बन्धुभावम् । बालिशेषु तद्भक्तिमजानत्स्वुदासीनेषु कृपाम् । यथोक्तं श्रीप्रह्लादेन "शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान्" (भा० ७।९।४३) इति । आत्मनो द्विषत्सु उपेक्षा तदीयद्वेषे चित्ताक्षोभेनौदासीन्यमित्यर्थः । तेष्वपि बालिशत्वेन कृपांशसद्भावात् यथैव श्रीप्रह्लादो हिरण्यकशिपौ । भगवतो भागवतस्य वा द्विषत्सु तु सत्यपि चित्तक्षोभे तत्रानभिनिवेशमित्यर्थः ।

अस्य बालिशेषु कृपाया एव स्फुरणं द्विषत्सूपेक्षाया एव न तु प्राग्वत् सर्वत्र तस्य तत्प्रेम्णो वा स्फुरणम् । ततो मध्यमत्वम् ।

अथोत्तमस्यापि तदधीनदर्शनेन तत्स्फुरणानन्दादयो विशेषत एव । ततश्च तस्मिन्नधिकैव मैत्री यद् भवति तन् नो निषिध्यते किन्तु सर्वत्र तद्भावावश्यकता विधीयते । परमोत्तमोत्तमेऽपि तथा दृष्टम् (भा० ४।२४।५७) —

> क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् ।
> भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ ५४५ ॥ इति ।

"अथ भागवता यूयं प्रियाः स्थ भगवान् यथा" (भा० ४।२४।३०) इति च श्रीरुद्रगीतात् ।
भा० १।७।११ —

हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः ।
अध्यगान् महदाख्यानं नित्यं विष्णुजनप्रियः ॥ ५४६ ॥ इति सूतवाक्याच्च ।

एवम् "भोजानां कुलपांसनः" (भा० १०।१।३५) इत्यादौ तत्र बादरायणिप्रभृतीनां द्वेषोऽपि दृश्यते ।
किन्तु मध्यमानां तत्रानभिनिवेश एव स्फुरति । तेषां तु तत्रापि तद्विधशास्तृत्वेन निजाभीष्टदेवपरिस्फूर्तिर्न व्याहन्यत एवेति विशेषः ।
तद्दृष्ट्यैव च श्रीमदुद्धवादीनामपि दुर्योधनादौ नमस्कारः "सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः" (भा० ४।३।२३) इत्यादि श्रीशिववाक्यवत् ।
उक्तं च लक्ष्मणाहरणे "सोऽभिवन्द्याम्बिकापुत्रम्" (भा० १०।६८।१७) इत्यादौ दुर्योधनं चेति ।
यत्र पक्षे च स्वकीयभावस्यैव सर्वत्र परिस्फूर्तेः श्रीभगवदादिद्विषत्स्वपि सा पर्यवस्यति तत्र च नायुक्तता यतस्ते निजप्राणकोटिनिर्मञ्छनीयतच्चरणपङ्कजपरागलेशास्तेषां दुर्व्यवहारदृष्ट्या क्षुभ्यन्ति ।
स्वीयभावानुसारेण त्वेवं मन्यन्ते — अहो ईदृशश्चेतनो वा कः स्याद् यः पुनरस्मिन् सर्वानन्दकन्दकदम्बे निरुपाधिपरमप्रेमास्पदे सकललोकप्रसादकसद्गुणमणिभूषिते सर्वहितपर्यवसायिचर्यामृते श्रीपुरुषोत्तमे तत्प्रियजने वा प्रीतिं न कुर्वीत । तद्द्वेषकारणं तु सुतरामेवास्मद्बुद्धिपद्धतिमतीतम् । तस्माद् ब्रह्मादिस्थावरपर्यन्ता अदुष्टा दुष्टाश्च तस्मिन् बाढं रज्यन्त एवेति ।
तदुक्तं श्रीशुकेन (भा० ११।२।१-२) —

गोविन्दभुजगुप्तायां द्वारवत्यां कुरूद्वह ।
अवात्सीन् नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥ ५४७ ॥
को नु राजन्निन्द्रियवान् मुकुन्दचरणाम्बुजम् ।
न भजेत् सर्वतोमृत्युरुपास्यममरोत्तमैः ॥ ५४८ ॥ इति ।

१९० । अथ भगवद्धर्माचरणरूपेण कायिकेन किञ्चिन् मानसेन च लिङ्गेन कनिष्ठं लक्षयति (भा० ११।२।४७) —

अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ५४९ ॥

अर्चायां प्रतिमायामेव न तद्भक्तेषु अन्येषु च सुतरां न भगवत्प्रेमाभावाद् भक्तमाहात्म्यज्ञानाभावात् सर्वादरलक्षणभक्तगुणानुदयाच्च । स प्राकृतः प्रकृतिप्रारम्भोऽधुनैव प्रारब्धभक्तिरित्यर्थः । इयं च श्रद्धा न शास्त्रार्थावधारणजाता "यस्यात्मबुद्धिः कुणपे त्रिधातुके

स्वधीः कलत्रादिषु भौम इज्यधीः । यत्तीर्थबुद्धिः सलिले न कर्हिचिज् जनेष्वभिज्ञेषु" (भा० १०।८४।१३) इत्यादि शास्त्राज्ञानात् ।
तस्माल्लोकपरम्पराप्राप्तैवेति पूर्ववत् । अतश्चाजातप्रेमा शास्त्रीयश्रद्धायुक्तः साधकस्तु मुख्यः कनिष्ठो ज्ञेयः ॥

१९१ । अथ टीका — "पुनरष्टभिः श्लोकैरभ्यर्हितत्वादुत्तमस्यैव लक्षणान्याह 'गृहीत्वापि' " इत्येषा ।
तथा हि (भा० ११।२।४८) —

गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न हृष्यति ।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ॥ ५५० ॥

पूर्वोक्तप्रकारेण तदाविष्टचित्तो न गृह्णाति तावदिन्द्रियैरर्थान् गृहीत्वापीत्यपिशब्दार्थः । इदं विश्वं मायां बहिरङ्गशक्तिविलासत्वाद् धेयमित्यर्थः । अत्रापि कायिकमानसयोः साङ्कर्यम् ॥

१९२ । अथ केवलमानसलिङ्गैराह यावत्प्रकरणम् (भा० ११।२।४९) —

देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ।
संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥ ५५१ ॥

यो हरेः स्मृत्या देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्विमुह्यमानो न भवति स भागवतप्रधानः ।
उक्तं च श्रीगीतासु (गीता ७।२८) —

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ ५५२ ॥

१९३ । तथा (भा० ११।२।५०) —

न कामकर्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥ ५५३ ॥

बीजानि वासनाः । वासुदेवैकनिलयो वासुदेवमात्राश्रयः ॥

१९४ । तथा (भा० ११।२।५१) —

न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः ।
सज्जतेऽस्मिन्नहम्भावो देहे वै स हरेः प्रियः ॥ ५५४ ॥

जन्म सत्कुलम् । कर्म तपआदि । जातयोऽनुलोमजा मूर्धाभिषिक्तादयः । एताभिर्यस्यास्मिन् देहेऽहम्भावो न सज्जते किन्तु भगवत्सेवौपयिके साध्ये एव देहे सज्जत इत्यर्थः स हरेः प्रियो भागवतोत्तम इति पूर्वेणान्वयः प्रकरणार्थत्वात् । हरेः प्रिय इति भागवतमात्रवाचि भागवतत्वादेव ॥

१९५ । तथा (भा० ११।२।५२) —

> न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ।
> सर्वभूतसुहृच्छान्तः स वै भागवतोत्तमः ॥ ५५५ ॥

वित्तेषु ममतास्पदमात्रेषु स्वीयं परकीयमिति । आत्मनि स्वः पर इति । अत्र वित्तवदात्मनि च स्वपक्षपातमात्रं निषिध्यते न व्यक्तिभेदः ॥
तथोक्तं स्कान्दे मार्कण्डेयभगीरथसंवादे —

> परदुःखेनात्मदुःखं मन्यन्ते ये नृपोत्तम ।
> भगवद्धर्मनिरतास्ते नरा वैष्णवोत्तमाः ॥

१९६ । किं च (भा० ११।२।५३) —

> त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
> न चलति भगवत्पदारविन्दाल्लवनिमिषार्धमपि स वैष्णवाग्र्यः ॥ ५५६ ॥

अचलनत्वे हेतुः — त्रिभुवनेति । तत्र हेतुः — अजिते हरावेव आत्मा येषां तैर्ब्रह्मप्रभृतिभिः सुरादिभिरपि विमृग्याद् दुर्लभादित्यर्थः ॥

१९७ । अपि च विषयाभिसन्धिना चलनं कामेनातिसन्तापे सति भवेत् स तु भगवत्सेवानिर्वृतौ न सम्भवतीत्याह (भा० ११।२।५४) —

> भगवत उरुविक्रमाङ्घ्रिशाखानखमणिचन्द्रिकया निरस्ततापे ।
> हृदि कथमुपसीदतां पुनः स प्रभवति चन्द्र इवोदितेऽर्कतापः ॥ ५५७ ॥

उरुविक्रमौ च तावङ्घ्री च तयोः शाखा अङ्गुलयः । चन्द्रिका तापहारिणी दीप्तिः । तापः कामादिसन्तापः ॥

१९८ । तथा (भा० ११।२।५५) —

> विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः ।
> प्रणयरसनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥ ५५८ ॥

टीका च — "उक्तसमस्तलक्षणसारमाह 'विसृजति' इति । हरिरेव स्वयं साक्षाद् यस्य हृदयं न विसृजति न मुञ्चति । अवशेनाप्यभिहितमात्रोऽप्यघौघं नाशयति यः सः । तत् किं न विसृजति ? यतः प्रणयरसनया धृतं हृदये बद्धमङ्घ्रिपद्मं यस्य स भागवतप्रधान उक्तो भवति" इत्येषा ।

अत्र कामादीनामसम्भवे हेतुः — साक्षादिति पदं तदुत्तरकालत्वात् साक्षात्कारस्य ।

तथा "हरिरवशाभिहितोऽपि" इत्यादिना य एतादृशप्रणयवांस्तेनानेन तु सर्वदा परमावेशेनैव कीर्त्यमानः सुतरामेव "अघौघनाशः" स्यादित्यभिहितम् । उक्तं च "एतन् निर्विद्यमानानामिच्छतामकुतोभयम्" (भा० २।१।११) इत्यादि ।

तत उभयथैव तेषामघसंस्कारोऽपि न स्थातुमिष्ट इति ध्वनितम् । अनेन वाचिकलिङ्गमपि निर्दिश्य "यद् ब्रूते" (भा० ११।२।४४) इत्यस्योत्तरमुक्तम् ।

प्रकरणेऽस्मिन् "गृहीत्वापि" (भा० ११।२।४८) इत्यादीनामुत्तमभागवतलक्षणपद्यानाममीषामपृथक् पृथक् च वाक्यत्वं ज्ञेयं तथाभूतभगवद्वशीकारवति भागवतोत्तमे तत्तल्लक्षणानामन्तर्भावात् क्वचित् द्वित्रादिलक्षणमात्रदर्शनाच्च ।

तत्रापृथग्वाक्यतायामेकैकवाक्यगतेनैकैकेनैव लक्षणेनायमेव "सर्वभूतेषु" (भा० ११।२।४५) इत्याद्युक्तो महाभागवतो लक्ष्यते । तत्तद्धर्महेतुत्वेन तु "विसृजति" इत्यादिना सर्वलक्षणसारोपन्यासः ।

या च तत्रापि "स्मृत्या हरेः" इत्यादिना हेतुत्वेन स्मृतिरुक्ता तस्या एव विवरणमिदमन्तिमवाक्यमिति ज्ञेयम् ।

तत्रैकेनैव वाक्येन कृतेऽपि भागवतोत्तमलक्षणे स्पष्टीकरणार्थमेवान्यद् वाक्यमिति समर्थनीयम् । अत एव पृथक् पृथग् भागवतोत्तम इत्याद्यनुवादोऽपि सङ्गच्छते ।

पृथग्वाक्यतायां तु यत्र साक्षाद्भगवत्सम्बन्धो न श्रूयते । तत्र भागवतपदबलेनैव प्रकरणबलेनैव वा ज्ञेयः ।

पूर्वोत्तरपद्यस्थस्मृत्येत्यादिपदं वा योजनीयम् ।

तथात्र पक्षे चापेक्षिकमेवान्यत्र भागवतोत्तमत्वम् । तत्रोत्तरोत्तरश्रैष्ठ्यक्रमोऽयम् "अर्चायामेव" इति "न यस्य जन्मकर्माभ्याम्" इति । "न यस्य स्वः परः" इति । "गृहीत्वापीन्द्रियैः" इति । "देहेन्द्रियप्राण" इति ।

अस्य संस्कारोऽस्ति । किन्तु तेन विमोहो न स्यादिति मूर्च्छितसंस्कारोऽयं जातनवीनप्रेमाङ्कुरः स्यात् ।

तथा "न कामकर्मबीजानाम्" इत्यस्यैव विवरणम् "त्रिभुवनविभवहेतवेऽपि" इति ।

इयमेव नैष्ठिकी भक्तिर्ध्यानाख्या ध्रुवानुस्मृतिरित्युच्यते । अस्य प्रेमाङ्कुरोऽप्यनाच्छाद्यतयैव जातोऽस्ति । अन्यथा तादृशस्मरणसातत्याभावः स्यात् । अयं हि निर्धूतकषायो निरूढप्रेमाङ्कुर इति लभ्यते ।

तत ऊर्ध्वं साक्षात्प्रेमजन्मतः "ईश्वरे तदधीनेषु" इति । अस्य मैत्र्यादिकं त्रयमपि भक्तिहेतुकमेवेति न कषायस्थितिरवगन्तव्या ।

निर्धूतकषायमहाप्रेमसूचकस्य "सर्वभूतेषु" इत्यस्य तु विवरणम् "विसृजति" इति ।

तापादिपञ्चसंस्कारी नवेज्याकर्मकारकः ।
अर्थपञ्चकविद् विप्रो महाभागवतः स्मृतः ॥ ५५९ ॥

इति पाद्मोत्तरखण्डोक्तम् । महत्त्वं तु अर्चनमार्गपराणां मध्य एव ज्ञेयमसिद्धप्रीतित्वात् । अत्र तापादिपञ्चसंस्कारित्वम् "तापः पुण्ड्रं तथा नाम" इत्यादिना तत्रैव दर्शितम् । नवेज्याकर्मकारकत्वं चानेन वचनेन दृश्यते —

अर्चनं मन्त्रपठनं योगो यागो हि वन्दनम् ।
नामसङ्कीर्तनं सेवा तच्चिह्नैरङ्कनं तथा ॥ ५६० ॥
तदीयाराधनं चेज्या नवधा भिद्यते शुभे ।
नवकर्मविधानेज्या विप्राणां सततं स्मृता ॥ ५६१ ॥

अर्थपञ्चकवित्त्वं च — ( १ ) उपास्यः श्रीभगवान् ( २ ) तत्परमं पदम् ( ३ ) तद्द्रव्यम् ( ४ ) तन्मन्त्रः ( ५ ) जीवात्मा चेति पञ्चतत्त्वज्ञातृत्वम् ।
तच्च श्रीहायशीर्षे विवृतं सङ्क्षिप्य लिख्यते —

( १ ) एक एवेश्वरः कृष्णः सच्चिदानन्दविग्रहः ।
पुण्डरीकविशालाक्षः कृष्णच्छुरितमूर्द्धजः ॥ ५६२ ॥
वैकुण्ठाधिपतिर्देव्या लीलया चित्स्वरूपया ।
स्वर्णकान्त्या विशालाख्या स्वभावाद् गाढमाश्रितः ॥ ५६३ ॥
नित्यः सर्वगतः पूर्णो व्यापकः सर्वकारणम् ।
वेदगुह्यो गभीरात्मा नानाशक्त्युदयो नव ॥ ५६४ ॥ इत्यादि ।

( २ ) स्थानतत्त्वमतो वक्ष्ये प्रकृतेः परमव्ययम् ।
शुद्धसत्त्वमयं सूर्यचन्द्रकोटिसमप्रभम् ॥ ५६५ ॥
चिन्तामणिमयं साक्षात् सच्चिदानन्दलक्षणम् ।
आधारं सर्वभूतानां सर्वप्रलयवर्जितम् ॥ ५६६ ॥ इत्यादि ।

( ३ ) द्रव्यतत्त्वं शृणु ब्रह्मन् प्रवक्ष्यामि समासतः ।
सर्वभोगप्रदा यत्र पादपाः कल्पपादपाः ॥ ५६७ ॥
भवन्ति तादृशा वल्ल्यस्तद्भवं चापि तादृशम् ।
गन्धरूपं स्वादुरूपं द्रव्यं पुष्पादिकं च यत् ॥ ५६८ ॥
हेयांशानामभावाच्च रसरूपं भवेद्धि तत् ।
त्वग्बीजं चैव हेयांशं कठिनांशं च यद् भवेत् ॥ ५६९ ॥

सर्वं तद्भौतिकं विद्धि न ह्यभूतमयं च तत् ।
रसस्य योगतो ब्रह्मन् भौतिकं स्वादुवद् भवेत् ॥ ५७० ॥
तस्मात् साध्यो रसो ब्रह्मन् रसः स्याद् व्यापकः परः ।
रसवद् भौतिकं द्रव्यमत्र स्याद् रसरूपकम् ॥ ५७१ ॥ इत्यादि ।

(४) वाच्यत्वं वाचकत्वं च देवतन्मन्त्रयोरिह ।
अभेदेनोच्यते ब्रह्मंस्तत्त्वविद्भिर्विचारितः ॥ ५७२ ॥ इत्यादि ।

(५) मरुत्सागरसंयोगे तरङ्गात् कणिका यथा ।
जायन्ते तत्स्वरूपाश्च तदुपाधिसमावृताः ॥ ५७३ ॥
आश्लेषादुभयोस्तद्वदात्मनश्च सहस्रशः ।
सञ्जाताः सर्वतो ब्रह्मन् मूर्तामूर्तस्वरूपतः ॥ ५७४ ॥ इत्यादि ।

किन्तु श्रीभगवदाविर्भावादिषु स्वस्वोपासनाशास्त्रानुसारेणापरोऽपि विशेषः कश्चिज् ज्ञेयः । जीवनिरूपणं चेदम् "न घटत उद्भवः" (भा० १०।८७।३१) इत्यनुसारेणोपाधिसहितमेव कृतम् ।
निरुपाधिकं तु (वि० पु० ६।७।६१) —

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्याकर्मसञ्ज्ञान्या तृतीया शक्तिरिष्यते ॥ ५७५ ॥

इति विष्णुपुराणानुसारेण ।
तथा (गीता ७।५) —

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५७६ ॥ इति ।

"ममैवांशो जीवलोके जीवभूतः सनातनः" (गीता १५।७) इति च श्रीगीतानुसारेण ।
तथा —

यत् तटस्थं तु चिद्रूपं स्वसंवेद्याद् विनिर्गतम् ।
रञ्जितं गुणरागेण स जीव इति कथ्यते ॥ ५७७ ॥

इति श्रीनारदपञ्चरात्रानुसारेण ज्ञेयम् ॥ हवियोगेश्वरो निमिम् ॥

१९९ । तदेवमुपदिष्टा भागवतसत्सु मूर्च्छितकषायादयो महद्भेदाः । भागवतसन्मात्रभेदाश्च तत्सन्मात्रभेदेषु "अर्चायामेव हरये" (भा० ११।२।४७) इत्यादिना तत्तद्गुणाविर्भावतारतम्याल्लब्धतारतम्याः कतिचिद् दर्शिताः ।
अथ साधनतारतम्येनापि तेषां तारतम्यमाह पञ्चभिः । तत्रावरं मिश्रभक्तिसाधकमाह त्रिभिः (भा० ११।११।२९-३१) —

कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ।
सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः ॥ ५७८ ॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः ।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः ॥ ५७९ ॥
अप्रमत्तो गभीरात्मा धृतिमाञ् जितषड्गुणः ।
अमानी मानदः कल्यो मैत्रः कारुणिकः कविः ॥ ५८० ॥

टीका च — "कृपालुः परदुःखासहिष्णुः । सर्वदेहिनां केषाञ्चिदप्यकृतद्रोहः । तितिक्षुः क्षमावान् । सत्यं सारं स्थिरं बलं वा यस्य सः । अनवद्यात्मा असूयादिरहितः । सुखदुःखयोः समः । यथाशक्ति सर्वेषामुपकारकः ।
"कामैरक्षुभितचित्तः । दान्तः संयतबाह्येन्द्रियः । मृदुरकठिनचित्तः । शुचिः सदाचारः । अकिञ्चनोऽपरिग्रहः । अनीहो दृष्टक्रियाशून्यः । मितभुक् लघ्वाहारः । शान्तो नियतान्तः करणः । स्थिरः स्वधर्मे । मच्छरणो मदेकाश्रयः । मुनिर्मननशीलः ।
"अप्रमत्तः सावधानः । गभीरात्मा निर्विकारः । धृतिमान् विपद्यप्यकृपणः । जितषड्गुणः शोकमोहौ जरामृत्युः क्षुत्पिपासे षडूर्मय एते जिता येन सः । अमानी न मानाकाङ्क्षी । अन्येभ्यो मानदः । कल्यः परबोधने दक्षः । मैत्रः अवञ्चकः । कारुणिकः करुणयैव प्रवर्तमानो न तु दृष्टलोभेन । कविः सम्यग् ज्ञानी" इत्येषा ।
अत्र मच्छरण इति विशेष्यम् । उत्तरत्र "स च सत्तमः" इति चकारेण तु पूर्वोक्तो यथा सत्तमस्तथायमपि सत्तम इति व्यक्तिरेवमेवम्भूतो मच्छरणः सत्तम इत्याक्षिप्यते ॥

२०० । मध्यममिश्रसाक्षाद्भक्तिसाधकमाह (भा० ११।११।३२) —

आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान् ।
धर्मान् सन्त्यज्य यः सर्वान् मां भजेत् स च सत्तमः ॥ ५८१ ॥

टीका च — "मया वेदरूपेण आदिष्टानपि स्वधर्मान् सन्त्यज्य यो मां भजेत् सोऽप्येवं पूर्वोक्तवत् सत्तमः । किमज्ञानाद् नास्तिक्याद्वा ? न । धर्माचरणे सत्त्वशुद्ध्यादीन् गुणान् विपक्षे दोषांश्चाज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान् सन्त्यज्य । यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारितया सन्त्यज्य" इत्येषा ।
यथा हयशीर्षपञ्चरात्रोक्तनारायणव्यूहस्तवे —

ये त्यक्तलोकधर्मार्था विष्णुभक्तिवशं गताः ।
ध्यायन्ति परमात्मानं तेभ्योऽपीह नमो नमः ॥ ५८२ ॥

अत्र त्वेवं व्याख्या—यदि च स्वात्मनि तत्तद्गुणयोगाभावस्तथाप्येवं पूर्वोक्तप्रकारेण गुणान् कृपालुत्वादीन् दोषांस्तद्विपरीतांश्चाज्ञाय हेयोपादेयत्वेन निश्चित्यापि यो मया तेषु गुणेषु मध्ये तत्रादिष्टानपि स्वकान् नित्यनैमित्तिकलक्षणान् सर्वानेव वर्णाश्रमविहितान् धर्मान् तदुपलक्षणं ज्ञानमपि मदनन्यभक्तिविघातकतया सन्त्यज्य मां भजेत् स च सत्तमः ।
चकारात् पूर्वोक्तोऽपि सत्तम इत्युत्तरस्य तत्तद्गुणाभावेऽपि पूर्वसाम्यं बोधयति । ततो यस्तु तत्तद्गुणान् लब्ध्वा धर्मज्ञानपरित्यागेन मां भजति केवलं स तु परमसत्तम एवेति व्यक्त्यानन्यभक्तस्य पूर्वत आधिक्यं दर्शितम् ।
अत्र "अद्वेष्टा सर्वभूतानाम्" (गीता १२।१३) इत्यादि श्रीगीताद्वादशाध्यायप्रकरणमप्यनुसन्धेयम् । सत्तम इत्यनेन तदवरत्रापि सत्तरत्वं सत्तमत्वमप्यस्तीति दर्शितम् । अस्तु तावत् सदाचारस्य तद्भक्तस्य सत्त्वमनन्यदेवताभक्तत्वमात्रेणापि दुराचारस्यापि सत्त्वान्यपर्यायसाधुत्वं विधीयते "अपि चेत् सुदुराचारः" (गीता ९।३०) इत्यादौ ।
अत्र च साधुसङ्गप्रस्तावे यत् तादृशं लक्षणं नोत्थापितं तत् खलु तादृशसङ्गस्य भक्त्युन्मुखेऽनुपयुक्तताभिप्रायेण । यथोक्तं श्रीप्रह्लादेन "सङ्गेन साधुभक्तानाम्" (भा० ७।७।३०) इति । साधुरत्र सदाचारः ।
तदेवमीश्वरबुद्ध्या विधिमार्गभक्तयोस्तारतम्यमुक्तम् । तत्रैवोत्तरस्यानन्यत्वेन श्रेष्ठत्वं दर्शितम् ।
तत्रैवार्चनमार्गे त्रिविधत्वं लभ्यते पाद्मोत्तरखण्डात् । तत्र महत्त्वम् "तापादिपञ्चसंस्कारी" इत्यादौ ।
मध्यमत्वम्—

तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः ।
अमी हि पञ्चसंस्काराः परमैकान्तिहेतवः ॥ ५८३ ॥ इत्यत्र ।

कनिष्ठत्वम्—

शङ्खचक्राद्यूर्द्ध्वपुण्ड्रधारणाद्यात्मलक्षणम् ।
तन्नमस्करणं चैव वैष्णवत्वमिहोच्यते ॥ ५८४ ॥ इत्यत्र ॥

२०१ । अथ शुद्धदास्यसख्यादिभावमात्रेण योऽनन्यः स तु सर्वोत्तम इत्याह (भा० ११।११।३३)—

ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥ ५८५ ॥

यावान् देशकालाद्यपरिच्छिन्नः । यश्च सर्वात्मा । यादृशः सच्चिदानन्दरूपः ।
तं मां ज्ञात्वाज्ञात्वा वा ये केवलमनन्यभावेन श्रीव्रजेश्वरनन्दनत्वाद्यालम्बनो यः स्वभीप्सितो दास्यादीनामेकतरो भावः । तेनैव भजन्ति न कदाचिदन्येनेत्यर्थः । ते तु मे मया भक्ततमा मताः ।
अत एव चतुर्थे श्रीयोगेश्वरैरपि प्रार्थितम् (भा० ४।७।३८) —

प्रेयान् न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन् न पृथग् य आत्मनः ।
अथापि भृत्येश तयोपधावतामनन्यवृत्त्यानुगृहाण वत्सल ॥ ५८६ ॥ इति ।

श्रीगीतासु हि (गीता ७।२) —

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज् ज्ञात्वा नेह भूयोऽन्यज् ज्ञातव्यमवशिष्यते ॥ ५८७ ॥

इत्युक्त्वाह (गीता ७।४-७) —

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ५८८ ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५८९ ॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ५९० ॥
मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ५९१ ॥ इति ।

प्रधानाख्यजीवाख्यनिजशक्तिद्वारा जगत्कारणत्वं तच्छक्तिमयत्वेन जगतस्तदनन्यत्वं स्वस्य तु ततः परत्वं तदाश्रयत्वं च वदन् निजज्ञानमुपदिष्टवान् प्रसङ्गेन जीवस्वरूपज्ञानं च ।
स चैवम्भूतो ज्ञानी मत्स्वरूपमहिमानुसन्धानकृत्त्वादार्तभक्तादीनतिक्रम्य मत्प्रियो भवतीत्यप्यन्तेऽभिहितवान् (गीता ७।१६-१८) —

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ ५९२ ॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ ५९३ ॥
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ ५९४ ॥ इति ।

ततश्चायमर्थः — यस्त्वयि विश्वात्मन्यात्मनो जीवानीक्षेत् त्वच्छक्तित्वादनन्यत्वेन जानाति न तु पृथक् स्वतन्त्रत्वेन ईक्षेत । अमुतोऽमुष्माद् यद्यपि ते प्रेयान् नास्ति तथापि हे वत्सल ! हे भृत्यप्रिय ! भृत्येशभावेन ये भजन्ति तेषां या अनन्या वृत्तिरव्यभिचारिणी निजा भक्तिस्तयैव अनुगृहाण । प्रस्तुतत्वेनास्मान् ज्ञानिभक्तानिति लभ्यत इति ।
अथ मूलपद्ये "ज्ञात्वाज्ञात्वा" इत्यत्राज्ञानज्ञानयोर्हेयोपादेयत्वं निषिद्धम् । भक्ततमा इत्यत्र पूर्ववाक्यस्थसत्पदनिर्देशमतिक्रम्य विशेषतो भक्तपदनिर्देशाद् भक्तेः स्वरूपाधिक्यमत्रैव विवक्षितम् ।
ते मे मता इत्यत्र मम तु विशिष्टा सम्मतिरत्रैवेति सूचितमीदृशानुक्तचरत्वात् ।
अत एव प्रकरणप्राप्तिमेकवचननिर्देशमप्यतिक्रम्य गौरवेणैव ये ते इति बहुवचनं निर्दिष्टम् । ततः किमुत तद्भावसिद्धप्रेमाण इति भावः । एषां भावभजनविवृतिरग्रे रागानुगाकथने ज्ञेया ॥ श्रीभगवान् ॥

२०२ । त एते वैष्णवसन्तो महत्त्वेन सन्मात्रत्वेन च विभिद्य निर्दिष्टाः । सन्मात्रभेदतारतम्यं चात्र यदविविक्तं तद्भक्तिभेदनिरूपणे पुरतो विवेचनीयम् । अन्ये तु स्वगोष्ठ्यपेक्षया वैष्णवाः ।
तत्र कर्मिषु तदपेक्षया । यथा स्कान्दे मार्कण्डेयभगीरथसंवादे —

धर्मार्थं जीवितं येषां सन्तानार्थं च मैथुनम् ।
पचनं विप्रसुखार्थं ज्ञेयास्ते वैष्णवा नराः ॥ ५९५ ॥ इति ।

तत्र श्रीविष्ण्वाज्ञाबुद्ध्यैव तत्तत् क्रियत इति वैष्णवपदेन गम्यते ।
श्रीविष्णुपुराणे च (वि० पु० ३।७।२०) —

न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे ।
न हरति न हन्ति किञ्चिदुच्चैः स्थितमनसं तमवेहि विष्णुभक्तम् ॥ ५९६ ॥ इति ।

तदर्पणे तु सुतरामेव वैष्णवत्वम् । यथा पाद्मे पातालखण्डे वैशाखमाहात्म्ये —

जीवितं यस्य धर्मार्थे धर्मो हर्यर्थ एव च ।
अहोरात्राणि पुण्यार्थं तं मन्ये वैष्णवं जनम् ॥ ५९७ ॥

तथैव शैवेषु तदपेक्षया यथा बृहन्नारदीये —

शिवे च परमेशाने विष्णौ च परमात्मनि ।
समबुद्ध्या प्रवर्तन्ते ते वै भागवतोत्तमाः ॥ ५९८ ॥ इति ।

शैवगोष्ठीषु भागवतोत्तमत्वं तत्रैव प्रसिद्धमिति तथोक्तम् । वैष्णवतन्त्रे तु तन्निन्दैव —

> यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।
> समत्वेनैव वीक्षेत स पाषण्डी भवेद् ध्रुवम् ॥ ५९९ ॥ इति ।

तदेवं तेषां बहुभेदेषु सत्सु तेषामेव प्रभावतारतम्येन कृपातारतम्येन भक्तिवासनाभेदतारतम्येन सत्सङ्गात् कालशैघ्र्यस्वरूपवैशिष्ट्याभ्यां भक्तिरुदयते । एवं ज्ञानिसङ्गाच्च ज्ञानं ज्ञेयम् ।

तत्र यद्यप्यकिञ्चना भक्तिरभिधेयेति तत्कारणत्वेन मद्भक्तसङ्ग एवाभिधेये सति भक्तोऽपि स एव लक्षितव्यः । तथापि तत्तत्परीक्षार्थमेव तत्तदनुवादः क्रियते ।

तत्र प्रथमं तावत् तत्तत्सङ्गाज् जातेन तत्तच्छ्रद्धातत्तत्परम्पराकथारुच्यादिना जातभगवत्साम्मुख्यस्य तत्तदनुषङ्गेनैव तत्तद्भजनीये भगवदाविर्भावविशेषे तद्भजनमार्गविशेषे च रुचिर्जायते ।

ततश्च विशेषबुभुत्सायां सत्यां तेष्वेकतोऽनेकतो वा श्रीगुरुत्वेनाश्रिताच्छ्रवणं क्रियते । तच् चोपक्रमोपसंहारादिभिरर्थावधारणम् । पुनश्चासम्भावनाविपरीतभावनाविशेषवता स्वयं तद्विचाररूपं मननमपि क्रियते ।

ततो भगवतः सर्वस्मिन्नेवाविर्भावे तथाविधोऽसौ सदा सर्वत्र विराजत इत्येवंरूपा श्रद्धा जायते । तत्र कस्मिंस्त्वनया प्रथमजातया रुच्या सह निजाभीष्टदानसामर्थ्याद्यतिशयवत्तानिर्धारणरूपत्वेन सैव श्रद्धा समुल्लसति । तत्र यद्यप्येकत्रैवातिशयितापर्यवसानं सम्भवति न तु सर्वत्र तथापि केषाञ्चित् ततो विशिष्टस्याज्ञानादन्यत्रापि तथाबुद्धिरूपा श्रद्धा सम्भवति । एवं भजनमार्गविशेषश्च व्याख्यातव्यः । तदेवं सिद्धे ज्ञाने विज्ञानार्थं निदिध्यासनलक्षणतत्तदुपासनामार्गभेदोऽनुष्ठीयते । इत्येवं विचारप्रधानानां मार्गो दर्शितः ।

रुचिप्रधानानां तु न तादृग्विचारापेक्षा जायते । किन्तु साधुसङ्गलीलाकथाश्रवणरुचिश्रद्धाश्रवणाद्यावृत्तिरूप एवासौ मार्गः । यथा "शुश्रूषोः श्रद्दधानस्य" (भा० १।२।१६) इत्यादिना पूर्वं दर्शितः ।

"सतां प्रसङ्गान् मम वीर्यसंविदः" (भा० ३।२५।२५) इत्यादौ च द्रष्टव्यः ।

प्रीतिलक्षणभक्तीच्छूनांस्तु रुचिप्रधानमार्गः श्रेयान् नाजातरुचीनामिव विचारप्रधानः । यथोक्तं श्रीप्रह्लादेन (भा० ७।९।४९-५०) —

> नैते गुणा न गुणिनो महदादयो ये सर्वे मनः प्रभृतयः सहदेवमर्त्याः ।
> आद्यन्तवन्त उरुगाय विदन्ति हि त्वामेवं विविच्य सुधियो विरमन्ति शब्दात् ॥
> ६०० ॥
> तत् तेऽर्हत्तम नमः स्तुतिकर्मपूजाः कर्मस्मृतिश्चरणयोः श्रवणं कथायाम् ।
> संसेवया त्वयि विनेति षडङ्गया किं भक्तिं जनः परमहंसगतौ लभेत ॥ ६०१ ॥
> इति ।

कर्म परिचर्या । कर्मस्मृतिर्लीलास्मरणम् । चरणयोरिति सर्वत्रान्वितं भक्तिव्यञ्जकम् ।

तदेतदुभयस्मिन्नपि तद्भजनविधिशिक्षागुरुः प्राक्तनः श्रवणगुरुरेव भवति तथाविधस्य प्राप्तत्वात् । प्राक्तनानां बहुत्वेऽपि प्रायस्तेष्वेवान्यतरोऽभिरुचितः । पूर्वस्मादेव हेतोः । श्रीमन्त्रगुरुस्त्वेक एव निषेत्स्यमानत्वाद् बहूनाम् ।
अथात्र प्रमाणानि — तत्र तदाविर्भावविशेषे रुचिः "महापुरुषमभ्यर्चेन् मूर्त्याभिमतयात्मनः" (भा० ११।३।४८) इत्यादौ श्रीमदाविर्होत्रादिनाभिप्रेता ।
भजनविशेषरुचिश्च (भा० ११।२७।७) —

वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः ।
त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ॥ ६०२ ॥

इत्यादौ श्रीभगवताभिप्रेता ।
अथः श्रवणगुरुमाह (भा० ११।३।२१) —

तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥ ६०३ ॥

शाब्दे ब्रह्मणि वेदे तात्पर्यविचारेण परे ब्रह्मणि भगवदादिरूपाविर्भावे त्वपरोक्षानुभवेन निष्णातं तथैव निष्ठां प्राप्तम् ।
यथोक्तं श्रीपुरञ्जनोपाख्यानाद्युपसंहारे श्रीनारदेन (भा० ४।२९।५१) —

स वै प्रियतमश्चात्मा यतो न भयमण्वपि ।
इति वेद स वै विद्वान् यो विद्वान् स गुरुर्हरिः ॥ ६०४ ॥ इति ॥

श्रीप्रबुद्धो निमिम् ॥ २०२ ॥

२०३ । अत्र ब्रह्मवैवर्ते विशेषः —

वक्ता सरागो नीरागो द्विविधः परिकीर्तितः ।
सरागो लोलुपः कामी तदुक्तं हृन् न संस्पृशेत् ॥ ६०५ ॥
उपदेशं करोत्येव न परीक्षां करोति च ।
अपरीक्ष्योपदिष्टं यल्लोकनाशाय तद् भवेत् ॥ ६०६ ॥

किं च —

कुलं शीलमथाचारमविचार्य परं गुरुम् ।
भजेत श्रवणाद्यर्थी सरसं सारसागरम् ॥ ६०७ ॥

सरसत्वादिकं च व्यञ्जितं तत्रैवान्यत्र —

कामक्रोधादियुक्तोऽपि कृपणोऽपि विषादवान् ।
श्रुत्वा विकाशमायाति स वक्ता परमो गुरुः ॥ ६०८ ॥

एवम्भूतगुरोरभावाद् युक्तिभेदबुभुत्सया बहूनप्याश्रयन्ते केचित् । यथा (भा० ११।९।३१) —

न ह्येकस्माद् गुरोर्ज्ञानं सुस्थिरं स्यात् सुपुष्कलम् ।
ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥ ६०९ ॥

स्पष्टम् ॥ श्रीदत्तात्रेयो यदुम् ॥

२०४ । तत्र रुचिप्रधानानां श्रवणादिकम् (भा० १।५।२६) —

तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः ।
ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यङ्ग ममाभवद् रतिः ॥ ६१० ॥

इत्याद्युक्तप्रकारम् ।
विचारप्रधानानां श्रवणं यथा चतुःश्लोक्यादीनाम् । मननं यथा "भगवान् ब्रह्म कार्त्स्न्येन" (भा० २।२।३४) इत्यादौ ।
अथ तज्जाता भगवति श्रद्धा यथा (भा० ४।२१।२७-३०) —

अस्ति यज्ञपतिर्नाम केषाञ्चिदर्हसत्तमाः ।
इहामुत्र च लक्ष्यन्ते ज्योत्स्नावत्यः क्वचिद् भुवः ॥ ६११ ॥
मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः ।
प्रियव्रतस्य राजर्षेरङ्गस्यास्मत्पितुः पितुः ॥ ६१२ ॥
ईदृशानामथान्येषामजस्य च भवस्य च ।
प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता ॥ ६१३ ॥
दौहित्र्यादीनृते मृत्योः शोच्यान् धर्मविमोहितान् ।
वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना ॥ ६१४ ॥

हे अर्हसत्तमाः ! यज्ञपतिर्नाम सर्वकर्मफलदातृत्वेन श्रुतिप्रतिपादितः परमेश्वरः केषाञ्चित् श्रुत्यर्थतत्त्वज्ञानां मते तावदस्ति तथापि विप्रतिपत्तेर्न तत्सिद्धिरित्याशङ्क्य तत्र जगद्वैचित्र्यान्यथानुपपत्तिप्रमाणमप्युपोद्बलकमित्याह ।
इह प्रत्यक्षेणामुत्र शास्त्रेण तद्वदित्यनुमानेन च ज्योत्स्नावत्यः कान्तिमत्यो भुवो भोगभूमयो देहाश्च क्वचिदेवोपलभ्यन्ते न सर्वत्रेति ।
अयं भावः — न वा जडस्य तत्कर्मणस्तत्तत्फलदातृत्वं घटते "फलमत उपपत्तेः" (वे० सू० ३।२।३८) इति न्यायात् । न चार्वाग्देवतानां स्वातन्त्र्यमन्तर्यामिश्रुतेः । न च कर्मसाम्ये फलतारतम्यं क्वचिच्च तदसिद्धिः सम्भवति । अतः स्वतन्त्रेण परमेश्वरेण भाव्यम् ।

अत्र विद्वदनुभवोऽपि प्रमाणमित्याह — मनोरिति त्रिभिः । अस्मत्पितुः पितुः पितामहस्याङ्गस्य । प्रह्लादबली तदानीं शास्त्रादेव ज्ञात्वा गणितौ । गदाभृता परमेश्वरेण कृत्यमस्ति हृदये बहिरप्याविर्भूय तेषां मुहुः कृत्यसम्पादनात् तेन यत् कृत्यं करणीयं तत् तेषामस्तीत्यर्थः । तेषामेव तेन सह कृत्यमस्ति नान्येषामित्यर्थो वा ।
तदन्यांस्तु निन्दितत्वेनाह — मृत्योर्दौहित्र्यादीन् वेणप्रभृतीन् धर्मविमोहितान् ।
गदाभृच्छब्देन तन्नाम्ना प्रसिद्धात् श्रीविष्णोरन्यत्र परमेश्वरत्वं वारयति श्रुतियुक्तिविद्वदनुभवेषु ।
तं गदाभृतं विशिनष्टि — वर्गेति । वर्गोऽत्र त्रिवर्गः स्वर्गो धर्मस्य फलम् । अपवर्गो मोक्षः । तेषामैकात्म्येनैकरूपेण सर्वान्तर्गतेन हेतुना । तत्रापि प्रायेण प्रचुरेण हेतुना ।
तदुक्तं स्कान्दे —

> बन्धको भवपाशेन भवपाशाच्च मोचकः ।
> कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः ॥ ६१५ ॥ इति ॥

२०५ । अथ भजनश्रद्धा (भा० ४।२१।३१-३२) —

> यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः ।
> सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित् ॥ ६१६ ॥
> विनिर्धुताशेषमनोमलः पुमानसङ्गविज्ञानविशेषवीर्यवान् ।
> यदङ्घ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते ॥ ६१७ ॥

तपस्विनां संसारतप्तानाम् । तत्पादसम्बन्धस्यैवैष महिमेति दृष्टान्तेनाह — यथेति । असङ्गस्ततोऽन्यत्रानासक्तिस्तेन विज्ञानविशेषो भगवतो नानाविर्भावत्वात् तेषां मध्ये कस्याप्याविर्भावस्य साक्षात्कारस्तदेव वीर्यं विद्यते यस्य सः । यस्याङ्घ्रिमूले कृताश्रयः सन् ॥ श्रीपृथुराजः सभ्यान् ॥

२०६ । अथ श्रवणगुरुभजनशिक्षागुर्वोः प्रायिकमेकत्वमिति तथैवाह (भा० ११।३।२२) —

> तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः ।
> अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥ ६१८ ॥

“तस्माद् गुरुं प्रपद्येत” (भा० ११।३।२१) इति पूर्वोक्तेस्तत्र श्रवणगुरौ । गुरुरेव आत्मा जीवनं दैवतं निजेष्टदैवततयाभिमतश्च यस्य तथाभूतः सन् । अमायया निर्दम्भयानुवृत्त्या तदनुगत्या शिक्षेत् ।
यैर्धर्मैः । आत्मा परमात्मा । भक्तेभ्य आत्मप्रदः श्रीबलिप्रभृतिभ्य इव । अस्य शिक्षागुरोर्बहुत्वमपि प्राग्वज् ज्ञेयम् ॥ श्रीप्रबुद्धो निमिम् ॥

२०७ । मन्त्रगुरुस्त्वेक एवेत्याह (भा० ११।३।४८) —

> लब्ध्वानुग्रह आचार्यात् तेन सन्दर्शितागमः ।
> महापुरुषमभ्यर्चेन् मूर्त्याभिमतयात्मनः ॥ ६१९ ॥

अनुग्रहो मन्त्रदीक्षारूपः । आगमो मन्त्रविधिशास्त्रम् । अस्यैकत्वमेकवचनत्वेन बोध्यते ।

> बोधः कलुषितस्तेन दौरात्म्यं प्रकटीकृतम् ।
> गुरुर्येन परित्यक्तस्तेन त्यक्तः पुरा हरिः ॥ ६२० ॥

इति ब्रह्मवैवर्तादौ तत्त्यागनिषेधात् ।
तदपरितोषेणैवान्यो गुरुः क्रियते । ततोऽनेकगुरुकरणे पूर्वत्याग एव सिद्धिः ।
एतच् चापवादवचनद्वारापि श्रीनारदपञ्चरात्रे बोधितम्—

> अवैष्णवोपदिष्टेन मन्त्रेण निरयं व्रजेत् ।
> पुनश्च विधिना सम्यग् ग्राहयेद् वैष्णवाद् गुरोः ॥ ६२१ ॥ इति ॥

श्री आविर्होत्रो निमिम् ॥

२०८ । तत्र श्रवणगुरुसंसर्गेणैव शास्त्रीयविज्ञानोत्पत्तिः स्यान् नान्यथेत्याह (भा० ११।१०।१२)—

> आचार्योऽरणिराद्यः स्यादन्तेवास्युत्तरारणिः ।
> तत्सन्धानं प्रवचनं विद्यासन्धिः सुखावहः ॥ ६२२ ॥

आद्योऽधरः । तत्सन्धानं तयोर्मध्यमं मन्थनकाष्ठम् । प्रवचनमुपदेशः । विद्या शास्त्रोक्तं ज्ञानं तु सन्धौ भवोऽग्निरिव ।
तथा च श्रुतिः "आचार्यः पूर्वरूपम्" (तै० १।३।३) इत्यादि ।
अत एव "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" (मु० १।२।१२) इति । "आचार्यवान् पुरुषो वेद" (छा० ६।१४।२) इति ।
"नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ" (कठ० १।२।९) इति ॥ श्रीभगवान् ॥

२०९ । शिक्षागुरोरप्यावश्यकत्वमाहुः (भा० १०।८७।३३)—

> विजितहृषीकवायुभिरदान्तमनस्तुरगं
> य इह यतन्ति यन्तुमतिलोलमुपायखिदः ।
> व्यसनशतान्विताः समवहाय गुरोश्चरणं
> वणिज इवाज सन्त्यकृतकर्णधरा जलधौ ॥ ६२३ ॥

ये गुरोश्चरणं समवहायातिलोलुपमदान्तमदमितं मन एव तुरगं विजितैरिन्द्रियैः प्राणैश्च कृत्वा यन्तुं भगवदन्तर्मुखीकर्तुं प्रयतन्ते ते उपायखिदस्तेषु तेषूपायेषु खिद्यन्ते । अतो व्यसनशतान्विता भवन्ति । अत एव इह संसारे तिष्ठन्त्येव ।
हे अज ! अकृतकर्णधरा अस्वीकृतनाविका जलधौ यथा तद्वत् ।
श्रीगुरुप्रदर्शितभगवद्भजनप्रकारेण भगवद्धर्मज्ञाने सति तत्कृपया व्यसनानभिभूतौ सत्यां शीघ्रमेव मनो निश्चलं भवतीति भावः ।
अतो ब्रह्मवैवर्ते —

गुरुभक्त्या स मिलति स्मरणात् सेव्यते बुधैः ।
मिलितोऽपि न लभ्यते जीवैरहमिकापरैः ॥ ६२४ ॥

श्रुतिश्च (श्वे० ६।२३) —

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ६२५ ॥ इति ॥

श्रुतयः ॥

२१० । अतः श्रीमन्त्रगुरोरावश्यक्तवं सुतरामेव । तदेतत्परमार्थगुर्वाश्रयो व्यवहारिकगुर्वादिपरित्यागेनापि कर्तव्य इत्याशयेनाह (भा० ५।५।१८) —

गुरुर्न स स्यात् स्वजनो न स स्यात् पिता न स स्याज् जननी न सा स्यात् ।
दैवं न तत् स्यान् न पतिश्च स स्यान् न मोचयेद् यः समुपेतमृत्युम् ॥ ६२६ ॥

समुपेतः सम्प्राप्तो मृत्युः संसारो येन तम् ।
अत उक्तं श्रीनारदेन "जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः" (भा० १।५।१५) इत्यादि ।
तस्मात् तावदेव तेषां गुर्वादिव्यवहारो यावत् मृत्युमोचकं श्रीगुरुचरणं नाश्रयत इत्यर्थः ॥
श्रीऋषभदेवः स्वपुत्रान् ॥

२११ । अन्यदा स्वगुरौ कर्मिभिरपि भगवद्दृष्टिः कर्तव्येत्याह (भा० ११।१७।२७) —

आचार्यं मां विजानीयान् नावमन्येत कर्हिचित् ।
न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः ॥ ६२७ ॥

ब्रह्मचारिधर्मान्तःपठितमिदम् ॥ श्रीभगवान् ॥

२१२ । ततः सुतरामेव परमार्थिभिस्तादृशे गुरावित्याह (भा० ७।१५।२६-२७) —

> यस्य साक्षाद् भगवति ज्ञानदीपप्रदे गुरौ ।
> मर्त्यासद्धीः श्रुतं तस्य सर्वं कुञ्जरशौचवत् ॥ ६२८ ॥
> एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः ।
> योगेश्वरैर्विमृग्याङ्घ्रिर्लोको यं मन्यते नरम् ॥ ६२९ ॥

एष श्रीकृष्णलक्षणोऽपि । ततः प्राकृतदृष्टिर्न भगवत्तत्त्वग्रहणे प्रमाणमिति भावः ॥ श्रीनारदो युधिष्ठिरम् ॥

२१३ । शुद्धभक्तास्त्वेके श्रीगुरोः श्रीशिवस्य च श्रीभगवता सहाभेददृष्टिं तत्प्रियतमत्वेनैव मन्यन्ते । यथा (भा० ४।३०।३८) —

> वयं तु साक्षाद् भगवन् भवस्य प्रियस्य सख्युः क्षणसङ्गमेन ।
> सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गताः स्म ॥ ६३० ॥

टीका च — "तव यः प्रियः सखा तस्य भवस्य । अत्यन्तमचिकित्स्यस्य भवस्य जन्मनो मृत्योश्च भिषक्तमं सद्वैद्यं त्वां गतिं प्राप्ताः" इत्येषा ।
श्रीशिवो ह्येषां वक्तॄणां गुरुः ॥ श्रीप्रचेतसः श्रीमदष्टभुजपुरुषम् ॥

२१४ । तदेवं रुच्यादिः श्रीगुर्वाश्रयान्त उपासनापूर्वाङ्गरूपः साम्मुख्यभेदो बहुविधो दर्शितः ।
अथ साक्षादुपासनालक्षणस्तद्भेदोऽपि बहुविधो दर्श्यते । तत्र साम्मुख्यं द्विविधम् — निर्विशेषमयं सविशेषमयं च । अत्र पूर्वं ज्ञानम् । उत्तरं तु द्विविधम् — अहङ्ग्रहोपासनारूपं भक्तिरूपं च ।
अथ ज्ञानस्य लक्षणम् "ज्ञानं चैकात्म्यदर्शनम्" (भा० ११।१९।२७) इति ।
अभेदोपासनं ज्ञानमित्यर्थः ॥ श्रीभगवान् ॥

२१५ । तत्साधनप्रकारश्चैवं बहुविधस्तत्र तत्रोक्तः । स च ज्ञानमेवोच्यते । तत्र श्रवणं श्रीपृथुसनत्कुमारसंवादादौ द्रष्टव्यम् ।
तदनुसारेण मननं च ज्ञेयम् । प्रथमतः श्रोतॄणां हि विवेकस्तावानेव यावता जडातिरिक्तं चिन्मात्रं वस्तूपस्थितं भवति । तस्मिंश्चिन्मात्रेऽपि वस्तुनि ये विशेषाः स्वरूपभूतशक्तिसिद्धा भगवत्तादिरूपा वर्तन्ते तांस्ते विवेक्तुं न क्षमन्ते यथा रजनीखण्डिनि ज्योतिषि ज्योतिर्मात्रत्वेऽपि ये मण्डलान्तर्बहिश्च दिव्यविमानादिपरस्परपृथग्भूतरश्मिपरमाणुरूपा विशेषास्तांश्चर्मचक्षुषो न क्षमन्त इत्यन्वयस्तद्वत् ।
पूर्ववच्च यदि महत्कृपाविशेषेण दिव्यदृष्टिता भवति तदा विशेषोपलब्धिश्च भवेत् । न चेन् निर्विशेषचिन्मात्रब्रह्मानुभवेन तल्लीन एव भवति ।
तथैव निदिध्यासनमपि तेषाम् । तद् यथा (भा० २।२।१५-१६) —

स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममङ्ग लोकम् ।
काले च देशे च मनो न सज्जयेत् प्राणान् नियच्छेन् मनसा जितासुः ॥ ६३१ ॥
मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निलयेत् तमात्मनि ।
आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् ॥ ६३२ ॥

एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि निलयेत् प्रविलापयेत् । तं च क्षेत्रज्ञं स्वरूपभूतया बुद्ध्या आत्मनि तद्द्रष्टृत्वादिरहिते शुद्धे जीवे । तं च शुद्धमात्मानमात्मनि ब्रह्मण्यवरुध्य तदेकत्वेन विचिन्त्य लब्धोपशान्तिः प्राप्तनिर्वृतिः सन् कृत्याद् विरमेत् तस्य ततः परं प्राप्याभावात् ॥ श्रीशुकः ॥

२१६ । तदेवं ज्ञानमुक्तम् । इदमेव “स्वभावोऽध्यात्ममुच्यते” (गीता ८।३) इत्यनेन श्रीगीतासूक्तम् । स्वस्य शुद्धस्यात्मनो भावो भावना । आत्मन्यधिकृत्य वर्तमानत्वादध्यात्मशब्देनोच्यत इत्यर्थः ।
अथाहङ्ग्रहोपासनम् — तच्छक्तिविशिष्ट ईश्वर एवाहमिति चिन्तनम् । अस्य फलं स्वस्मिंस्तच्छक्त्याद्याविर्भावः । यथा विष्णुपुराणे नागपाशादियन्त्रितः श्रीप्रह्लादस्तादृशमात्मानं स्मरन् नागपाशादिकमुत्सारितवान् । अत्रान्तिमफलं च कीटपेशस्कृन्न्यायेन सारूप्यसार्ष्ट्यादिकं ज्ञेयम् ।
अथ भक्तिः । तस्यास्तटस्थलक्षणं स्वरूपलक्षणं च । यथा गरुडपुराणे —

विष्णुभक्तिं प्रवक्ष्यामि यया सर्वमवाप्यते ।
यथा भक्त्या हरिस्तुष्येत् तथा नान्येन केनचित् ॥ ६३३ ॥

इत्युक्त्वाह —

भज इत्येष वै धातुः सेवायां परिकीर्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी ॥ ६३४ ॥ इति ।

अत्र “यया सर्वमवाप्यते” इति तटस्थलक्षणम् । अत्र च “अकामः सर्वकामो वा” (भा० २।३।१०) इत्यादिसिद्धत्वादव्याप्त्यभावः ।
यथा भक्त्येत्याद्युक्तत्वादहङ्ग्रहोपासनायामतिव्याप्त्यभावः । बुधैः प्रोक्तत्वादसम्भवाभावश्च ।
सेवाशब्देन स्वरूपलक्षणम् । सा च कायिकवाचिकमानसात्मिका त्रिविधैवानुगतिरुच्यते । अत एव भयद्वेषादीनामहङ्ग्रहोपासनायाश्च व्यावृत्तिः । साधनभूयसी साधनेषु श्रेष्ठेत्यर्थः ।
तदेव लक्षणद्वयं प्रकारान्तरेणाह (भा० ११।२।३४) —

ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ।
अञ्जः पुंसामविदुषां विद्धि भागवतान् हि तान् ॥ ६३५ ॥

अविदुषां पुंसां तन्माहात्म्यमविद्वद्भिरपि कर्तृभिः । आत्मनः — ब्रह्म परमात्मा भगवानित्याविर्भावभेदवतः स्वस्य कर्मभूतस्याञ्जोऽनायासेनैव लब्धये लाभाय ये उपायाः साधनानि स्वयं भगवता (भा० ११।१४।३) —

> कालेन नष्टा प्रलये वाणीयं वेदसञ्ज्ञिता ।
> मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ६३६ ॥

इत्यनुसारेण प्रोक्ताः ।
तानुपायान् भागवतान् धर्मान् विद्धि । हि प्रसिद्धौ । तत्र साक्षाद् भक्तेरपि भागवतधर्माख्यत्वम् "एतावानेव लोकेऽस्मिन्" (भा० ६।३।२२) इत्यादौ परमधर्मत्वख्यापनया दर्शितम् ।
अत्रात्मलब्धये प्रोक्ता इति तटस्थलक्षणम् । अन्येन तदलाभादव्यभिचारि । आत्मलब्धय उपाया इति तु स्वरूपलक्षणम् । तल्लाभोपायो हि तदनुगतिरेव ॥ श्रीकविर्निमिम् ॥

२१७ । सा भक्तिस्त्रिविधा — आरोपसिद्धा सङ्गसिद्धा स्वरूपसिद्धा च । तत्रारोपसिद्धा स्वतो भक्तित्वाभावेऽपि भगवदर्पणादिना भक्तित्वं प्राप्ता कर्मादिरूपा ।
सङ्गसिद्धा स्वतो भक्तित्वाभावेऽपि तत्परिकरतया संस्थापनेन "तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः" (भा० ११।३।२२) इत्यादिप्रकरणेषु "सर्वतो मनसोऽसङ्गम्" (भा० ११।३।२३) इत्यादिना लब्धतदन्तःपाता ज्ञानकर्मतदङ्गरूपा ।
स्वरूपसिद्धा चाज्ञानादिनापि तत्प्रादुर्भावे भक्तित्वाव्यभिचारिणी साक्षात्तदनुगत्यात्मा तदीयश्रवणकीर्तनादिरूपा "श्रवणं कीर्तनं विष्णोः" (भा० ७।५।२३) इत्यादौ विष्णोः श्रवणं विष्णोः कीर्तनमिति विशिष्टस्यैव विवक्षितत्वात् । तेषामपि नारोपसिद्धत्वं प्रत्युत मूढप्रोन्मत्तादिषु तदनुकर्तृष्वपि कथञ्चित् सम्बन्धेन फलप्रापकत्वात् स्वरूपसिद्धत्वम् । यथा श्रीप्रह्लादस्य पूर्वजन्मनि श्रीनृसिंहचतुर्दश्युपवासः । यथा कुक्कुरमुखगतस्य श्येनस्य भगवन्मन्दिरपरिक्रमः । एवमन्यदृष्ट्यादिना मूढादिभिः कृतस्य वन्दनस्यापि ज्ञेयम् । तदेवं त्रिविधापि सा पुनरकैतवा सकैतवा चेति द्विविधा ज्ञेया । तत्रारोपसङ्गसिद्धयोर्यस्या भक्तेः सम्बन्धेन भक्तिपदप्राप्त्यां सामर्थ्यं तन्मात्रापेक्षत्वं चेदकैतवत्वं स्वीयान्यदीयफलापेक्षत्वं चेत् सकैतवत्वम् ।
स्वरूपसिद्धायाश्च यस्य भगवतः सम्बन्धेन तादृशं माहात्म्यं तन्मात्रापेक्षपरिकरत्वं चेदकैतवत्वं प्रयोजनान्तरापेक्षया कर्मज्ञानपरिकरत्वं चेत् सकैतवत्वम् ।
इयमेवाकैतवाकिञ्चनाख्यत्वेन पूर्वमुक्ता "धर्मः प्रोज्झितकैतवोऽत्र परमः" (भा० १।१।२) इत्येव वास्य तदुभयविधत्वे प्रमाणं ज्ञेयम् । तथोक्तम् "प्रीयतेऽमलया भक्त्या हरिरन्यद् विडम्बनम्" (भा० ७।७।५२) इति ।
अथारोपसिद्धा । एतदर्थमेव "नैष्कर्म्यमप्यच्युतभाववर्जितम्" (भा० १।५।१२) इत्यादौ सकामनिष्कामयोर्द्वयोरपि कर्मणोर्निन्दा भगवद्वैमुख्याविशेषात् ।
तत्र यादृच्छिकचेष्टाया अपि भगवदर्पितत्वे भगवद्धर्मत्वं भवति किमुत वैदिककर्मण इति वक्तुं तस्या अपि तद्रूपत्वमाह (भा० ११।२।३६) —

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोति यद् यत् सकलं परस्मै नारायणायेति समर्पयेत् तत् ॥ ६३७ ॥

पूर्वं हि “धर्मान् भागवतान् ब्रूत” (भा० ११।२।३१) इति प्रश्नानन्तरम् “ये वै भगवता प्रोक्ताः” (भा० ११।२।३४) इत्यादिना मुख्यत्वेन साक्षात् तल्लब्धये उपायभूताः श्रवणकीर्तनादयो भागवतधर्मा लक्षिताः । ते चात्रैव “शृण्वन् सुभद्राणि रथाङ्गपाणेः” (भा० ११।२।३९) इत्यादि कतिचिद् दर्शिताः ।
उत्तराध्याये च “तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः” (भा० ११।३।२२) इत्युपक्रमवाक्यानन्तरम् “इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया” (भा० ११।३।३३) इत्युपसंहारवाक्यस्य प्राग् भागवतधर्मत्वेनान्यसङ्गादि त्यागादिकमपि वक्ष्यते “सर्वतो मनसोऽसङ्गम्” (भा० ११।३।२३) इत्यादिना । तस्मात् लौकिककर्माद्यर्पणमिदं यथाकथञ्चित् तद्धर्मसिद्ध्यर्थमेवोच्यते ।
अर्थश्चायं टीकायाम्—“आत्मना चित्तेनाहङ्कारेण वा । अनुसृतो यः स्वभावस्तस्मात् । अयमर्थः । न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारि लौकिकमपीति । श्रीगीतासु च (गीता ९।२७)—

यत् करोषि यदश्नासि यज् जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥ ६३८ ॥ इत्येषा ।

“इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः” इत्यादिकमन्त्रश्च तथा ।
अत्र स्वाभाविककर्मणोऽर्पणे दुष्कर्मणो द्विविधा गतिः । ज्ञानेच्छूनामविशेषेण भक्तीच्छूनां त्वनेन दुर्वासनदुःखदर्शनेन स करुणामयः करुणां करोत्विति वा (वि० पु० १।२०।१९)—

या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान् नापसर्पतु ॥ ६३९ ॥

इति विष्णुपुराणोक्तप्रकारेण ।

युवतीनां यथा यूनि यूनां च युवतौ यथा ।
मनोऽभिरमते तद्वन् मनो मे रमतां त्वयि ॥ ६४० ॥

इति पाद्मोक्तप्रकारेण च मम सुकर्मणि दुष्कर्मणि च यद् रागसामान्यं तत् सर्वतोभावेन भगवद्विषयमेव भवत्विति वा समाधेयम् ।
कामिनां तु सर्वथैव सर्वदुष्कर्मार्पणम् “वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे” (भा० ११।३।४६) इत्यत्र पुनर्वैदिकमेवेश्वरेऽर्पितं कुर्वाण इत्युक्तम् ॥ श्रीकविर्निमिम् ॥

२१८ । अथ वैदिककर्मार्पणस्य प्रशंसामाहुः (भा० ८।५।४७)—

क्लेशभूर्यल्पसाराणि कर्माणि विफलानि वा ।
देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥ ६४१ ॥

विषयार्तानां कर्माणि क्वचित् क्लेशो भूरि येषु तथाप्यल्पं फलं येषु तथाभूतानि भवन्ति क्वचित् कृष्यादिवद् विफलानि वा भवन्ति । त्वय्यर्पितं कर्म तु न तथा । किन्तु क्लेशं विना यथाकथञ्चित् कृतस्य कामनयाप्यर्पणे तत्कामस्यावश्यकप्राप्तिः । सा च सर्वत उत्कृष्टा भवति । तथा तन्मात्रफलेन च पर्याप्तिर्न भवति संसारविध्वंसादिफलत्वादित्यर्थः ।
तदुक्तम् (भा० ११।२।३५) —

यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित् ।
धावन् निमील्य वा नेत्रे न स्खलेन् न पतेदिह ॥ ६४२ ॥ इति ।

"सत्यं दिशत्यर्थितमर्थितो नृणाम्" (भा० ५।१९।२७) इत्यादि च ।
यथैव नाभिः श्रीऋषभदेवरूपं भगवन्तं पुत्रत्वेनापि लेभे ।
श्रीगीतासु च (गीता २।४०) —

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ६४३ ॥ इति ॥

देवाः श्रीमदजितम् ॥

२१९-२२१ । तदेव कर्मार्पणमुपपादयति त्रिभिः (भा० १।५।३२) —

एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम् ।
यदीश्वरे भगवति कर्म ब्रह्मणि भावितम् ॥ ६४४ ॥

ब्रह्मन् ! हे वेदव्यास ! एतत् तापत्रयस्य चिकित्सितं चिकित्सा तैश्चातुर्मास्यवासिभिः परमहंसैः सूचितम् । किं तत् ? भगवति कर्म यत् समर्पितं भवति । तत्र कर्मसमर्पणमेवेत्यर्थः ।
कथम्भूते ? स्वयं भगवति पूर्णस्वरूपैश्वर्यादिमत्तया सर्वांशिन्येव केनचिदंशेन जीवादिनियन्तृतया ईश्वरे परमात्मशब्दवाच्ये स्वरूपभूतविशेषेण विना केवलचिन्मात्रतया प्रतिपाद्यत्वेन ब्रह्मणि तच्छब्दवाच्ये ॥
ननु उत्पत्त्यैव तत्तत्सङ्कल्पेन विहितत्वात् संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वम् ? उच्यते — सामग्रीभेदेन घटत इति ।
यथा (भा० १।५।३३) —

आमयो यश्च भूतानां जायते येन सुव्रत ।
तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ॥ ६४५ ॥

य आमयो रोगो येन घृतादिना जायते तदेव केवलमामयकारणं द्रव्यं तमामयं न निवर्तयति किन्तु चिकित्सितं द्रव्यान्तरैर्भावितं तत् निवर्तयत्येव ॥
भा० १।५।३४—

> एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ।
> त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥ ६४६ ॥

परे भगवति कल्पिताः कामनयाप्यर्पिताः सन्तः संसारध्वंसपर्यन्तफलत्वादात्मविनाशाय कर्मनिवृत्तये कल्पन्ते ॥ श्रीनारदो श्रीवेदव्यासम् ॥

२२२ । किं च कर्मफलं वस्तुतो भगवदाश्रयमेव । तत् तु दुर्बुद्धेरात्मसात्कुर्वतो युक्त्यैव तुच्छफलप्राप्तिः संसारश्च । सुधियस्तु तत्सात्कुर्वतस्तद्वैपरीत्यमित्याह गद्याभ्याम् “सम्प्रचरत्सु नानायागेषु विरचिताङ्गक्रियेष्वपूर्वं यत्तत् क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवांस्तान् पुरुषावयवेष्वभ्यध्यायत्” (भा० ५।७।६) इति ।
टीका च—“सम्प्रचरत्सु प्रवर्तमानेषु नानायागेषु विरचिता अनुष्ठिता अङ्गक्रिया येषु तेषु यदपूर्वं तद् वासुदेव एव भावयमानः सञ्चिन्तयन् स यजमानो यज्ञभागभाजो ये देवाः सूर्यादयस्तान् पुरुषस्य वासुदेवस्यावयवेषु चक्षुरादिष्वभ्यध्यायत् न तु तत्पृथक्त्वेनेत्यन्वयः ।
“अपूर्वे पक्षद्वयं मीमांसकानाम् । तदिदानीमेव सूक्ष्मत्वेनोत्पन्नं फलमेवापूर्वं कालान्तरे फलोत्पादिका कर्मशक्तिर्वेति । तदुक्तम्—

> यागादेव फलं तद्धि शक्तिद्वारेण सिध्यति ।
> सूक्ष्मशक्त्यात्मकं वापि फलमेवोपजायते ॥ ६४७ ॥ इति ।

“तदेतदाह—क्रियाफलं धर्माख्यमिति च ।
“ननु यद्यङ्गं देवता कर्म प्रधानमिति मतं तर्हि कर्तृनिष्ठमपूर्वं स्यात् । तदुक्तम्—

> कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।
> योग्यता शास्त्रगम्या या परा सापूर्वमिष्यते ॥ ६४८ ॥ इति ।

“अथ देवताप्रधानं कर्म तु देवताराधनार्थम् । तदा देवताप्रसादरूपत्वादपूर्वस्य देवताश्रयत्वमेव युक्तम् । कर्मभ्यः प्रागयोग्यस्य प्रोक्षणाद्यपूर्वस्येव व्रीह्याद्याश्रयत्वम् । कुतो वासुदेवाश्रयमपूर्वं भावयति ?
“उच्यते—यदि कर्तृनिष्ठमपूर्वं स्यात् तर्हि वासुदेवस्यान्तर्यामिणः प्रवर्तकत्वेन मुख्यकर्तृत्वात् तदाश्रयमेवापूर्वं न तु तत्प्रयोज्ययजमानाश्रयम् ‘शास्त्रफलं प्रयोक्तरि’ इति न्यायात् ।

“अन्यथा ऋत्विजामप्यपूर्वाश्रयत्वप्रसङ्गात् । तदेतदाह — साक्षात्कर्तरीति ।
“देवताश्रयत्वेऽपि वासुदेवाश्रयत्वमेवेत्याह — परदेवतायामिति । परदेवतात्वे हेतुः — सर्वदेवतालिङ्गानां तत्तद्देवताप्रकाशकानां मन्त्राणां ये अर्था इन्द्रादिदेवतास्तेषां नियामकतया तस्यैव प्रसादनीयत्वात् फलदातृत्वाच्च युक्तमेवापूर्वाश्रयत्वमित्यर्थः ।
“एवं भावनमेव आत्मनो नैपुण्यं कौशलं तेन मृदिताः क्षीणाः कषाया रागादयो यस्य । अध्वर्युभिरिति बहुवचनं नानाकर्माभिप्रायेण” इत्येषा ।
अत्र विष्णोरङ्गित्वे प्राप्ते यज्ञाङ्गत्वेन तद्भजनं च दोष इति लभ्यते । अत्र पाद्मोत्तरखण्डे यथा —

उद्दिश्य देवता एव जुहोति च ददाति च ।
स पाषण्डीति विज्ञेयः स्वतन्त्रो वापि कर्मसु ॥ ६४९ ॥ इति ।

पाषण्डत्वमत्र वैष्णवमार्गाद् भ्रष्टत्वमित्यर्थः ।
श्रीगीतासु च (गीता ९।२३-२४) —

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ ६५० ॥
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ ६५१ ॥ इति ।

अतो वास्तवविचारे सर्व एव वेदमार्गाः श्रीभगवत्येव पर्यवस्यन्तीत्यभिप्रेत्योक्तं श्रीमदक्रूरेण (भा० १०।४०।९-१०) —

सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम् ।
येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥ ६५२ ॥
यथाद्रिप्रभवा नद्यः पर्जन्यापूरिता विभो ।
विशन्ति सर्वतः सिन्धुं तद्वत् त्वां गतयोऽन्ततः ॥ ६५३ ॥ इति ।

गतयो मार्गाः । अन्ततो विचारपर्यवसानेन ॥

२२३ । अथ द्वितीयं गद्यम् “एवं कर्मविशुद्ध्या विशुद्धसत्त्वस्यान्तर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तुभवनमालारिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाजायत” (भा० ५।७।७) इति ।
एवं पूर्वोक्तप्रकारेण कर्मविशुद्ध्या विशुद्धसत्त्वस्य भक्तिः सश्रद्धश्रवणकीर्तनादिलक्षणा अजायतेत्यन्वयः ।

क्वचिद् भगवति वासुदेवे पूर्णस्वरूपभगाभ्यां सर्वनिवासेन च तन्नाम्ना प्रसिद्धे अन्तर्हृदये य आकाशः स एव शरीरं स्वस्यैवाविर्भावविशेषाधिष्ठानं यस्य तस्मिन्नन्तर्यामिणि परमात्माख्ये ब्रह्मणि निर्विशेषतयाविर्भावात् तदाख्ये च । भगवतो निराकारत्वं वारयति महापुरुषस्य यद् रूपं शास्त्रे श्रूयते तदुपलक्ष्यते दृश्यते यत्र तस्मिन् । किं च श्रीवत्सादिभिरपि चिह्निते । एधमानरया वर्धमानप्रकर्षा ।। श्रीशुकः ।।

२२४ । तदेतत् कर्मार्पणं द्विविधम्—भगवत्प्रीणनरूपं तस्मिंस्तत्त्यागरूपं चेति । यथोक्तं कौर्म्ये—

प्रीणातु भगवानीशः कर्मणानेन शाश्वतः ।
करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम् ।। ६५४ ।।
यद्वा फलानां सन्न्यासं प्रकुर्यात् परमेश्वरे ।
कर्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम् ।। ६५५ ।। इति ।

अत्र निमित्तानि च त्रीणि—कामना नैष्कर्म्यं भक्तिमात्रं चेति । निष्कामत्वं तु केवलं न सम्भवति "यद् यद्धि कुरुते जन्तुस्तत्तत् कामस्य चेष्टितम्" इत्युक्तेः ।
अत्र कामनानैष्कर्म्ययोः प्रायः कर्मत्यागः । प्रीणनं तु तदाभास एव स्वार्थपरत्वात् । भक्तौ पुनः प्रीणनमेव भक्तेस्तदेकजीवनत्वात् ।
कामनाप्राप्तिर्यथा "क्लेशभूर्यल्पसाराणि" (भा० ८।५।४७) इत्यादि ।
यथा चाङ्गस्य राज्ञः पुरुषार्थके यज्ञे ।
नैष्कर्म्यप्राप्तिश्च "वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे नैष्कर्म्यं लभते सिद्धिम्" (भा० ११।३।४६) इत्यत्र ।
अथ भक्तिप्राप्तिश्च "एवं कर्मविशुद्ध्या" (भा० ५।७।७) इत्यादिगद्ये दर्शितैव ।
भा० १।५।३५—

यदत्र क्रियते कर्म भगवत्परितोषणम् ।
ज्ञानं यत् तदधीनं हि भक्तियोगसमन्वितम् ।। ६५६ ।। इत्यत्र च ।

भक्तियोगसहचरत्वाद् ज्ञानमत्र भगवज्ज्ञानम् ।
परमभक्तास्तु भगवत्परितोषणं प्रीणनमेव प्रार्थयन्ते (भा० ४।३०।३९-४०)—

यन् नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ।
आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ।। ६५७ ।।
यन् नः सुतप्तं तप एतदीश निरन्धसां कालमदभ्रमप्सु ।
सर्वं तदेतत् पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ।। ६५८ ।।

अदभ्रं बहुकालं ते तव परितोषणाय भवत्विति वृणीमहे ।। प्रचेतसः श्रीमदष्टभुजं पुरुषम् ।।

२२५ । तदेवमारोपसिद्धा दर्शिता । अथ सङ्गसिद्धोदाहरणप्राप्ता मिश्रा भक्तिर्दर्श्यते । स्वरूपसिद्धासङ्गेन ह्यन्येषामपि भक्तित्वं दर्शितम् "तत्र भागवतान् धर्मान्" (भा० ११।३।२२) इत्यादिश्रीप्रबुद्धवाक्यप्रकरणे सर्वासङ्गदयामैत्र्यादीनामपि भागवतधर्मत्वाभिधानात् ।
तत्र कर्ममिश्रा त्रिविधा सम्भवति — सकामा कैवल्यकामा भक्तिमात्रकामा च ।
यद्यपि कामकैवल्ये अपि —

या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये ।
तया विना तदाप्नोति नरो नारायणाश्रयः ॥ ६५९ ॥

इत्युक्तेः केवलयैव भक्त्या सम्भवतस्तथापि तत्तद्वासनानुसारेण तत्र तत्र रुचिर्जायते । इत्येवं तत्तदर्थं तन्मिश्रता तु जायत इत्यवगन्तव्यम् ।
ततः सकामा प्रायः कर्ममिश्रैव । तत्र कर्मशब्देन धर्म एव गृह्यते । तल्लक्षणं च यमदूतैः सामान्यत उक्तम् "वेदप्रणिहितो धर्मः" (भा० ६।१।४०) इति ।
वेदोऽत्र त्रैगुण्यविषयः "त्रैगुण्यविषया वेदाः" (गीता २।४५) इति श्रीगीतोक्तेः । तत्प्रवर्तनमात्रत्वेन सिद्धः । न तु भक्तिवदज्ञानेनापीत्यर्थः ।
श्रीगीतास्वेवान्यत्र तस्य कर्मसञ्ज्ञितत्वं चोक्तम् "भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः" (गीता ८।३) इति ।
विसर्गो देवतोद्देशेन द्रव्यत्यागः । तदुपलक्षितः सर्वोऽपि धर्मः कर्मसञ्ज्ञित इत्यर्थः । स च भूतानां प्राणिनां ये भावा वासनास्तेषामुद्भवकर इति विशेषणाद् भगवद्भक्तिर्व्यावृत्ता ।
अथ भक्तिसङ्गाय धर्मस्य वैशिष्ट्यं चैकादशे श्रीभगवतोक्तम् "धर्मो मद्भक्तिकृत् प्रोक्तः" (भा० ११।१९।२७) इति । भगवदर्पणेन भक्तिपरिकरीकृतत्वेन च भक्तिकृत्त्वमुच्यते ।
तदेवमीदृशेन कर्मणा मिश्रा सकामा भक्तिर्यथा (भा० ३।२१।६-७) —

प्रजाः सृजेति भगवान् कर्दमो ब्रह्मणोदितः ।
सरस्वत्यां तपस्तेपे सहस्राणां समा दश ॥ ६६० ॥
ततः समाधियुक्तेन क्रियायोगेन कर्दमः ।
सम्प्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषम् ॥ ६६१ ॥

अत्र तद्दर्शनजातभगवदश्रुपातलिङ्गेन निष्कामस्याप्यस्य ब्रह्मादेशगौरवेणैव कामना ज्ञेया ॥ श्रीमैत्रेयो विदुरम् ॥

२२६ । अथ कैवल्यकामा । क्वचित् कर्मज्ञानमिश्रा क्वचिद् ज्ञानमिश्रा च । तत्र ज्ञानम् "ज्ञानं चैकात्म्यदर्शनम्" (भा० ११।१९।२७) इति दर्शितम् । तदीयश्रवणादीनां वैराग्ययोगसाङ्ख्यानां च तदङ्गत्वात् तदन्तःपातः ।
अथ कर्मज्ञानमिश्रा यथा (भा० ३।२७।२१-२३) —

अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना ।
तीव्रया मयि भक्त्या च श्रुतसम्भृतया चिरम् ॥ ६६२ ॥
ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा ।
तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना ॥ ६६३ ॥
प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम् ।
तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥ ६६४ ॥

निमित्तं फलं तन् न निमित्तं प्रवर्तकं यस्मिन् तेन निष्कामेन । अमलात्मना निर्मलेन मनसा । ज्ञानेन शास्त्रोत्थेन । योगो जीवात्मपरमात्मनोर्ध्यानम् "योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इति नानार्थवर्गात् । ध्यानमेव ध्यातृध्येयविवेकरहितं समाधिः । अत्र "सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्" (भा० १०।८१।१९) इत्युक्त्या भक्तेरेवाङ्गित्वेऽप्यङ्गवन् निर्देशस्तेषां तत्र साधनान्तरसामान्यदृष्टिरित्यभिप्रायेण । अत एव तेषां मोक्षमात्रमेव फलमिति ॥ श्रीकपिलदेवः ॥

२२७ । अथ ज्ञानमिश्रामाह (भा० ११।१८।२१) —

विविक्तक्षेमशरणो मद्भावविमलाशयः ।
आत्मानं चिन्तयेदेकमभेदेन मया मुनिः ॥ ६६५ ॥

भावो भावना ॥ श्रीभगवान् ॥

२२८ । तदेवं कैवल्यकामायां ज्ञानमिश्रोक्ता । अथ भक्तिमात्रकामायां कर्ममिश्रा यथा (भा० ११।१९।२०, २३–२४) —

श्रद्धामृतकथायां मे शश्वन् मदनुकीर्तनम् ।
परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥ ६६६ ॥ इत्यादि ।
मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ।
इष्टं दत्तं हुतं जप्तं मदर्थं यद् व्रतं तपः ॥ ६६७ ॥
एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ।
मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥ ६६८ ॥ इत्यन्तम् ।

मदर्थे मद्भजनार्थं तद्विरोधितोऽर्थस्य परित्यागः । भोगस्य तत्साधनस्य चन्दनादेः । सुखस्य पुत्रोपलालनादेः । इष्टादि वैदिकं यत् कर्म तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः ।
धर्मैर्भागवताभिधैः । एवं कायवाङ्मनोभिस्तदर्थमात्रचेष्टावत्त्वेनानुष्ठितैर्भगवद्धर्मैरात्मनिवेदिनाम् "यस्यास्ति भक्तिर्भगवत्यकिञ्चना" (भा० ५।१८।१२) इत्यादिन्यायेनास्य भक्तिमात्रकामस्यान्यः कोऽर्थः साधनरूपः साध्यरूपो वावशिष्यते ? सर्वोऽसावनादृतोऽपि तदाश्रितोऽपि भवतीत्यर्थः ॥ श्रीभगवान् ॥

२२९ । कर्मज्ञानमिश्रा यथा (भा० ३।२९।१५-१९) —

निषेवितेनानिमित्तेन स्वधर्मेण महीयसा ।
क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥ ६६९ ॥
मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः ।
भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च ॥ ६७० ॥
महतां बहुमानेन दीनानामनुकम्पया ।
मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ॥ ६७१ ॥
आध्यात्मिकानुश्रवणान् नामसङ्कीर्तनाच्च मे ।
आर्जवेनार्यसङ्गेन निरहङ्क्रियया तथा ॥ ६७२ ॥
मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः ।
पुरुषस्याञ्जसाभ्येति श्रुतमात्रगुणं हि माम् ॥ ६७३ ॥

निषेवितेन सम्यगनुष्ठितेन । अनिमित्तेन च निष्कामेन । स्वधर्मेण नित्यनैमित्तिकेन । महीयसा श्रद्धादियुक्तेन ।
क्रियायोगेन पञ्चरात्राद्युक्तवैष्णवानुष्ठानेन । शस्तेन उत्तमदेशकालादिमता निष्कामेन च । नातिहिंस्रेण अतिहिंसारहितेन । अतिशब्दः प्राणादिपीडापरित्यागफलपत्रादिजीवावयवस्वीकारार्थः ।
मद्धिष्ण्यं मदर्चादि । भूतेष्वन्तर्यामित्वेन मद्भावनया । सत्त्वेन धैर्येण । असङ्गमेन वैराग्येण च "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" । "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" । आध्यात्मिकमात्मानमात्मविवेकशास्त्रम् । निरहङ्क्रियया गर्वराहित्येन ।
मद्धर्मणो मद्धर्मानुष्ठातुः पुरुषस्याशयश्चित्तम् । श्रुतमात्रगुणं मामञ्जसाभ्येति "मद्गुणश्रुतिमात्रेण मयि" (भा० ३।२९।११) इत्याद्युक्तलक्षणां ध्रुवानुस्मृतिं प्राप्नोतीत्यर्थः ।
अत्राध्यात्मिकश्रवणादिना ज्ञानाङ्गेन ज्ञानमिश्रत्वमपि ॥ श्रीकपिलदेवः ॥

२३० । अथ ज्ञानमिश्रा (भा० ६।१६।६२) —

दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ।
ज्ञानविज्ञानसन्तृप्तो मद्भक्तः पुरुषो भवेत् ॥ ६७४ ॥

दृष्टेति ऐहिकामुष्मिकविषयैः । स्वेन तेजसा विवेकबलेन ॥ श्रीसङ्कर्षणश्चित्रकेतुम् ॥

२३१ । अथ केवलस्वरूपसिद्धोदाह्रियते । तत्र सकामा कैवल्यकामा चोपासकसङ्कल्पगुणैस्तत्तद्गुणत्वेनोपचर्यते ।
ततः सकामा द्विविधा — तामसी राजसी च । पूर्वा यथा (भा० ३।२९।८) —

अभिसन्धाय यो हिंसां दम्भं मात्सर्यमेव वा ।
संरम्भी भिन्नदृग् भावं मयि कुर्यात् स तामसः ॥ ६७५ ॥

अभिसन्धाय सङ्कल्प्य । संरम्भी सक्रोधः । भिन्नदृक् स्वस्मिन्निव सर्वत्र यत् सुखं दुःखं च तत्तदवेत्ता निरनुकम्प इत्यर्थः ॥

२३२ । उत्तरा यथा (भा० ३।२९।९) —

विषयानभिसन्धाय यश ऐश्वर्यमेव वा ।
अर्चादावर्चयेद् यो मां पृथग्भावः स राजसः ॥ ६७६ ॥

पृथक् मत्तोऽन्यत्र विषयादिष्वेव भावः स्पृहा यस्य न तु मयीति राजसत्वहेतुता दर्शिता ॥

२३३ । अथ कैवल्यकामा सात्त्विक्येव । सा यथा (भा० ३।२९।१०) —

कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम् ।
यजेद् यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ॥ ६७७ ॥

कर्मनिर्हारं मोक्षमुद्दिश्य परस्मिन् परमेश्वरे यो वा कर्मार्पणं कुरुते यो वा यष्टव्यं सर्वेषां नित्यविधिप्राप्तत्वेनावश्यमेव तत्पूजनं कर्तव्यमिति बुद्ध्या न तु भक्तितत्त्वज्ञानेन यो यजेत् परमेश्वरं पूजयति अत एव पूर्ववत् पृथग्भावो भक्तेः पृथङ् मोक्षमेव पुरुषार्थत्वेन भावयन् स सात्त्विक उच्यते । उत्तरस्या अपि तात्पर्यं कर्मनिर्हार एव भवेदिति ।
उक्तं च "सात्त्विकः कारकोऽसङ्गी" (भा० ११।२५।२६) इति "कैवल्यं सात्त्विकं ज्ञानम्" (भा० ११।२५।२४) इति "सात्त्विकं सुखमात्मोत्थम्" (भा० ११।२५।२८) इति च तत्साधनसाध्ययोः सगुणत्वम् । अत्रत्योदाहरणं यजेदित्युत्तरार्द्धमेव ॥

२३४ । अथ यस्या एवोत्कर्षज्ञानार्थमेते भक्तिभेदा निरूपिताः सा भक्तिमात्रकामत्वान् निष्कामा निर्गुणा केवला स्वरूपसिद्धा निरूप्यते । इयमेवाकिञ्चनाख्यत्वेन सर्वोर्द्ध्वं पूर्वमप्यभिहिता ।
तामाह (भा० ३।२९।११-१४) —

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥ ६७८ ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥ ६७९ ॥
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥ ६८० ॥
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ।
येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥ ६८१ ॥

मद्गुणश्रुतिमात्रेण न तु तत्रोद्देश्यान्तरसिद्ध्यभिप्रायेण ।

प्राकृतगुणमयकरणानां सर्वेषां गुहा करणागोचरपदवी तस्यां शेते गुह्यतया निश्चलतया च तिष्ठति यस्तस्मिन् मय्यविच्छिन्ना विषयान्तरेण विच्छेत्तुमशक्या या मनोगतिः सा ।
अविच्छिन्नत्वे दृष्टान्तः — यथेति । गतिरिति पूर्वस्मादाकृष्यते छान्दसत्वात् नित्यापेक्षत्वात् । लक्षणं स्वरूपम् ।
ननु तस्या गुणश्रुतेः का वार्ता । उद्देश्यान्तराभावेन मनोगतित्वाभावेन च द्विधापि निर्देष्टुमशक्त्यत्वात् ?
तत्राह — अहैतुकी फलानुसन्धानरहिता । अव्यवहिता स्वरूपसिद्धत्वेन साक्षाद्रूपा न त्वारोपादिसिद्धत्वेन व्यवधानात्मिका । तादृशी या भक्तिः श्रोत्रादिना सेवनमात्रं सा च तस्य स्वरूपमित्यर्थः ।
मात्रपदेनाविच्छिन्नेत्यनेन च मनोगतेरहैतुकीत्वादिसिद्धेः पृथग्योजनानर्हत्वात् "सात्त्विकः कारकोऽसङ्गी" (भा० ११।२५।२६) इत्यादिषु "निर्गुणो मदपाश्रयः" इत्यादिभिस्तदाश्रयक्रियादीनां निर्गुणत्वस्थापनात् (भा० ११।१३।४०) —

मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् ।
सुहृदं सर्वभूतानां साम्यासङ्गादयोऽगुणाः ॥ ६८२ ॥

इत्यत्र तद्गुणानामप्यप्राकृतत्वश्रवणात् ।
अहैतुकीत्वमेव विशेषतो दर्शयति — जना मदीयाः । सालोक्यादिकमप्युत अपि दीयमानमपि न गृह्णन्ति । मत्सेवनं विनेति गृह्णन्ति चेत् तर्हि मत्सेवनार्थमेव गृह्णन्ति न तु तदर्थमेवेत्यर्थः ।
सार्ष्टिः समानैश्वर्यम् । एकत्वं भगवत्सायुज्यं ब्रह्मसायुज्यं च । अनयोस्तल्लीलात्मकत्वेन तत्सेवनार्थत्वाभावादग्रहणावश्यकत्वमेवेति भावः ।
तस्मात् स एव निर्गुणभक्तियोगाख्य आत्यन्तिकः स एव चात्यन्तिकफलतया भवतीत्यपवर्ग इत्यर्थः "नात्यन्तिकं विगणयन्ति" (भा० ३।१५।४८) इत्यादेः । आत्यन्तिकप्रलयतया तत्प्रसिद्धेश्च ।
ननु गुणत्रयात्ययपूर्वकभगवत्साक्षात्कार एवापवर्ग इति चेत् तस्यापि तादृशधर्मत्वं स्वतः सिद्धमेवेत्याह — येनेति । येन कदाचिदप्यपरित्याज्येन मम भावाय विद्यमानतायै साक्षात्कारायेत्यर्थः । उपपद्यते समर्थो भवति ।
यथोक्तं पञ्चमे "यथावर्णविधानमपवर्गश्च भवति योऽसौ भगवति" (भा० ५।१९।१९–२०) इत्यादिकम् "अनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण" इत्यन्तम् ।
अतो निर्गुणापि बहुधैवावगन्तव्या । एवमेवोक्तमेतत्प्रकरणारम्भे (भा० ३।२९।७) —

भक्तियोगो बहुविधो मार्गैर्भाविनि भाव्यते ।
स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ॥ ६८३ ॥ इति ।

मार्गैः प्रकारविशेषैः । अतः स्वस्य भक्तियोगस्यैव मार्गेण वृत्तिभेदेन श्रवणादिना भावस्याभिमानस्य तद्भेदेन दास्यादिना गुणानां तमआदीनां च तद्भेदेन हिंसादिना पुंसां भावोऽभिप्रायो विभिद्यत इत्यर्थः ।
अत्र मुक्ताफलटीका च "अयमात्यन्तिकः । ततः परं प्रकारान्तराभावात् । अस्यैव भक्तियोग इत्याख्यान्वर्थेन भक्तिशब्दस्यात्रैव मुख्यत्वात् । इतरेषु फल एवानुरागो न तु विष्णौ फललाभेन भक्तित्यागात्" इत्येषा ।
श्रीगोपालतापनीश्रुतौ च "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन् । मनःकल्पनमेतदेव च नैष्कर्म्यम्" (गो० ता० उ० १।१५) इति ।
शतपथश्रुतौ "स होवाच याज्ञवल्क्यस्तत् पुमानात्महिताय प्रेम्णा हरिं भजेत्" इति ।
प्रेम्णा प्रीतिमात्रकामनया यदात्महितं तस्मै इत्यर्थः ॥ श्रीकपिलदेवः ॥

२३५ । तदेवं बहुधा साधितैषा अकिञ्चनात्यन्तिकीत्यादिसञ्ज्ञा भक्तिर्द्विविधा — वैधी रागानुगा चेति ।
तत्र वैधी शास्त्रोक्तविधिना प्रवर्तिता । स च विधिर्द्विविधः — तत्र प्रथमः प्रवृत्तिहेतुस्तदनुक्रमकर्तव्याकर्तव्यानां ज्ञानहेतुश्च ।
प्रथमस्तूदाहृतः (भा० १।२।१४) —

तस्मादेकेन मनसा भगवान् सात्वतां पतिः ।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ ६८४ ॥ इत्यादिना ।

द्वितीयश्चार्चनव्रतादिगतः । तमाह (भा० ११।२७।५३) —

मामेव नैरपेक्ष्येण भक्तियोगेन विन्दति ।
भक्तियोगं स लभत एवं यः पूजयेत माम् ॥ ६८५ ॥

नैरपेक्ष्येण अहैतुकेन । अहैतुकभक्तियोग एव कथं स्यात् ? तत्राह — भक्तियोगमिति ।
एवम् (भा० ११।२७।८-९) —

यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः ।
यथा यजेत मां भक्त्या श्रद्धया तन् निबोध मे ॥ ६८६ ॥
अर्चायां स्थण्डिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजे ।
द्रव्येण भक्तियुक्तोऽर्चेत् स्वगुरुं माममायया ॥ ६८७ ॥

इत्याद्युक्तविधिना ।
एवमेकादशीजन्माष्टम्यादिगतोऽपि ज्ञेयः ॥ श्रीभगवान् ॥

२३६ । अथ वैधीभेदाः शरणापत्तिश्रीगुर्वादिसत्सेवाश्रवणकीर्तनादयः । एते च प्रत्येकमपि द्वित्रादयः समुदित्यापि कारणानि भवन्ति तथा श्रवणात् ।

तत्र प्रथमतः शरणापत्तिः । षड्वर्गाद्यरिकृतसंसारभयबाध्यमान एव हि शरणं प्रविशत्यनन्यगतिः । भक्तिमात्रकामोऽपि तत्कृतभगवद्वैमुख्यबाध्यमानः ।
अनन्यगतित्वं च द्विधा दर्श्यते — आश्रयान्तरस्याभावकथनेन नातिप्रज्ञया कथञ्चिदाश्रितस्यान्यस्य त्याजनेन च ।
पूर्वेण यथा (भा० १०।३।२७) —

मर्त्यो मृत्युव्यालभीतः पलायन् लोकान् सर्वान् निर्भयं नाध्यगच्छत् ।
त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ॥ ६८८ ॥ इति ।

उत्तरेण यथा (भा० ११।१२।१४–१५) —

तस्मात् त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् ।
प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥ ६८९ ॥
मामेकमेव शरणमात्मानं सर्वदेहिनाम् ।
याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः ॥ ६९० ॥ इति ।

"चोदनां श्रुतिं प्रतिचोदनां स्मृतिम्" इति टीका च ।
श्रीगीतासु च "सर्वधर्मान् परित्यज्य" (गीता १८।६६) इत्यादि ।
तस्याः शरणापत्तेर्लक्षणं वैष्णवतन्त्रे —

आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासो गोप्तृत्वे वरणं तथा ॥ ६९१ ॥
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥ ६९२ ॥ इति ।

अङ्गाङ्गिभेदेन षड्विधा । तत्र गोप्तृत्वे वरणमेवाङ्गि शरणागतिशब्देनैकार्थ्यादन्यानि त्वङ्गानि तत्परिकरत्वात् ।
आनुकूल्यप्रातिकूल्ये तद्भक्तादीनां शरणागतस्य भावस्य वा ।
रक्षिष्यतीति विश्वासः "क्षेमं विधास्यति स नो भगवांस्त्र्यधीशः" (भा० ३।१६।३७) इत्यादिप्रकारः ।
आत्मनिक्षेपः "केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि" इति गौतमीयतन्त्रोक्तप्रकारः ।
यथोक्तं पाद्मोत्तरखण्डे चाष्टाक्षरस्य नमःशब्दव्याख्याने —

अहङ्कृतिर्मकारः स्यान् नकारस्तन्निषेधकः ।
तस्मात् तु नमसा क्षेत्रिस्वातन्त्र्यं प्रतिषिध्यते ॥ ६९३ ॥
भगवत्परतन्त्रोऽसौ तदायत्तात्मजीवनः ।
तस्मात् स्वसामर्थ्यविधिं त्यजेत् सर्वमशेषतः ॥ ६९४ ॥

ईश्वरस्य तु सामर्थ्यान् नालभ्यं तस्य विद्यते ।
तस्मिन् न्यस्तभरः शेते तत्कर्मैव समाचरेत् ॥ ६९५ ॥ इति ।

अत एव ब्रह्मवैवर्ते —

अहङ्कारनिवृत्तानां केशवो न हि दूरगः ।
अहङ्कारयुतानां हि मध्ये पर्वतराशयः ॥ ६९६ ॥ इति ।

अत एव तृतीये ब्रह्मस्तवे स्वातन्त्र्याभिमानिनः संसारः श्रूयते (भा० ३।९।९) —

यावत् पृथक्त्वमिदमात्मन इन्द्रियार्थमायाबलं भगवतो जन ईश पश्येत् ।
तावन् न संसृतिरसौ प्रतिसङ्क्रमेत व्यर्थापि दुःखनिवहं वहती क्रियार्था ॥ ६९७ ॥
इति ।

कार्पण्यम् “परमकारुणिको न भवत्परः परमशोच्यतमो न च मत्परः” (पद्यावली ६६) इत्यादिप्रकारम् ।
गोप्तृत्वे वरणं च यथा नारसिंहे —

त्वां प्रपन्नोऽस्मि शरणं देवदेवं जनार्दनम् ।
इति यः शरणं प्राप्तस्तं क्लेशादुद्धराम्यहम् ॥ ६९८ ॥

इति प्रकारम् ।
तदपि त्रिप्रकारं कायिकत्वादिभेदेन । यथोक्तं ब्रह्मपुराणे —

कर्मणा मनसा वाचा येऽच्युतं शरणं गताः ।
न समर्थो यमस्तेषां ते मुक्तिफलभागिनः ॥ ६९९ ॥ इति ।

व्याख्यातं श्रीहरिभक्तिविलासे (ह० भ० वि० ११।६७७) —

तवास्मीति वदन् वाचा तथैव मनसा विदन् ।
तत्स्थानमाश्रितस्तन्वा मोदते शरणागतः ॥ ७०० ॥ इति ।

तदेवं यस्य सर्वाङ्गसम्पन्ना शरणापत्तिस्तस्य झटित्येव सम्पूर्णफला अन्येषां तु यथासम्पत्ति यथाक्रमं चेति ज्ञेयम् ।
तामेतां शरणापत्तिं श्लाघते (भा० ११।१९।९) —

तापत्रयेणाभिहतस्य घोरे सन्तप्यमानस्य भवाध्वनीश ।
पश्यामि नान्यच्छरणं तवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षात् ॥ ७०१ ॥

शरणागतानां सर्वदुःखदूरीकरणं निजमाधुरीणां सर्वतोवर्षं चात्राभिहितम् ॥ उद्धवः श्रीभगवन्तम् ॥

२३७ । तदेवं शरणापत्तिर्विवृता । अस्याश्च पूर्वत्वं तां विना तदीयत्वासिद्धेः ।
तत्र यद्यपि शरणापत्त्यैव सर्वं सिध्यति —

शरणं तं प्रपन्ना ये ध्यानयोगविवर्जिताः ।
ते वै मृत्युमतिक्रम्य यान्ति तद् वैष्णवं पदम् ॥ ७०२ ॥

इति गारुडात् ।
तथापि वैशिष्ट्यलिप्सुः शक्तश्चेत् ततो भगवच्छास्त्रोपदेष्टॄणां भगवन्मन्त्रोपदेष्टॄणां वा श्रीगुरुचरणानां नित्यमेव विशेषतः सेवां कुर्यात् । तत्प्रसादो हि स्वस्वनानाप्रतीकारदुस्त्यजानर्थहानौ परमभगवत्प्रसादसिद्धौ च मूलम् ।
पूर्वत्र यथा सप्तमे श्रीनारदवाक्यम् (भा० ७।१५।२२–२५) —

असङ्कल्पाज् जयेत् कामं क्रोधं कामविवर्जनात् ।
अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥ ७०३ ॥
आन्वीक्षिक्या शोकमोहौ दम्भं महदुपासया ।
योगान्तरायान् मौनेन हिंसां कामाद्यनीहया ॥ ७०४ ॥
कृपया भूतजं दुःखं दैवं जह्यात् समाधिना ।
आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥ ७०५ ॥
रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ।
एतत् सर्वं गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत् ॥ ७०६ ॥

उत्तरत्र वामनकल्पे ब्रह्मवाक्यम् —

यो मन्त्रः स गुरुः साक्षाद् यो गुरुः स हरिः स्वयम् ।
गुरुर्यस्य भवेत् तुष्टस्तस्य तुष्टो हरिः स्वयम् ॥ ७०७ ॥

अन्यत्र —

हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात् सर्वप्रयत्नेन गुरुमेव प्रसादयेत् ॥ ७०८ ॥ इति ।

अत एव सेवामात्रं तु नित्यमेव । यथा चान्यत्र परमेश्वरवाक्यम् —

प्रथमं तु गुरुं पूज्यः ततश्चैव ममार्चनम् ।
कुर्वन् सिद्धिमवाप्नोति ह्यन्यथा निष्फलं भवेत् ॥ ७०९ ॥ इति ।

अत एव नारदपञ्चरात्रे —

वैष्णवं ज्ञानवक्तारं यो विद्याद् विष्णुवद् गुरुम् ।
पूजयेद् वाङ्मनःकायैः स शास्त्रज्ञः स वैष्णवः ॥ ७१० ॥
श्लोकपादस्य वक्तापि यः पूज्यः स सदैव हि ।
किं पुनर्भगवद्विष्णोः स्वरूपं वितनोति यः ॥ ७११ ॥ इत्यादि ।

पाद्मे देवद्युतिस्तुतौ —

भक्तिर्यथा हरौ मेऽस्ति तद्वरिष्ठा गुरौ यदि ।
ममास्ति तेन सत्येन सन्दर्शयतु मे हरिः ॥ ७१२ ॥ इति ।

तस्मादन्यद् भगवद्भजनमपि नापेक्षते । यथोक्तमागमे पुरश्चरणफलप्रसङ्गे —

यथा सिद्धरसस्पर्शात् ताम्रं भवति काञ्चनम् ।
सन्निधानाद् गुरोरेवं शिष्यो विष्णुमयो भवेत् ॥ ७१३ ॥

तदेतदाह (भा० १०।८०।३४) —

नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा ।
तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥ ७१४ ॥

टीका च — "ज्ञानप्रदाद् गुरोरधिकः सेव्यो नास्तीत्युक्तम् । अत एव तद्भजनादधिको धर्मश्च नास्तीत्याह नाहमिति । इज्या गृहस्थधर्मः । प्रजातिः प्रकृष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्म उपलक्ष्यते ताभ्याम् । तथा तपसा वनस्थधर्मेण । उपशमेन यतिधर्मेण वा । अहं परमेश्वरस्तथा न तुष्येयं यथा सर्वभूतात्मापि गुरुशुश्रूषया" इत्येषा ।
अत्र ज्ञानं ब्रह्मनिष्ठं भगवन्निष्ठं चेति द्विविधम् । अत्र पूर्वत्र तथैव व्याख्या । उत्तरत्र त्वेवम् — इज्या पूजा । प्रजातिर्वैष्णवदीक्षा । तपः समाधिः । उपशमो भगवन्निष्ठेति ॥ श्रीभगवान् श्रीदामविप्रम् ॥

२३८ । श्रीगुर्वाज्ञया तत्सेवनाविरोधेन चान्येषामपि वैष्णवानां सेवनं श्रेयः । अन्यथा दोषः स्यात् । यथा श्रीनारदोक्तौ —

गुरौ सन्निहिते यस्तु पूजयेदन्यमग्रतः ।
स दुर्गतिमवाप्नोति पूजनं तस्य निष्फलम् ॥ ७१५ ॥ इति ।

यः प्रथमम् "शाब्दे परे च निष्णातम्" (भा० ११।३।२१) इत्याद्युक्तलक्षणं गुरुं नाश्रितवान् तादृशगुरोश्च मत्सरादितो महाभागवतसत्कारादावनुमतिं न लभते स प्रथमत एव त्यक्तशास्त्रो न विचार्यते । उभयसङ्कटपातो हि तस्मिन् भवत्येव । एवमादिकाभिप्रायेणैव —

यो वक्ति न्यायरहितमन्यायेन शृणोति यः ।
तावुभौ नरकं घोरं व्रजतः कालमक्षयम् ॥ ७१६ ॥

इति नारदपञ्चरात्रे ।
अत एव दूरत एवाराध्यस्तादृशो गुरुः । वैष्णवविद्वेषी चेत् परित्याज्य एव ।

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ ७१७ ॥

इति स्मरणात् ।
तस्य वैष्णवभावराहित्येणावैष्णवतया "अवैष्णवोपदिष्टेन" इत्यादिवचनविषयत्वाच्च । यथोक्तलक्षणस्य गुरोरविद्यमानायां तु तस्यैव महाभागवतस्यैकस्य नित्यसेवनं परमं श्रेयः । स च श्रीगुरुवत् समवासनः स्वस्मिन् कृपालुचित्तश्च ग्राह्यः —

यस्य यत्सङ्गतिः पुंसो मणिवत् स्यात् स तद्गुणः ।
स्वकुलर्द्ध्यै ततो धीमान् स्वयूथान्येव संश्रयेत् ॥ ७१८ ॥

इति श्रीहरिभक्तिसुधोदयदृष्ट्या कृपां विना तस्मिन् चित्तारत्या च ।
अथ सर्वस्यैव भागवतचिह्नधारिमात्रस्य तु यथायोग्यं सेवाविधानम् । तत्र महाभागवत-सेवा द्विविधा — प्रसङ्गरूपा परिचर्यारूपा च ।
तत्र प्रसङ्गरूपा यथा (भा० ११।१२।१-२) —

नो रोधयति मां योगो न साङ्ख्यं धर्म एव च ।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥ ७१९ ॥
व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः ।
यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम् ॥ ७२० ॥

पूर्वाध्याये (भा० ११।११।४७) —

इष्टापूर्तेन मामेवं यो यजेत समाहितः ।
लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ॥ ७२१ ॥

इत्यनेन साधुसेवया भक्तिनिष्ठाजनने साधनानन्तरसव्यपेक्षत्वमिवोक्तम् ।
तत्रेष्टशब्देन सप्तमस्कन्धोक्तरीत्याग्निहोत्रदर्शपौर्णमासचातुर्मास्ययागपशुयागवैश्वदेव-बलिहरणान्युच्यन्ते । पूर्तशब्देन सुरालयारामकूपवापीतडागप्रपान्नसत्राण्युच्यन्ते ।
अत्र तु इष्टम् "हविषाग्नौ यजेत माम्" (भा० ११।११।४३) इत्यादावग्निहोत्राद्युपलक्षितं पूर्तम् "उद्यानोपवनाक्रीड" (भा० ११।११।३८) इत्याद्युपलक्षितं ज्ञेयम् ।

एवं पूर्वोक्तप्रकारेणेष्टापूर्तेन यो मां यजेत स मत्स्मृतिस्तत्र साधुसेवया सतां प्रसङ्गेन सद्भक्तिमन्तरङ्गभक्तिनिष्ठां प्राप्नोतीत्यर्थः । तत्राग्निहोत्रादीनां भक्तौ प्रवेशोऽग्न्यन्तर्यामिरूपभगवदधिष्ठानत्वेनाग्न्यादिसन्तर्पणात् । कूपारामादीनां च तत्परिचर्यार्थं क्रियमाणत्वात् तत्र प्रवेशः ।

तदेवं सत्सङ्गस्य सव्यपेक्षत्वमुक्तम् । पुनश्च तत्रैव तस्य स्वातन्त्र्येण यथेष्टफलदातृत्वं सर्वापेक्षया परमसामर्थ्यं च वक्तुं परमगुह्यत्वमुपदिष्टम् (भा० ११।११।४९) —

> अथैतत् परमं गुह्यं शृण्वतो यदुनन्दन ।
> सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत् सखा ॥ ७२२ ॥

एतादृशमहिमत्वेनानूक्तत्वात् परमगुह्यत्वमाह "न रोधयति" (भा० ११।१२।१) इति । त्यागः सन्न्यासः । दक्षिणा दानमात्रम् । यज्ञो देवपूजा । छन्दांसि रहस्यमन्त्राः । यथा सत्सङ्गो मामवरुन्धे वशीकरोतीति तथा योगो न वशीकरोति न च साङ्ख्यमित्यादिकोऽन्वयः । ततस्तेऽपि किञ्चिद् वशीकुर्वन्तीत्यर्थलब्धेर्भगवत्परा एव ज्ञेयाः । न च साधारणाः । अत एव च "व्रतान्येकादश्यादीनि" इति टीकाकाराः ।

न चैतावता तेषां नित्यानां वैष्णवव्रतादीनामकर्तव्यत्वं प्राप्तमेकस्य फलातिशयसामर्थ्यप्रशंसयेतरस्य नित्यत्वनिराकरणायोगात् ।

यथा कर्माधिकारिणः (भा० ७।१४।१७) —

> न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक् ।
> इज्येत हविषा राजन् यथा विप्रमुखे हुतैः ॥ ७२३ ॥

इति श्रुत्वापि पूर्वोक्तम् "अग्निहोत्रादिना यजेत्" (भा० ७।१४।१६) इति विधिं न परित्यक्तुं शक्नुवन्ति तद्वत् ।

भक्त्यधिकारिणश्च यथा "मद्भक्तपूजाभ्यधिका" (भा० ११।१९।२१) इति श्रुत्वापि दीक्षानन्तरं नित्यतया प्राप्तां भगवत्पूजां त्यक्तुं न शक्नुवन्ति तद्वदिति ।

अत एव स्कान्दे —

> षड्भिर्मासोपवासैस्तु यत् फलं परिकीर्तितम् ।
> विष्णोर्नैवेद्यसिक्थेन तत् फलं भुञ्जतां कलौ ॥ ७२४ ॥

इत्यपि न बाधकम् ।

एकादश्यादौ हि नित्यत्वेऽप्यानुषङ्गिकमेव महाफलकत्वं तत्र तत्र मतम् । अत एव नित्यत्वरक्षणार्थमपि तादृशं वैष्णवं व्रतमवश्यमेव कर्तव्यमित्यागतम् । नित्यवैष्णवव्रतत्वादिकं चैकादश्यादेरर्चनप्रसङ्गे किञ्चिद् दर्शयिष्यामः ।

अत एव पूर्वाध्याये टीकाकारैरपि "आज्ञायैवं गुणान् दोषान्" (भा० ११।११।३२) इत्यत्र "विद्धैकादशीकृष्णैकादश्युपवासानुपवासानिवेद्यश्राद्धादयो ये भक्तिविरुद्धा धर्मास्तान् सन्त्यज्येत्यर्थः" इत्युक्तम् ।
प्रथमे च श्रीभीष्मयुधिष्ठिरसंवादे "भगवद्धर्मान्" (भा० १।९।२७) इत्यत्र "हरितोषकान् द्वादश्यादिनियमरूपान्" इति "व्रतानि चेरे हरितोषणानि" (भा० ३।१।१९) इत्यत्र तृतीय च "एकादश्यादीनि" इति व्याख्यातम् ।
अत एव भगवन्महाप्रसादैकव्रतस्य श्रीमदम्बरीषस्य सच्छिरोमणेराचारदर्शनात् तदेव निश्चीयत इति ॥

२३९ । अथ प्रस्तुतमनुसरामः । वशीकरणमत्र द्विविधम् — मुख्यं गौणं च । तत्र मुख्येन प्रेम लभ्यते "अस्त्वेवमङ्ग भजतां भगवान् मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्" (भा० ५।६।१८) इति न्यायेन ।
अत एव गौणेनान्यत् फलम् । अत्र मुख्यं श्रीगोप्यादौ । गौणं बाणादौ । उत्तरत्र वशीकरणत्वं फलदानोन्मुखीकरणतयोपचर्यते ।
तदेतद् वशीकरणे दृष्टान्तमाह (भा० ११।१२।३–६) —

सत्सङ्गेन हि दैतेया यातुधाना मृगाः खगाः ।
गन्धर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ॥ ७२५ ॥
विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः ।
रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन् युगे युगे ॥ ७२६ ॥
बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः ।
वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ॥ ७२७ ॥
सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः ।
व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ॥ ७२८ ॥

दैतेयास्तदुपलक्षितासुरदानवाश्च । यातुधाना राक्षसाः । तज्जातिषु दिग्दर्शनम्—त्वाष्ट्रेत्यादि । त्वाष्ट्रो वृत्रासुरः । वृत्रासुरस्य प्राग्जन्मनि श्रीनारदाङ्गिरसोः सङ्गः श्रीसङ्कर्षणसङ्गश्च प्रसिद्धः । कायाधवः कयाधुपुत्रः प्रह्लादः । अस्य गर्भे श्रीनारदसङ्गः ।
आदिशब्दगृहीतान् पूर्वोक्तजातिक्रमेण कतिचिद् गणयति — वृषेति । वृषपर्वा दानवः ।
अयं हि जातमात्रमातृपरित्यक्तो मुनिपालितो विष्णुभक्तो बभूवेति पुराणान्तरप्रसिद्धिः ।
बलेः श्रीप्रह्लादसङ्गः श्रीवामनसङ्गश्च तदनन्तरमेव भक्त्युद्बोधदर्शनात् ।
बाणस्य बलिमहेशभगवत्सङ्गः । अस्य भुजकर्तनानन्तरं ज्ञातविष्णुमहिम्नो महाभागवतमहेशप्राप्तिरिव स्वप्राप्तिरित्युच्यते ।
मयो दानवः । अस्य सभानिर्माणादौ पाण्डवसङ्गो भगवत्सङ्गश्च । अन्ते तत्प्राप्तिस्तु ज्ञेया ।
विभीषणो यातुधानः । अस्य हनुमत्सङ्गो भगवत्सङ्गश्च ।

सुग्रीवाद्या गजान्ता मृगाः । तत्र ऋक्षो जाम्बवान् । अस्य भगवत्सङ्गः । गजो गजेन्द्रः । अस्य पूर्वजन्मनि सत्सङ्ग उन्नेयः । उत्तरजन्मान्ते भगवत्सङ्गश्च ।
गृध्रो जटायुनामा खगः । अस्य श्रीगरुडदशरथादिसङ्गः श्रीसीतादर्शनं श्रीभगवद्दर्शनं च । गन्धर्वादींस्त्वनतिप्रसिद्धत्वेनानुदाहृत्य मनुष्येषु वैश्यादीनुदाहरति ।
वणिक्पथस्तुलाधारः । अस्य भारते जाजलिमुनिगन्धर्वप्रसङ्गे प्रोक्तमहिम्नः सत्सङ्गोऽन्वेषणीयः ।
व्याधो धर्मव्याधः शूद्रोऽन्त्यजोऽपि । अत्रादिवाराहकथेयम्—क्वचित् प्राचीनकलियुगे वसुनाम्ना वैष्णवेन राज्ञा प्राग्जन्मनि मृगभ्रान्त्या निहतो ब्राह्मणो ब्रह्मराक्षसतां प्राप्तस्तस्य राज्ञः प्रापञ्चिकविष्णुलोकगमनसमये तच्छरीरं प्रविष्टः । पुनश्च तस्य तद्भोगान्ते राजतां प्राप्तस्य देहात् तत्कर्तृकब्रह्मपाराख्यस्तवपाठतेजसा निर्गतस्तत्कृतधर्मव्याधसङ्गो हिंसातिशयविमुखः पर्यवसाने दृष्टनीलाद्रिनाथस्तं च स्तुतवान् । प्राप्ततदालिङ्गनस्तत्सायुज्यमवापेति ।
कुब्जाया भगवत्सङ्गः पूर्वजन्मनि च नारदसङ्ग इति माथुरहरिवंशप्रसिद्धम् ।
गोप्योऽत्र साधारण्यः श्रीकृष्णव्रजे तदानीं विवाहादिना समागताः । आसां तन्नित्यप्रेयसीवृन्दसङ्गः श्रीकृष्णदर्शनादिरूपो भगवत्सङ्गश्च ।
यज्ञपत्नीनां श्रीकृष्णगुणकथकलोकसङ्गस्तत्सङ्गश्च । अपरे दैतेयादयोऽन्ये च ॥

२४० । तेषां सत्सङ्गव्यतिरिक्तसाधनान्तराभावमाह (भा० ११।१२।७)—

> ते नाधीतश्रुतिगणा नोपासितमहत्तमाः ।
> अव्रतातप्ततपसः मत्सङ्गान् मामुपागताः ॥ ७२९ ॥

नाधीताः श्रुतिगणा यैः । तदर्थं च नोपासिता महत्तमा यैः । किं च अकृतव्रता अकृततपस्काश्च । पूर्ववदध्ययनादिकं भगवत्प्रीणनमेव ग्राह्यम् ।
अत्रैकेषां वृत्रादीनां प्राग्जन्मादौ साधनानन्तरं यत् तदपि सत्सङ्गानुषङ्गसिद्धमित्यभिप्रेत्य सत्सङ्गस्यैव तत्तत्फलमुक्तम् । धर्मव्याधादीनां तु केवलस्यैव तस्येति ज्ञेयम् ।
मत्सङ्गशब्देनात्र मम सङ्गो मदीयादीनां च सङ्ग इत्यभिधाप्यते । उभयत्रापि मत्सम्बन्धित्वादित्यभिप्रायेण । तत्र स्वस्यापि सत्त्वात् सत्सङ्गप्रकरणे स्वसङ्गोऽप्यन्तर्भावितः । यत् तु पुरा भागवतसङ्गेनैव भगवत्कृपा भवतीत्युक्तं तत् तु तत्साम्मुख्यजन्मन्येव । अत्र तु स एव भागवतसङ्गः साधनविशेषत्वेनोच्यत इति न दोषः ।
यदि वात्र कुत्रचित् साम्मुख्यजन्मकारणमपि भगवत्सङ्गो भवेत् तदाप्येवमाचक्ष्महे—सच्छब्दार्थमवतारमङ्गीकृत्य यत् कदाचित् सर्वत्र कृपां वितनोति भगवान् तच्च सत्सम्बन्धेनैवेत्यतो नाभ्युपगमहानिरिति ॥

२४१ । अथ मुख्यं वशीकरणमसम्भावितसाधनान्तरेण सत्सङ्गमात्रेण श्रीगोप्यादीनां दर्शयति (भा० ११।१२।८)—

केवलेन हि भावेन गोप्यो गावो नगा मृगाः ।
येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा ॥ ७३० ॥

भावेन प्रकरणप्राप्तमत्सङ्गमात्रजन्मना प्रीत्या । भावोऽत्र वशीकारमुख्यत्वे चिह्नम् "वशीकुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा" (भा० ९।४।६६) इत्यादेः "भक्त्याहमेकया ग्राह्यः" (भा० ११।१४।२१) इत्यादेश्च ।
गावोऽपि गोपीवदागन्तुक्य एव ज्ञेयाः । नगा यमलार्जुनादयः । मृगा अपि पूर्ववत् । नागाः कालियादयः ।
यमलार्जुनकालिययोः प्राप्तिस्तदानीन्तनतत्क्षणिकभगवत्प्राप्त्यावश्यम्भाविनित्यप्राप्तिमपेक्ष्योक्ता ।
सिद्धाः पूर्ववद् द्विविधात् सत्सङ्गात् । स तु तेषां भावो योगादिभिरप्राप्य एवेति "यथावरुन्धे" (भा० ११।१२।२) इत्यत्र यथाशब्दार्थस्य पराकाष्ठा ॥

२४२ । तामेव व्यनक्ति (११।१२।९) —

यं न योगेन साङ्ख्येन दानव्रततपोऽध्वरैः ।
व्याख्यास्वाध्यायसन्न्यासैः प्राप्नुयाद् यत्नवानपि ॥ ७३१ ॥

यं भावम् । अत्रापि योगादयो भगवत्परा एव । योगादिभिर्यत्नवानपीत्यनेन तत्प्राप्त्यर्थं प्रयुज्यमानत्वावगमात् ।
एष्वपि श्रीगोपीनां परमकाष्ठाप्राप्तिं दर्शयितुम् "अथैतत् परमं गुह्यं शृण्वतो यदुनन्दनः" (भा० ११।११।४९) इत्येतत्पूर्वोक्तपरमगुह्यत्वस्य परमकाष्ठां दर्शयितुम् "रामेण सार्धम्" (भा० ११।१२।१०) इत्यादिप्रकरणमनुसन्धेयम् ॥ श्रीभगवान् ॥

२४३ । एष च सत्सङ्गो ज्ञानं विनापि कृतोऽर्थद एव स्यादित्याह (भा० ३।२३।५५) —

सङ्गो यः संसृतेर्हेतुरसत्सु विहितोऽधिया ।
स एव साधुषु कृतो निःसङ्गत्वाय कल्पते ॥ ७३२ ॥

अधिया अज्ञानेन । यत् तु पूर्वं श्रीनारदादौ मुन्यन्तरसाधारणदृष्टिर्निन्दिता तदिहास्निग्धे ज्ञानलवदुर्विदग्धे च ज्ञेयम् ॥ श्रीदेवहूतिः ॥

२४४ । तदेवं महाभागवतप्रसङ्गफलमुक्तम् । तत्परिचर्याफलमाह (भा० ३।७।१९) —

यत्सेवया भगवतः कूटस्थस्य मधुद्विषः ।
रतिरासो भवेत् तीव्रः पादयोर्व्यसनार्दनः ॥ ७३३ ॥

येषां युष्माकं महाभागवतानां सेवया परिचर्यया कूटस्थस्य नित्यस्य भगवतः पादयो रतिरासः प्रेमोत्सवो भवेत् । तीव्र इति विशेषणं प्रसङ्गमात्रात् परिचर्यायां विशिष्टं फलं द्योतयति ।
आनुषङ्गिकं फलमाह — व्यसनार्दन इति । व्यसनं संसारः । यत एवोक्तम् “मद्भक्तपूजा-भ्यधिका” (भा० ११।१९।२१) इति ।
मम पूजातोऽप्यभि सर्वतोभावेनाधिका अधिकमत्प्रीतिकरीत्यर्थः ।
एवं पाद्मोत्तरखण्डे —

आराधनानां सर्वेषां विष्णोराराधनं परम् ।
तस्मात् परतरं देवि तदीयानां समर्चनम् ॥ ७३४ ॥ इति ॥

विदुरः श्रीमैत्रेयम् ॥

२४५ । व्यतिरेकेणाह (भा० १०।८४।१३) —

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिले न कर्हिचिज् जनेष्वभिज्ञेषु स एव गोखरः ॥ ७३५ ॥

जडत्वात् कुणपे स्वयं मृततुल्ये शरीरे । चिद्योगेऽपि त्रिभिर्वातपित्तादिभिर्धातुभिर्दूषित इत्यर्थः । भौमे देवताप्रतिमादौ ।
यत् यस्य । अभिज्ञेषु तत्त्ववित्सु ता बुद्धयो न सन्ति । तत्रात्मबुद्धिः परमप्रीत्यास्पदत्वम् । स एव गोखरो गोनिकृष्ट उच्यते । यद्वा सिन्धुसौवीरप्रसिद्धो वन्यगर्दभजातिविशेषो म्ले-च्छजातिविशेषो वा सः । न त्वन्यः प्रसिद्धः । विवेकित्वाभिमानितायां सत्यामप्यविवेकि-त्वात् ततोऽपि निकृष्टत्वं तस्येति ।
भौम इज्यधीरिति साधारणदेवताविषयकमेव पूर्वं तथैवोपक्रान्तत्वात् “अर्चायामेव हरये” (भा० ११।२।४७) इत्यादिविरोधाच्च ।
तदेवं “यथा तरोर्मूलनिषेचनेन” (भा० ४।३१।१४) इत्यादिवाक्यमत्र नावतारयितव्यम् ॥
श्रीभगवान् मुनिवृन्दम् ॥

२४६ । अथ महाभागवतसेवासिद्धलक्षणम् (भा० ४।९।१२) —

ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ।
ये त्वब्जनाभ भवदीयपदारविन्दसौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥ ७३६ ॥

परमप्रियमपि मर्त्यं वपुः । ये चादो वपुरनु लक्षीकृत्य सुतादयो वर्तन्ते तानपि न स्मरन्ति । के ते ? इत्यपेक्षायामाह — ये त्विति ॥ ध्रुवः श्रीध्रुवप्रियम् ॥

२४७ । वैष्णवमात्राणां च यथायोग्यमाराधनं यथेतिहाससमुच्चये —

तस्माद् विष्णुप्रसादाय वैष्णवान् परितोषयेत् ।
प्रसादसुमुखो विष्णोस्तेनैव स्यान् न संशयः ॥ ७३७ ॥ इति ।

व्यतिरेकेणापि पाद्मोत्तरखण्डे —

अर्चयित्वा तु गोविन्दं तदीयान् नार्चयेत् तु यः ।
न स भागवतो ज्ञेयः केवलं दाम्भिकः स्मृतः ॥ ७३८ ॥ इति ।

तत्र (भा० ४।२१।१२) —

सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डधृक् ।
अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥ ७३९ ॥

इति श्रीपृथुचरितानुसारेण यत् किञ्चिज् जातावप्युत्तमत्वमेव मन्तव्यम् ।
भा० ७।११।३५ —

यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम् ।
यदन्यत्रापि दृश्येत तत् तेनैव विनिर्दिशेत् ॥ ७४० ॥

नारदोक्तिदृष्टान्तेन वा ।
यथोक्तं पाद्मे —

किमत्र बहुनोक्तेन ब्राह्मणा येऽप्यवैष्णवाः ।
न द्रष्टव्या न स्प्रष्टव्या न वक्तव्याः कदाचन ॥ ७४१ ॥

तत्र माघमाहात्म्ये च —

श्वपाकमिव नेक्षेत लोके विप्रमवैष्णवम् ।
वैष्णवो वर्णबाह्योऽपि पुनाति भुवनत्रयम् ॥ ७४२ ॥
न शूद्रा भगवद्भक्तास्ते तु भागवता नराः ।
सर्ववर्णेषु ते शूद्रा ये न भक्ता जनार्दने ॥ ७४३ ॥

इतिहाससमुच्चये —

स्मृतः सम्भाषितो वापि पूजितो वा द्विजोत्तम ।
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ॥ ७४४ ॥

अन्यथा दोषश्रवणं च तत्रैव—

शूद्रं वा भगवद्भक्तं निषादं श्वपचं तथा ।
वीक्षते जातिसामान्यात् स याति नरकं ध्रुवम् ॥ ७४५ ॥

भक्तिवैशिष्ट्येन तु वैशिष्ट्यमपि दृश्यते । यथा गारुडे—

मद्भक्तजनवात्सल्यं पूजायां चानुमोदनम् ।
मत्कथाश्रवणे प्रीतिः स्वरनेत्रादिविक्रिया ॥ ७४६ ॥
विष्णोश्च कारणं नृत्यं तदर्थं दम्भवर्जनम् ।
स्वयमभ्यर्चनं चैव यो विष्णुं नोपजीवति ॥ ७४७ ॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते ।
स विप्रेन्द्रो मुनिश्रेष्ठः स ज्ञानी स च पण्डितः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा हरिः ॥ ७४८ ॥ इति ।

अत एवाह भगवान्—

न मे भक्तश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥ ७४९ ॥ इति ।

अत एव ज्ञातभक्तिमहिम्ना सता दुर्वाससापि श्रीमदम्बरीषस्य पादग्रहणमप्याचरितम् । किन्तु अम्बरीषस्यानभीष्टमेव तदिति तत्रैव व्यक्तत्वात् । श्रीभगवता श्रीमदुद्धवादिभिश्च ब्राह्मणमात्रस्य वन्दनाच्च । इतरवैष्णवैस्तु तत् सर्वथा न मन्तव्यम् (भा० १०।६४।४१)—

विप्रं कृतागसमपि नैव द्रुह्यत मामकाः ।
घ्नन्तं बहु शपन्तं वा नमस्कुरुत नित्यशः ॥ ७५० ॥

इति भगवदादेशभङ्गप्रसङ्गाच्च ।
"श्वपाकमिव नेक्षेत" इत्यादिकं तु तद्दर्शनासक्तिनिषेधपरत्वेन समाधेयम् । दृश्यते च युधिष्ठिरद्रौपद्यादीनामश्वत्थाम्नि तथा व्यवहारः ।
वैष्णवपूजकैस्तु वैष्णवानामाचारोऽपि न विचारणीयः "अपि चेत् सुदुराचारः" (गीता ९।३०) इत्यादेः ।
यथोक्तं गारुडे—

विष्णुभक्तिसमायुक्तो मिथ्याचारोऽप्यनाश्रमी ।
पुनाति सकलान् लोकान् सहस्रांशुरिवोदितः ॥ ७५१ ॥

तदेतदुदाहृतमेव “अहो बत श्वपचोऽतो गरीयान् यज् जिह्वाग्रे वर्तते नाम तुभ्यम्” (भा० ३।३३।७) इत्यादौ ।
अत्र श्वपचशब्दो यौगिकार्थपुरस्कारेणैव वर्तते । ततो दुर्जातित्वेन दुराचारत्वेनापि नावमन्तव्यस्तद्भक्तजनः स्वावमन्तृत्वेन तु सुतराम् ।
अत एवोक्तं गारुडे—

रुक्षाक्षरं तु शृण्वन् वै तथा भागवतेरितम् ।
प्रणामपूर्वं तं क्षान्त्या यो वदेद् वैष्णवो हि सः ॥ ७५२ ॥

तदेवं महदादिसेवा दर्शिता । अस्याश्च श्रवणादितः पूर्वत्वम् “महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम्” (भा० ५।५।२) इत्युक्तेः ।
तेभ्यो महद्भ्यस्त्वन्यदपि किमपि परममङ्गलायनं जायते । यथा (भा० ११।२६।२८–३१)—

तेषु नित्यं महाभाग महाभागेषु मत्कथाः ।
सम्भवन्ति हि ता नृणां जुषतां प्रपुनन्त्यघम् ॥ ७५३ ॥
ता ये शृण्वन्ति गायन्ति ह्यनुमोदन्ति चादृताः ।
मत्पराः श्रद्दधानाश्च भक्तिं विन्दन्ति ते मयि ॥ ७५४ ॥
भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते ।
मय्यनन्तगुणे ब्रह्मण्यानन्दानुभवात्मनि ॥ ७५५ ॥
यथोपश्रयमाणस्य भगवन्तं विभावसुम् ।
शीतं भयं तमोऽप्येति साधून् संसेवतस्तथा ॥ ७५६ ॥

तेषु “सन्तोऽनपेक्षा मच्चित्ताः” (भा० ११।२६।२७) इत्याद्युक्तलक्षणेषु ।
भक्तिं प्रेम । अत एवोक्तं श्रीरुद्रेण (भा० ४।२४।५७)—

क्षणार्द्धेनापि तुलये न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ ७५७ ॥

श्रीशौनकेनापि “तुलयाम लवेनापि न स्वर्गम्” (भा० १।१८।१३) इत्यादि पूर्ववत् ।
तत्रानुषङ्गिकं फलं सदृष्टान्तमाह—यथेति । विभावसुमग्निम् । उपास्यबुद्ध्या श्रयमानस्य होमाद्यर्थं ज्वालयत इत्यर्थः । तस्य यथा शीतादिकमप्येति । भयं दुष्टजीवादिकृतम् । तथा साधून् सेवमानस्य कर्मादिजाड्यम् । आगामि संसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः ॥ श्रीभगवान् ॥

२४८ । अथ क्रमप्राप्तं श्रवणम् । तच्च नामरूपगुणलीलामयशब्दानां श्रोत्रस्पर्शः ।
तत्र नामश्रवणं यथा (भा० ६।१६।४४)—

न हि भगवन्नघटितमिदं त्वद्दर्शनान् नृणामखिलपापक्षयः ।
यन्नाम सकृच्छ्रवणात् पुक्कशोऽपि विमुच्यते संसारात् ॥ ७५८ ॥

तादृशस्यापि सकृच्छ्रवणेऽपि मुक्तिफलप्राप्तेरुत्तमस्य तच्छ्रवणे तु परमभक्तिरेव फलमित्यभिप्रेतम् ॥ चित्रकेतुः श्रीसङ्कर्षणम् ॥

२४९ । अथ रूपश्रवणम् (भा० ३।९।५) —

ये तु त्वदीयचरणाम्बुजकोशगन्धं जिघ्रन्ति कर्णविवरैः श्रुतिवातनीतम् ।
भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृदयाम्बुरुहात् स्वपुंसाम् ॥ ७५९ ॥

तुशब्दो "योऽनादृतो नरकभाग्भिरसत्प्रसङ्गैः" (भा० ३।९।४) इति पूर्वोक्तनिन्दितानां भगवद्रूपानादरवतां प्रतियोग्यर्थनिर्देशे निर्दिष्टः ।
अनेन येऽत्र एतद्विरोधिनो भवन्ति त एव पूर्वोक्ता असत्प्रसङ्गा इति गम्यते । चरणमात्रनिर्देशो भक्त्यतिशयेन । गन्धं वर्णाकारादिमाधुर्यं कर्णविवरैर्जिघ्रन्ति नासाविवरैः परमामोदमिव तैरास्वादयन्तीत्यर्थः ।
श्रुतिर्वेदस्तदनुगामिशब्दान्तरं च । सैव वातस्तेन प्रापितम् । ततः परया च भक्त्या प्रेमलक्षणया गृहीतचरणस्त्वं नापयातुं शक्नोषि ॥ ब्रह्मा श्रीगर्भोदशायिनम् ॥

२५० । अथ गुणश्रवणम् (भा० १२।३।१४–१५) —

कथा इमास्ते कथिता महात्मनां विताय लोकेषु यशः परेयुषाम् ।
विज्ञानवैराग्यविवक्षया विभो वचो विभूतीर्न तु पारमार्थ्यम् ॥ ७६० ॥
यस्तूत्तमश्लोकगुणानुवादः सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः ।
तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥ ७६१ ॥

टीका च — "राजवंशानुकीर्तनस्य तात्पर्यमाह 'कथा इमाः' इति । विज्ञानं विषयासारताज्ञानम् । ततो वैराग्यम् । तयोर्विवक्षया । परेयुषां मृतानां वचोविभूतीर्वाग्विलासमात्ररूपाः । पारमार्थ्यं परमार्थयुक्तं कथनं न भवतीत्यर्थः ।
कस्तर्हि पुरुषाणामुपादेयः परमार्थः ? तमाह 'यस्तु' इति । नित्यं प्रत्यहम् । तत्राप्यभीक्ष्णम्" इत्येषा ।
अत्र यत् क्वचिच्छ्रीरामलक्ष्मणादयोऽपि तेषां राज्ञां मध्ये वैराग्यार्थं छत्रिन्यायेन पठ्यन्ते तन् निरस्यते ।
अतो यद्यपि "निगमकल्पतरोः" (भा० १।१।३) इत्याद्यनुसारेण सर्वस्यैव प्रसङ्गस्य रसरूपत्वं तथापि क्वचित् साक्षाद्भक्तिमयशान्तादिरसरूपत्वं क्वचित् तदुपकरणशान्तादिरसरूपत्वं च समर्थनीयम् । अस्ति हि तत्र तत्र भक्तिरसेष्वपि तारतम्यमिति ।

गुणाः कारुण्यादयः । तद्गुणकीर्तेः स्वभाव एवासाविति श्रीगीतास्वपि दृष्टम् "स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते च" (गीता ११।३६) इत्यादौ ।
अत्र महाभागवतानामपि भगवत इव गुणश्रवणं मतम् (भा० १।१६।६) —

तत् कथ्यतां महाभाग यदि कृष्णकथाश्रयम् ।
अथवास्य पदाम्भोजमकरन्दलिहां सताम् ॥ ७६२ ॥

इति शौनकोक्तेः ।
यद्यप्यत्र गुणशब्देन रूपलीलयोरपि सौष्ठवं गृह्यते तथापि तत्प्राधान्यनिर्देशात् पृथग्ग्रहणम् । एवमुत्तरत्रापि । भक्तिं प्रेमाणम् । अमलां कैवल्यादीच्छारहिताम् ॥ श्रीशुकः ॥

२५१ । किं च (भा० ५।१२।१३) —

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ।
निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ ७६३ ॥

मुमुक्षोरपि किं पुनर्भक्तिमात्रेच्छोः ? सतीं मुमुक्षाद्यन्यकामनारहितां तदन्या तु व्यभिचारिणीति भावः ॥ श्रीब्राह्मणो रहूगणम् ॥

२५२ । व्यतिरेकेण च (भा० १०।१।४) —

निवृत्ततर्षैरुपगीयमानाद् भवौषधाच्छ्रोत्रमनोऽभिरामात् ।
क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नात् ॥ ७६४ ॥

निवृत्तेत्यादिविशेषणत्रयेण मुक्तमुमुक्षुविषयिजनानां ग्रहणम् ।
पशुघ्नो व्याधः । तस्य हि —

राजपुत्र चिरं जीव मा जीव मुनिपुत्रक ।
जीव वा मर वा साधो व्याध मा जीव मा मर ॥ ७६५ ॥

इति न्यायेन विषयसुखेऽपि तात्पर्यं नास्ति ।
न च तदभिज्ञत्वमस्ति विशेषतस्तु कथारसज्ञाने परममूढत्वात् सामर्थ्यं नास्त्येव ।
यद्वा दैत्यस्वभावस्य यस्य निन्दामात्रतात्पर्यं स एव हिंसकत्वेन पशुघ्नशब्देनोच्यते । पशुघ्नो व्याधः । सोऽपि मृगादीनां सौन्दर्यादिकगुणमगणयन्नेव हिंसामात्रतत्पर इति । ततो रसग्रहणाभावाद् युक्तमुक्तं विना पशुघ्नादिति । उभयथापि तद्बहिर्मुखेभ्यो गालिप्रदान एव तात्पर्यम् ।
यथा तृतीये श्रीमैत्रेयस्य (भा० ३।१३।५२) —

को नाम लोके पुरुषार्थसारवित् पुराकथानां भगवत्कथासुधाम् ।
आपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरम् ॥ ७६६ ॥ इति ॥

राजा श्रीशुकम् ॥

२५३ । अथ लीलाश्रवणम् (भा० २।३।१२) —

ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसङ्गः ।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ ७६७ ॥

यत् यासु कथासु ज्ञानं भवति । कीदृशम् ? आ सर्वतः प्रतिनिवृत्तं उपरतं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात् । यतो यत्र यासु कथासु तद्धेतुरात्मप्रसादश्च तत्प्रसादहेतुर्विषयानासक्तिश्च ।
किं बहुना ? तत् फलं यत् कैवल्यं तदपि "ब्रह्मभूतः प्रसन्नात्मा" (गीता १८।५४) इत्याद्युक्तानुसारेण सम्मतः पन्थाः प्राप्तिद्वारं यत्र स प्रेमाख्यो भक्तियोगोऽपि ।
यासु श्रुतमात्रासु तत्तदनपेक्ष्यैव भवति तासु हरिकथासु तच्चरितेषु कः श्रवणसुखेन निर्वृतः सनन्यत्रानिर्वृतो वा रतिं रागं न कुर्यात् ॥ श्रीशुकः ॥

२५४ । किं बहुना एतदर्थमेवास्य महापुराणस्याविर्भाव इति "भवतानुदितप्रायं यशो भगवतोऽमलम्" (भा० १।५।८) इत्यादौ "समाधिनानुस्मर तद्विचेष्टितम्" (भा० १।५।१३) इत्यादौ च वर्णितम् ।
सा च लीला द्विविधा — सृष्ट्यादिरूपा लीलावतारविनोदरूपा च । तयोरुत्तरा तु प्रशस्ततरेत्याशयेनाह (भा० २।६।४६) —

प्राधान्यतो यानृष आमनन्ति लीलावतारान् पुरुषस्य भूम्नः ।
आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान् सुपेशान् ॥ ७६८ ॥

यद्यपि पूर्वम् "आद्योऽवतारः पुरुषः परस्य" (भा० २।६।४१) इत्यादिग्रन्थेन पुरुषं कालादितच्छक्तिं मनआदितत्कार्यं ब्रह्मादितद्गुणावतारान् दक्षादितत्तद्विभूतींश्चोक्तवानस्मि तेन च सृष्ट्यादिलीलाः ।
तथापि यान् हे ऋषे ! पुरुषस्य भूम्नो लीलावतारान् प्राधान्येन आमनन्ति तानेव इमान् मम हृदयाधिरूढान् कर्णकषायशोषान् तदितरश्रवणरागहन्तॄन् । किं च सुपेशान् परममनोहराननुक्रमिष्ये । तदनुक्रमेण आ सम्यक् पीयताम् ॥ श्रीब्रह्मा नारदम् ॥

२५५ । एवं "दुरवगमात्मतत्त्वनिगमाय" (भा० १०।८७।२१) इत्यादौ वेदस्तुतावपि तच्छ्लाघा द्रष्टव्या ।

अत एव प्रथमे “भावयत्येषः” इत्यादौ “लीलावतारानुरतः” (भा० १।२।३४) इति तद्विशे-षणं दत्तम् ।
तथा च श्रीभगवद्गीतासु (गीता ४।९) —

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ७६९ ॥ इति ।

एषा खलु मर्त्यशरीरमपि पार्षदभावेन जितमृत्युकं विदधाति । यथाह (भा० ३।१४।५-६) —

साधु वीर त्वया पृष्टमवतारकथां हरेः ।
यत् त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीम् ॥ ७७० ॥
ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः ।
मृत्योः कृत्वैव मूर्द्ध्न्यङ्घ्रिमारुरोह हरेः पदम् ॥ ७७१ ॥

मुनिना श्रीनारदेन । अतस्तेन भगवदवतारकथापि तं प्रति श्राविताऽस्तीति गम्यते । तेन शरीरेणैव मृत्युजयः पार्षदत्वं चोक्तम् (भा० ४।१२।२९) —

परीत्याभ्यर्च्य धिष्ण्याग्र्यं कृतस्वस्त्ययनो द्विजैः ।
इयेष तदधिष्ठातुं बिभ्रद् रूपं हिरण्मयम् ॥ ७७२ ॥ इति ॥

श्रीमैत्रेयः ॥

२५६ । तदेवं नामादिश्रवणमुक्तम् । अत्र तत्परिकरश्रवणमपि ज्ञेयम् (भा० ३।१३।४) —

श्रुतस्य पुंसां सुचिरश्रमस्य नन्वञ्जसा सूरिभिरीडितोऽर्थः ।
तत्तद्गुणानुश्रवणं मुकुन्दपादारविन्दं हृदयेषु येषाम् ॥ ७७३ ॥ इत्यादौ ।

तत्र यद्यप्येकतरेणापि व्युत्क्रमेणापि सिद्धिर्भवत्येव तथापि प्रथमं नाम्नः श्रवणमन्तःकरण-शुद्ध्यर्थमपेक्ष्यम् । शुद्धे चान्तःकरणे रूपश्रवणेन तदुदययोग्यता भवति । सम्यगुदिते च रूपे गुणानां स्फुरणं सम्पद्यते । ततस्तेषु नामरूपगुणेषु तत्परिकरेषु च सम्यक् स्फुरिते-ष्वेव लीलानां स्फुरणं सुष्ठु भवतीत्यभिप्रेत्य साधनक्रमो लिखितः । एवं कीर्तनस्मरणयो-र्ज्ञेयम् ।
इदं च श्रवणं श्रीमन्महन्मुखरितं चेन् महामाहात्म्यं जातरुचीनां परमसुखदं च । तच्च द्विविधम् — महदाविर्भावितं महत्कीर्त्यमानं चेति ।
तत्र श्रीभागवतमुपलक्ष्य पूर्वं यथा (भा० १।३।४०) —

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
उत्तमश्लोकचरितं चकार भगवानृषिः ।
निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ॥ ७७४ ॥

अत्र तन्माहात्म्यसूचनार्थमेव तत्कर्तृकत्ववचनम् ॥ श्रीसूतः ॥

२५७ । यथा वा "निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्" (भा० १।१।३) इत्यादौ । अत्र श्रीशुकमुखादमृतद्रवसंयुतत्वेन परमसुखदत्वमुक्तम् । एतदुपलक्षणत्वेन श्रीलीलाशुकाद्याविर्भावितकर्णामृतादिग्रन्था अपि क्रोडीकर्तव्याः ।
अथ महत्कीर्त्यमानं यथा (भा० ४।२०।२५) —

स उत्तमश्लोकमहन्मुखच्युतो भवत्पदाम्भोजसुधाकणानिलः ।
स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः ॥ ७७५ ॥

"न कामये नाथ तदपि" (भा० ४।२०।२४) इत्यादि पूर्वोक्तानुसारात् स्वसुखातिशयेन कैवल्यसुखतिरस्कारी महतां मुखाद् विगलितो भवत्पादाम्भोजमाधुर्यलेशस्यापि सम्बन्धी शब्दात्मकोऽनिलो विस्मृतपरमतत्त्वात्मकत्वदीयज्ञानानामस्माकं त्वदीयां स्मृतिमपि यच्छति । तस्मात् तथाविधस्य तस्य परमसाध्यसाधनात्मकत्वादलमन्यैर्वरैरित्यर्थः ॥ पृथुः श्रीविष्णुम् ॥

२५८–२५९ । तदेवं महामाहात्म्यं महासुखप्रदत्वं चोक्तम् । तदेतदुभयमप्यत्राह द्वाभ्याम् (भा० ४।२९।४०) —

तस्मिन् महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवन्ति ।
ता ये पिबन्त्यवितृषो नृप गाढकर्णैस्तान् न स्पृशन्त्यशनतृड्भयशोकमोहाः ॥ ७७६ ॥

तस्मिन् साधुसङ्गे । महद्भिर्मुखरिताः कीर्तिताः । शेषः सारः । अवितृषोऽलम्बुद्धिशून्याः । गाढत्वं सावधानत्वम् । अशनं क्षुत् ।
भा० ४।२९।४१ —

एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः ।
न करोति हरेर्नूनं कथामृतनिधौ रतिम् ॥ ७७७ ॥

यैरेतैरशनादिभिरुपद्रुतः सन् कथामृतनिधौ रतिं न करोति तानेतान् महत्कीर्त्यमानानि भगवद्यशांसि स्वमाहात्म्येन दूरीकृत्य स्वसुखमनुभावयन्तीति पद्यद्वययोजनार्थः ॥ श्रीनारदः प्राचीनबर्हिषम् ॥

२६० । तत्रापि श्रवणे श्रीभागवतश्रवणं तु परमश्रेष्ठम् । तस्य तादृशप्रभावमयशब्दात्मकत्वात् परमरसमयत्वाच्च ।
तत्र पूर्वस्माद् यथा (भा० १।१।२) —

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ ७७८ ॥

महामुनिः सर्वमहन्महनीयचरणपङ्कजः श्रीभगवान् । अत्र किं वा परैरित्यादिना शब्दस्वाभाविकमाहात्म्यं दर्शितम् ॥ श्रीव्यासः ॥

२६१ । उत्तरस्माद् यथा (भा० १२।१३।१५) —

सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद् रतिः क्वचित् ॥ ७७९ ॥

तद्रस एवामृतं तेन तृप्तस्य ॥ श्रीसूतः ॥

२६२ । अत्रैव विवेचनीयम् — श्रीभगवन्नामादेः श्रवणं तावत् परमं श्रेयः । तत्रापि महदाविर्भावितप्रबन्धादेः । तत्र महत्कीर्त्यमानस्य । ततोऽपि श्रीभागवतस्य । तत्रापि च महत्कीर्त्यमानस्येति ।
अत्र "मूर्त्याभिमतयात्मनः" (भा० ११।३।४८) इतिवत् निजाभीष्टनामादिश्रवणं तु मुहुरावर्तयितव्यम् । तत्रापि सवासनमहानुभावमुखात् ।
सर्वस्य श्रीकृष्णनामादिश्रवणं तु परमभाग्यादेव सम्पद्यते तस्य पूर्णभगवत्त्वादिति । एवं कीर्तनादिष्वप्यनुसन्धेयम् । तत्र यत् स्वयं सम्प्रति कीर्त्यते तदपि श्रीशुकदेवादिमहत्कीर्तितचरत्वेनानुसन्धाय कीर्तनीयमिति ।
तदेवं श्रवणं दर्शितम् । अस्य च कीर्तनादितः पूर्वत्वं तद् विना तत्तदज्ञानात् । विशेषतश्च यदि साक्षादेव महत्कृतस्य कीर्तनस्य श्रवणभाग्यं न सम्पद्यते तदैव स्वयं पृथक् कीर्तनीयमिति तत्प्राधान्यात् । अत एवोक्तम् "तद्वाग्विसर्गो जनताघविप्लवः" (भा० १।५।११) इत्यादौ ।
टीकाकृद्भिः — "यद् यानि नामानि वक्तरि सति शृण्वन्ति श्रोतरि सति गृणन्ति । अन्यदा तु स्वयमेव गायन्ति" इति ।
अथातः कीर्तनम् । तत्र पूर्ववन् नामादिक्रमो ज्ञेयः । नाम्नो यथा (भा० ६।२।१०) —

सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ ७८० ॥

टीका च — "सुनिष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव । तत्र हेतुः । यतो नामव्याहरणात् तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति" इत्येषा ।
अतः स्वाभाविकतदीयावेशहेतुत्वेन तदीयस्वरूपभूतत्वात् परमभागवतानां तदेकदेशश्रवणमपि प्रीतिकरम् । यथा पाद्मोत्तरखण्डे श्रीरामाष्टोत्तरशतनामस्तोत्रे श्रीशिववाक्यम् —

रकारादीनि नामानि शृण्वतो देवि जायते ।
प्रीतिर्मे मनसो नित्यं रामनामविशङ्कया ॥ ७८१ ॥ इति ।

तदेवं सति पापक्षयमात्रं लक्षणं कियत् ? इति भावः ॥ श्रीविष्णुदूता यमदूतान् ॥

२६३ । फलं त्विदमेव यदाह (भा० ११।२।४०) —

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायत्युन्मादवन् नृत्यति लोकबाह्यः ॥ ७८२ ॥

एवम् "शृण्वन् सुभद्राणि रथाङ्गपाणेः" (भा० ११।२।३९) इत्याद्युक्तप्रकारं व्रतं वृत्तं यस्य तथाभूतोऽपि स्वप्रियाणि स्वाभीष्टानि यानि नामानि तेषां कीर्तनेन जातानुरागः ।
तत एव चित्तद्रवाद् द्रुतचित्तः । तत्रोचितभाववैचित्रीभिर्हसतीत्यादि । अत्र तृतीयाश्रुत्या नामकीर्तनस्यैव साधकतमत्वं लब्धम् । तदेवम् "एवंव्रतः" इत्यत्रापि शब्दोऽप्यध्याहृतः ।
अत एव "भक्तिः परेशानुभवो विरक्तिः" (भा० ११।२।४२) इत्याद्युत्तरपद्ये टीकाचूर्णिका "नन्वियमारूढयोगिनामपि बहुजन्मभिर्दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन् जन्मनि भवेत् ? इत्याशङ्क्य सदृष्टान्तमाह भक्तिरिति" इत्येषा ।
इत्थमुत्थापितं च श्रीभगवन्नामकौमुद्यां सहस्रनामभाष्ये च पुराणान्तरवचनम् —

नक्तं दिवा च गतभीर्जितनिद्र एको निर्विण्ण ईक्षितपथो मितभुक् प्रशान्तः ।
यद्यच्युते भगवति स मनो न सज्जेन् नामानि तद्रतिकराणि पठेदलज्जः ॥ ७८३ ॥
इति ।

अत्र गतभीरित्यादयो गुणा नामैकतत्परतासम्पादनार्थाः । न तु कीर्तनाङ्गभूताः । भक्तिमात्रस्य निरपेक्षत्वं तस्य तु सुतरां तादृशत्वमिति । यथा विष्णुधर्मे सर्वपातकातिपातकमहापातककारिद्वितीयक्षत्रबन्धूपाख्याने —

ब्राह्मण उवाच —
यद्येतदखिलं कर्तुं न शक्नोषि ब्रवीमि ते ।
स्वल्पमन्यन् मयोक्तं भो करिष्यति भवान् यदि ॥ ७८४ ॥

क्षत्रबन्धुरुवाच —
अशक्यमुक्तं भवता चञ्चलत्वाद्धि चेतसः ।
वाक्शरीरविनिष्पाद्यं यच्छक्यं तदुदीरयः ॥ ७८५ ॥
ब्राह्मण उवाच —
उत्तिष्ठता प्रस्वपता प्रस्थितेन गमिष्यता ।
गोविन्देति सदा वाच्यं क्षुत्तृट्प्रस्खलितादिषु ॥ ७८६ ॥ इति ॥

श्रीकविर्विदेहम् ॥

२६४ । अन्यत्र च (भा० ६।२।११) —

न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान् व्रतादिभिः ।
यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकम् ॥ ७८७ ॥

न च पापविशोधनमात्रेणापक्षीयते तन्नामपदोदाहरणं किन्तु गुणानामप्युपलम्भकमनुभवहेतुर्भवति ॥ श्रीविष्णुदूता यमदूतान् ॥

२६५ । अत एव प्रथमस्कन्धान्तस्थितानां राज्ञः श्रेयोविविदिषावाक्यानामनन्तरं द्वितीयस्कन्धारम्भे सर्वोत्तममुत्तरं वक्तुम् (भा० २।१।८–१०) —

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ॥ ७८८ ॥
परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ ७८९ ॥
तदहं तेऽभिधास्यामि महापौरुषिको भवान् ।
यस्य श्रद्दधतामाशु स्यान् मुकुन्दे मतिः सती ॥ ७९० ॥

इति श्रीभागवतस्य परममहिमानमुक्त्वा तदनन्तरं श्रीभागवतमुपक्रममाण एव तस्य नानाङ्गवतः श्रीमन्मुख्यतया तन्नामकीर्तनमेवोपदिशति । तत्रापि सर्वेषामेव परमसाध्यत्वेन चोपदिशति (भा० २।१।११) —

एतन् निर्विद्यमानानामिच्छतामकुतोभयम् ।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥ ७९१ ॥

टीका च — "साधकानां सिद्धानां च नातः परमन्यच्छ्रेयोऽस्तीत्याह 'एतत्' इति । इच्छतां कामिनां तत्तत्फलसाधनमेतदेव । निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव । योगिनां ज्ञानिनां फलं चैतदेव निर्णीतम् । नात्र प्रमाणं वक्तव्यमित्यर्थः" इत्येषा ।

नामकीर्तनं चेदमुच्चैरेव प्रशस्तम् “नामान्यनन्तस्य हतत्रपः पठन्” (भा० १।६।२७) इत्यादौ ।
अथ पाद्मोक्ता दशापराधाः परित्याज्याः । यथा सनत्कुमारवाक्यम्—

सर्वापराधकृदपि मुच्यते हरिसंश्रयात् ।
हरेरप्यपराधान् यः कुर्याद् द्विपदपांसवः ॥ ७९२ ॥
नामाश्रयः कदाचित् स्यात् तरत्येव स नामतः ।
नाम्नोऽपि सर्वसुहृदो ह्यपराधात् पतत्यधः ॥ ७९३ ॥ इति ।

अपराधाश्चैते—

सतां निन्दा नाम्नः परममपराधं वितनुते
यतः ख्यातिं यातं कथमु सहते तद्विगर्हाम् ।
शिवस्य श्रीविष्णोर्य इह गुणनामादिसकलं
धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः ॥ ७९४ ॥
गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं तथार्थवादो हरिनाम्नि कल्पनम् ।
नाम्नो बलाद् यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः ॥ ७९५ ॥
धर्मव्रतत्यागहुतादि सर्वशुभक्रियासाम्यमपि प्रमादः ।
अश्रद्दधाने विमुखेऽप्यशृण्वति यश्चोपदेशः शिवनामापराधः ॥ ७९६ ॥
श्रुत्वापि नाममाहात्म्यं यः प्रीतिरहितोऽधमः ।
अहम्ममादिपरमो नाम्नि सोऽप्यपराधकृत् ॥ ७९७ ॥ इति ।

अत्र सर्वापराधकृदपि इत्यादौ श्रीविष्णुयामलवाक्यमप्यनुसन्धेयम्—

मम नामानि लोकेऽस्मिन् श्रद्धया यस्तु कीर्तयेत् ।
तस्यापराधकोटीस्तु क्षमाम्येव न संशयः ॥ ७९८ ॥

(क) “सतां निन्दा” इत्यनेन हिंसादीनां वचनागोचरत्वं दर्शितम् । निन्दादयस्तु यथा स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे—

निन्दां कुर्वन्ति ये मूढा वैष्णवानां महात्मनाम् ।
पतन्ति पितृभिः सार्धं महारौरवसञ्ज्ञिते ॥ ७९९ ॥
हन्ति निन्दन्ति वै द्वेष्टि वैष्णवान् नाभिनन्दति ।
क्रुध्यते याति नो हर्षं दर्शने पतनानि षट् ॥ ८०० ॥ इति ।

तन्निन्दाश्रवणेऽपि दोष उक्तः (भा० १०।७४।४०)—

निन्दां भगवतः शृण्वन् तत्परस्य जनस्य वा ।
ततो नापैति यः सोऽपि यात्यधः सुकृताच् च्युतः ॥ ८०१ ॥ इति ।

ततोऽपगमश्चासमर्थस्यैव । समर्थेन तु निन्दकजिह्वा छेत्तव्या । तत्राप्यसमर्थेन स्वप्राणपरित्यागोऽपि कर्तव्यः । यथोक्तं देव्या (भा० ४।४।१७) —

कर्णौ पिधाय निरियाद् यदकल्प ईशे धर्मावितर्यशृणिभिर्नृभिरस्यमाने ।
जिह्वाम् प्रसह्य रुषतीमसतां प्रभुश्चेच्छिन्द्यादसूनपि ततो विसृजेत् स धर्मः ॥ ८०२ ॥ इति ।

( ख ) "शिवस्य श्रीविष्णोः" इत्यत्रैवमनुसन्धेयम् । श्रूयतेऽपि (गीता १०।४१) —

यद् यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा ।
तत् तदेवावगच्छ त्वं मम तेजोऽंशसम्भवम् ॥ ८०३ ॥ इति ।

"ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः" (भा० १०।६८।३७) इति ।
"यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्द्ध्यधिकृतेन शिवः शिवोऽभूत्" (भा० ३।२८।२२) इति ।
भा० २।६।३२ —

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ ८०४ ॥

तथा माध्वभाष्यदर्शितानि वचनानि । यथा ब्रह्माण्डे —

रुजं द्रावयते यस्माद् रुद्रस्तस्माज् जनार्दनः ।
ईशनादेव चेशानो महादेवो महत्त्वतः ॥ ८०५ ॥
पिबन्ति ये नरा नाकं मुक्ताः संसारसागरात् ।
तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः ॥ ८०६ ॥
शिवः सुखात्मकत्वेन सर्वसंरोधनाद्धरः ।
कृत्यात्मकमिमं देहं यतो वस्ते प्रवर्तयन् ॥ ८०७ ॥
कृत्तिवासास्ततो देवो विरिञ्चिश्च विरेचनात् ।
बृंहणाद् ब्रह्मनामासौ ऐश्वर्यादिन्द्र उच्यते ॥ ८०८ ॥
एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः ।
वेदेषु च पुराणेषु गीयते पुरुषोत्तमः ॥ ८०९ ॥ इति ।

वामने —

न तु नारायणादीनां नाम्नामन्यत्र संशयः ।
अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः ॥ ८१० ॥ इति ।

स्कान्दे —

ऋते नारायणादीनि नामानि पुरुषोत्तमः ।
अदादन्यत्र भगवान् राजेवर्ते स्वकं पुरम् ॥ ८११ ॥ इति ।

ब्राह्मे —

चतुर्मुखः शतानन्दो ब्रह्मणः पद्मभूरिति ।
उग्रो भस्मधरो नग्नः कपालीति शिवस्य च ।
विशेषनामानि ददौ स्वकीयान्यपि केशवः ॥ ८१२ ॥ इति ।

तदेवं श्रीविष्णोः सर्वात्मकत्वेन प्रसिद्धत्वात् तस्मात् सकाशात् शिवस्य गुणनामादिकं भिन्नं शक्त्यन्तरसिद्धमिति यो धियापि पश्येदित्यर्थः ।
द्वयोरभेदतात्पर्येण षष्ठ्यन्तत्वे सति श्रीविष्णोश्चेत्यपेक्ष्य चशब्दः क्रियेत । तत्प्राधान्यविवक्षयैव श्रीशब्दश्च तत्रैव दत्तः । अत एव शिवनामापराध इति शिवशब्देन मुख्यतया श्रीविष्णुरेव प्रतिपादित इत्यभिप्रेतम् । सहस्रनामादौ च स्थाणुशिवादिशब्दास्तथैव ।
(घ) अथ "श्रुतिशास्त्रनिन्दनम्" — यथा पाषण्डमार्गेण दत्तात्रेयर्षभदेवोपासकानां पाषण्डिनाम् ।
(ङ) तदा "अर्थवादः" स्तुतिमात्रमिदमिति मननम् ।
(च) "कल्पनम्" तन्माहात्म्यगौणताकरणाय गत्यन्तरचिन्तनम् । यथोक्तं कौर्मे व्यासगीतायाम् —

देवद्रोहाद् गुरुद्रोहः कोटिकोटिगुणाधिकः ।
ज्ञानापवादो नास्तिक्यं तस्मात् कोटिगुणाधिकम् ॥ ८१३ ॥ इति ।

यत् तु श्रीविष्णुपार्षदेभ्यः श्रुतनाममाहात्म्यस्याप्यजामिलस्य "सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे" (भा० ६।२।२९) इत्येतद् वाक्यम् । तत् खलु स्वदौरात्म्यमात्रदृष्ट्या । नाममाहात्म्यदृष्ट्या त्वग्रे वक्ष्यते "तथापि मे दुर्भगस्य" (भा० ६।२।३२-३३) इत्यादि द्वयम् ।
(छ) "नाम्नो बलात्" इति । यद्यपि भवेन् नाम्नो बलेनापि कृतस्य पापस्य तेन नाम्ना क्षयः । तथापि येन नाम्नो बलेन परमपुरुषार्थस्वरूपं सच्चिदानन्दसान्द्रं साक्षाच्छ्रीभगवच्चरणारविन्दं साधयितुं प्रवृत्तस्तेनैव परमघृणास्पदं पापविषयं साधयतीति परमदौरात्म्यम् । ततः कदर्थयत्येव तन् नाम चेति तत्पापकोटिमहत्तमस्यापराधस्यापातो बाढमेव ।

ततो यमैर्बहुभिर्यमनियमादिभिः कृतप्रायश्चित्तस्य क्रमेण प्राप्ताधिकारैरनेकैरपि दण्डधरैर्वा कृतदण्डस्य तस्य शुद्ध्यभावो युक्त एव "नामापराधयुक्तानाम्" इत्यादि वक्ष्यमाणानुसारेण पुनरपि सन्ततनामकीर्तनमात्रस्य तत्र प्रायश्चित्तत्वात् "सर्वापराधकृदपि" इत्याद्युक्त्यनुसारेण नामापराधयुक्तस्य भगवद्भक्तिमतोऽप्यधःपातलक्षणभोगनियमाच्च ।
तत इन्द्रस्याश्वमेधाख्यभगवद्यजनबलेन वृत्रहत्याप्रवृत्तिस्तु लोकोपद्रवशान्तिं तदीयासुरभावखण्डनेच्छूनामृषीणामङ्गीकृतत्वान् न दोष इति मन्तव्यम् ।
( ज ) अथ "धर्मव्रतत्यागः" इति धर्मादिभिः साम्यमननमपि प्रमादोऽपराधो भवतीत्यर्थः ।
अत एव च —

वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः ॥ ८१४ ॥

इत्यतिदेशेनापि नाम्न एव माहात्म्यमायाति ।
उक्तं हि "मधुरमधुरमेतन् मङ्गलं मङ्गलानां सकलनिगमवल्लीसत्फलम्" इति ।
तथा श्रीविष्णुधर्मे —

ऋग्वेदो हि यजुर्वेदः सामवेदोऽप्यथर्वणः ।
अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ ८१५ ॥

स्कान्दे पार्वत्युक्तौ च —

मा ऋचो मा यजुस्तात मा साम पठकिञ्चन ।
गोविन्देति हरेर्नाम गेयं गायस्व नित्यशः ॥ ८१६ ॥

पाद्मे श्रीरामाष्टोत्तरशतनामस्तोत्रे "विष्णोरेकैकनामापि सर्ववेदाधिकं मतम्" इति ।
( झ ) अथ "अश्रद्दधाने" इत्यादिनोपदेष्टुरपराधम् ।
( ञ ) दर्शयित्वोपदेश्यस्याह — "श्रुत्वा" इति । यतोऽहम्ममादिपरमोऽहन्ताममताद्येकतात्पर्येण तस्मिन्ननादरवानित्यर्थः ।
"नामैकं यस्य वाचि स्मरणपथगतम्" इत्यादौ देहद्रविणादिनिमित्तकपाषण्डशब्देन च दशापराधा लक्ष्यन्ते पाषण्डमयत्वात् तेषाम् ।
तथा तद्विधानामेवापराधान्तरमुक्तं पाद्मवैशाखमाहात्म्ये —

अवमन्य प्रयान्ति ये भगवत्कीर्तनं नराः ।
ते यान्ति नरकं घोरं तेन पापेन कर्मणा ॥ ८१७ ॥

इत्येतेषां चापराधानामनन्यप्रायश्चित्तत्वमेवोक्तं तत्रैव —

नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।
अविश्रान्ति प्रयुक्तानि तान्येवार्थकराणि च ॥ ८१८ ॥

अत्र सत्प्रभृतिष्वपराधे तु तत्सन्तोषणार्थमेव सन्ततनामकीर्तनादिकं समुचितम् । अम्बरीषचरितादौ तदेकक्षम्यत्वेनापराधानां दर्शनात् । उक्तं च नामकौमुद्याम् "महदपराधस्य भोग एव निवर्तकस्तदनुग्रहो वा" इति । तस्मादगत्यन्तराभावात् साधूक्तम् "एतन् निर्विद्यमानानाम्" (भा० २।१।११) इति ।
एवं श्रीनारदेनोक्तं बृहन्नारदीये —

महिम्नामपि यन्नाम्नः पारं गन्तुमनीश्वराः ।
मनवोऽपि मुनीन्द्राश्च कथं तं क्षुल्लधीर्भजे ॥ ८१९ ॥

श्रीशुकः ॥

२६६ । अथ श्रीरूपकीर्तनम् "प्रत्याकृष्टुं नयनमबलाः" (भा० ११।३०।३) इत्यादौ "यच्छ्रीर्वाचां जनयति रतिं कीर्त्यमाना कवीनाम्" इति ।
यस्य श्रीकृष्णरूपस्य शोभासम्पत्तिः कीर्त्यमाना सती कवीनां तत्कीर्तकानां वाचां तत्कीर्तनेष्वेव रागं जनयति । अथोक्तं श्रीचतुःसनेन "कामं भवः स्ववृजिनैर्निरयेषु नः स्तात्" (भा० ३।१५।४९) इत्यादौ "वाचश्तु नस्तुलसिवद् यदि तेऽङ्घ्रिशोभाः" इति ॥ राजा श्रीशुकम् ॥

२६७ । अथ गुणकीर्तनम् (भा० १।५।२२) —

इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धदत्तयोः ।
अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ॥ ८२० ॥

श्रुतं वेदाध्ययनम् । स्विष्टं यागादि । सूक्तं मन्त्रादिजपः । बुद्धं शास्त्रीयबोद्धः । दत्तं दानम् । एतेषां भगवदर्पितानां सतामेवाविच्युतोऽर्थो नित्यं फलम् ।
किं तत् ? उत्तमश्लोकस्य गुणानुवर्णनं यत् । जातायामपि गुणानुवर्णनसाध्यायां परमपुरुषार्थरूपायां रतौ गुणानुवर्णनस्य प्रत्युत नित्यनित्योल्लासादविच्युतत्वमुक्तम् । तस्मादविच्युतत्वेन रतिमेवास्य फलं सूचयति ॥ श्रीनारदः श्रीव्यासम् ॥

२६८ । अथ लीलाकीर्तनम् (भा० २।८।४) —

शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम् ।
कालेन नातिदीर्घेन भगवान् विशते हृदि ॥ ८२१ ॥

नातिदीर्घेन स्वल्पेनैव । विशते स्फुरति ॥ श्रीपरीक्षित् ॥

२६९ । तथा (भा० १२।१२।४८) —

मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद् भगवानधोक्षजः ।
तदेव सत्यं तदुहैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥ ८२२ ॥

इत्यादि “यदुत्तमश्लोकयशोऽनुगीयते” (भा० १२।१२।४९) इत्यन्तम् ।
असतीरसत्यः । असतां भगवतस्तद्भक्तेभ्यश्चान्येषां कथा यासु ताः । यद् यासु गीर्षु न कथ्यते । उत्तमश्लोकस्य यशोऽनुगीयत इति तु यत् तत् तदीयलीलामयानुगानमेव सत्यमित्यादि । कथं सत्यत्वं मङ्गलत्वं च ? तत्राह — भगवद्गुणानामुदयो गायकहृदि स्फूर्तिर्यस्मात् तत् तदीयरतिप्रदमित्यर्थः ।
स्कान्दे —

यत्र यत्र महीपाल वैष्णवी वर्तते कथा ।
तत्र तत्र हरिर्याति गौर्यथा सुतवत्सला ॥ ८२३ ॥

विष्णुधर्मे स्कान्दे च भगवदुक्तौ —

मत्कथावाचकं नित्यं मत्कथाश्रवणे रतम् ।
मत्कथाप्रीतिमनसं नाहं त्यक्ष्यामि तं नरम् ॥ ८२४ ॥ इति ।

अत्र च “अनुगीयते” इत्यनेन सुकण्ठता चेद् गानमेव कर्तव्यं तच्च प्रशस्तमित्यायातम् । एवं नामादीनामपि ।
उक्तं च “गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः” (भा० ११।२।३९) इति ।
अन्यत्र च (भा० १०।६९।४५) —

यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरिश्चकार ।
यस्त्वङ्ग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद् भगवति ह्यपवर्गमार्गे ॥ ८२५ ॥

गानशक्त्यभावे स्वस्मादुत्कृष्टतरस्य प्राप्तौ वा तच्छृणोति । तदासक्त्यभावे तदनुमोदतेऽपीत्यर्थः ।
श्रीविष्णुधर्मे श्रीविष्णूक्तौ —

रागेणाकृष्यते चेतो गान्धर्वाभिमुखं यदि ।
मयि बुद्धिं समास्थाय गायेथा मम सत्कथाः ॥ ८२६ ॥

पाद्मे च कार्तिकमाहात्म्ये श्रीभगवदुक्तौ —

नाहं वसामि वैकुण्ठे योगिनां हृदये न च ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥ ८२७ ॥
तेषां पूजादिकं गन्धधूपाद्यैः क्रियते नरैः ।
तेन प्रीतिं परां यामि न तथा मम पूजनात् ॥ ८२८ ॥

ते च प्राणिमात्राणामेव परमोपकर्तारः किमुत स्वेषाम् । यथोक्तं नारसिंहे श्रीप्रह्लादेन —

ते सन्तः सर्वभूतानां निरुपाधिकबान्धवाः ।
ये नृसिंह भवन्नाम गायन्त्युच्चैर्मुदान्विताः ॥ ८२९ ॥

अत्र च बहुभिर्मिलित्वा कीर्तनं सङ्कीर्तनमित्युच्यते । तत् तु चमत्कारविशेषपोषात् पूर्वतोऽप्यधिकमिति ज्ञेयम् ।
अत्र च नामसङ्कीर्तने यथोपदिष्टं कलियुगपावनावतारेण श्रीभगवता —

तृणादपि सुनीचेन तरोरपि सहिष्णुना ।
अमानिना मानदेन कीर्तनीयः सदा हरिः ॥ ८३० ॥

श्रीसूतः ॥

२७० । इयं च कीर्तनाख्या भक्तिर्भगवतो द्रव्यजातिगुणक्रियाभिर्दीनजनैकविषयापारकरुणामयीति श्रुतिपुराणादिविश्रुतिः । कलौ च दीनत्वं यथा ब्रह्मवैवर्ते —

अतः कलौ तपोयोगविद्यायज्ञादिकाः क्रियाः ।
साङ्गा भवन्ति न कृताः कुशलैरपि देहिभिः ॥ ८३१ ॥

अत एव कलौ स्वभावत एवातिदीनेषु लोकेष्वाविर्भूयताननायासेनैव तत्तद्युगगतमहासाधनानां सर्वमेव फलं ददाना सा कृतार्थयति । यत एव तयैव कलौ भगवतो विशेषतश्च सन्तोषो भवति —

तथा चैवोत्तमं लोके तपः श्रीहरिकीर्तनम् ।
कलौ युगे विशेषेण विष्णुप्रीत्यै समाचरेत् ॥ ८३२ ॥

इति स्कान्दचातुर्मास्यमाहात्म्यवचनानुसारेण ।
तदेवमाह (भा० १२।३।५२) —

कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥ ८३३ ॥

यद् यत् कृतादिषु तेन तेन साधनेन स्यात् तत् सर्वं कलौ हरिकीर्तनाद् भवतीति । अन्यत्र च (वि० पु० ६।२।१७) —

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥ ८३४ ॥ इति ॥

श्रीशुकः ॥

२७१ । अत एव (भा० ११।५।३६) —

कलिं सभाजयन्त्यार्या गुणज्ञाः सारभागिनः ।
यत्र सङ्कीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ॥ ८३५ ॥

गुणज्ञाः कीर्तनप्रचाररूपं तद्गुणं जानन्तः । अत एव तद्दोषाग्रहणात् सारभागिनः सारमात्र-ग्रहणाः कलिं सभाजयन्ति ।
गुणमेव दर्शयति — यत्र प्रचारितेन सङ्कीर्तनेनैव साधनान्तरनिरपेक्षेण तेनेत्यर्थः । सर्वो ध्यानादिभिः कृतादिषु साधनसहस्रैः साध्यः ॥

२७२ । कीर्तनस्यैव महिमानमाह (भा० ११।५।३७) —

न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह ।
यतो विन्देत परमां शान्तिं नश्यति संसृतिः ॥ ८३६ ॥

अतः कीर्तनात् । यतो यस्मात् कीर्तनात् । परमां शान्तिम् "शमो मन्निष्ठता बुद्धेः" (११।१९।३६) इति भगवद्वाक्यानुसारेण ध्यानादिभिरप्यसाध्यां सर्वोत्कृष्टां भगवन्निष्ठां प्राप्नोत्यनुषङ्गेण संसारश्च नश्यति । अत एव ध्याननिष्ठा अपि कृतादिप्रजा एतादृशीं भगवन्निष्ठां न प्राप्तवत्यः ।
"महाभागवता नित्यं कलौ कुर्वन्ति कीर्तनम्" इति स्कान्दाद्यनुसारेण तादृशनिष्ठाकारणं कीर्तनं माहात्म्यं च दीनैककृपातिशयशालिना भगवता तदानीं तत्तत्सामर्थ्यावसरे यस्मान् न प्रकाशितं तस्माद् ध्यानादिसमर्थास्ताः प्रजा जिह्वौष्ठस्पन्दनमात्रस्य नातिसाधनत्वं भवेदिति मत्वा तन् न श्रद्धितवत्यश्च ॥

२७३ । ततः कलिप्रजानां परमभगवन्निष्ठतां श्रुत्वा तदर्थं कलावेव केवलं निजजन्म प्रार्थयन्त इत्याह (भा० ११।५।३८) —

कृतादिषु प्रजा राजन् कलाविच्छन्ति सम्भवम् ।
कलौ खलु भविष्यन्ति नारायणपरायणाः ॥ ८३७ ॥

तत्परायणत्वमत्र तदीयप्रेमातिशयवत्त्वम् । एतदेव "परमां शान्तिम्" इत्यनेन कार्य-द्वारा व्यञ्जितम् । "मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्मा" (भा० ६।१४।५) इत्यत्र यद्वत् । अत्र कलिसङ्गेन कीर्तनस्य गुणोत्कर्ष इति न वक्तव्यं भक्तिमात्रे कालदेशनियमस्य निषिद्धत्वाद् ।
विशेषतो नामोपलक्ष्य च विष्णुधर्मे च क्षत्रबन्धूपाख्याने—

न देशनियमस्तत्र न कालनियमस्तथा ।
नोच्छिष्टादौ निषेधश्च हरेर्नामानि लुब्धक ॥ ८३८ ॥ इति ।

स्कान्दे पाद्मवैशाखमाहात्म्ये विष्णुधर्मे च "चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत्" इति ।
स्कान्द एव च—

न देशकालावस्थात्मशुद्ध्यादिकमपेक्षते ।
किन्तु स्वतन्त्रमेवैतन् नाम कामितकामदम् ॥ ८३९ ॥

विष्णुधर्मे च—

कलौ कृतयुगं तस्य कलिस्तस्य कृते युगे ।
यस्य चेतसि गोविन्दो हृदये यस्य नाच्युतः ॥ ८४० ॥

न च कलावन्यसाधनासमर्थत्वादेव तेनाल्पेनापि महत् फलं भवति न तु तस्य गरीयस्त्वे-नेति मन्तव्यम् ।
वि० पु० ६।८।५७—

यस्मिन् न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसां ब्राह्मोऽपि लोकोऽल्पकः ।
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥ ८४१ ॥

इति समाधिपर्यन्तादपि स्मरणात् कैमुत्येन कीर्तनस्यैव गरीयस्त्वं श्रीविष्णुपुराणे दर्शि-तम् । अत एवोक्तम् "एतन्निर्विद्यमानानाम्" (भा० २।१।११) इत्यादि ।
तथा च—

अघच्छित् स्मरणं विष्णोर्बह्वायासेन साध्यते ।
ओष्ठस्पन्दनमात्रेण कीर्तनं तु ततो वरम् ॥ ८४२ ॥

इति वैष्णवचिन्तामणौ ।

येन जन्मशतैः पूर्वं वासुदेवः समर्चितः ।
तन्मुखे हरिनामानि सदा तिष्ठन्ति भारत ॥ ८४३ ॥

इत्यन्यत्र ।
"सर्वापराधकृदपि" इत्यादिनामापराधभजनस्तोत्रे च । तस्मात् सर्वत्रैव युगे श्रीमत्कीर्तनस्य समानमेव सामर्थ्यम् । कलौ च श्रीभगवता कृपया तद् ग्राह्यत इत्यपेक्षयैव तत्र तत्प्रशंसेति स्थितम् । अत एव यदन्यापि भक्तिः कलौ कर्तव्या तदा तत्संयोगेनैवेत्युक्तम् "यज्ञैः सङ्कीर्तनप्रायैर्यजन्ति हि सुमेधसः" (भा० ११।५।३२) इति ।
अत्र च स्वतन्त्रमेव नामकीर्तनमत्यन्तप्रशस्तम् —

हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ ८४४ ॥ इत्यादौ ।

तस्मात् साधूक्तम् "कलिं सभाजयन्त्यार्या गुणज्ञाः" (भा० ११।५।३६) इत्यादित्रयम् ॥ श्रीकरभाजनो निमिम् ॥

२७४ । तदेवं कलौ नामकीर्तनप्रचारप्रभावेणैव परमभगवत्परायणत्वसिद्धिर्दर्शिता । तत्र पाषण्डप्रवेशेन नामापराधिनो यो तेषां तु तद्बहिर्मुखत्वमेव स्यादिति व्यतिरेकेण तद् द्रढयति (भा० १२।३।४३–४४) —

कलौ न राजन् जगतां परं गुरुं त्रिलोकनाथानतपादपङ्कजम् ।
प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाषण्डविभिन्नचेतसः ॥ ८४५ ॥
यन्नामधेयं म्रियमाण आतुरः पतन् स्खलन्वा विवशो गृणन् पुमान् ।
विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥ ८४६ ॥

स्पष्टम् ॥ श्रीशुकः ॥

२७५ । तदेवं कीर्तनं व्याख्यातम् । तत्रास्मिन् कीर्तने निजदैन्यनिजाभीष्टविज्ञप्तिस्तवपाठावप्यन्तर्भाव्यौ । तथा तत्र श्रीभागवतस्थितनामादिकीर्तनं तु पूर्ववदन्यदीयनामादिकीर्तनादधिकं ज्ञेयम् ।
कलौ तु प्रशस्तं तत् (भा० १।३।४३) —

कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ॥ ८४७ ॥ इति ।

अथ शरणापत्त्यादिभिः शुद्धान्तःकरणश्चेत् "एतन् निर्विद्यमानानामिच्छतामकुतोभयम्" (भा० २।१।११) इत्याद्युक्तत्वान् नामकीर्तनापरित्यागेन स्मरणं कुर्यात् । तच्च मनसानुसन्धानम् । यदेव नामानिसम्बन्धित्वेन बहुविधं भवति ।
तत्र स्मरणसामान्यम् (भा० ११।१३।१४) —

एतावान् योग आदिष्टो मच्छिष्यैः सनकादिभिः ।
सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा ॥ ८४८ ॥

यथा यथावत् । मय्यावेश्यत इत्येतावानित्यर्थः । तथा च स्कान्दे ब्रह्मोक्तौ "आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः" इत्यादि ॥ श्रीभगवान् ॥

२७६ । तत्र नामस्मरणम् —

हरेर्नाम परं जप्यं ध्येयं गेयं निरन्तरम् ।
कीर्तनीयं च बहुधा निर्वृतीर्बहुधेच्छता ॥ ८४९ ॥

इति जाबालिसंहिताद्यनुसारेण ज्ञेयम् ।
नामस्मरणं तु शुद्धान्तःकरणतामपेक्षते । तत्कीर्तनाच् चावरमिति मूले तु नोदाहरणस्पष्टता ।
रूपस्मरणमाह (भा० १२।१२।५४) —

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि च शं तनोति ।
सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥ ८५० ॥

परमात्मनि श्रीकृष्णे प्रेमलक्षणां भक्तिमिति मुख्यं फलमन्यानि त्वानुषङ्गिकाणि ॥ श्रीसूतः ॥

२७७ । किं च (भा० १०।८०।११) —

स्मरतः पादकमलमात्मानमपि यच्छति ।
किं न्वर्थकामान् भजतो नात्यभीष्टान् जगद्गुरुः ॥ ८५१ ॥

स्मरतः स्मरते । साक्षात् प्रादुर्भूय आत्मानं स्मर्तुर्वशीकरोतीत्यर्थः । अर्थकामानिति बहुवचनं मोक्षमप्यन्तर्भावयति लिङ्गसमवायन्यायेन ।
यस्मादेवं तन्माहात्म्यं तस्मादेव गारुडेऽपीदमुक्तम् —

एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते ।
दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम् ॥ ८५२ ॥ इति ॥

श्रीदामविप्रभार्या तम् ॥

२७८ । अथ पूर्ववत् क्रमसोपानरीत्या सुखलभ्यं गुणपरिकरसेवालीलास्मरणं चानुसन्धेयम् ।
तदिदं स्मरणं पञ्चविधम् — यत् किञ्चिदनुसन्धानं स्मरणम् । सर्वतश्चित्तमाकृष्य सामान्याकारेण मनोधारणं धारणा । विशेषतो रूपादिविचिन्तनं ध्यानम् । अमृतधारावदविच्छिन्नं तद् ध्रुवानुस्मृतिः । ध्येयमात्रस्फुरणं समाधिरिति ।
तत्र स्मरणम् —

येन केनाप्युपायेन स्मृतो नारायणोऽव्ययः ।
अपि पातकयुक्तस्य प्रसन्नः स्यान् न संशयः ॥ ८५३ ॥

इति बृहन्नारदीयादौ ।
धारणा (भा० ११।१४।२७) —

विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते ।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥ ८५४ ॥ इत्यादौ ।

ध्यानम् —

भगवच्चरणद्वन्द्वध्यानं निर्द्वन्द्वमीरितम् ।
पापिनोऽपि प्रसङ्गेन विहितं सुहितं परम् ॥ ८५५ ॥

इति नारसिंहादौ ।
तत्र निर्द्वन्द्वं शीतोष्णादिमयदुःखपरम्परातीतम् । ईरितं शास्त्रविहितम् । तच्च पापिनोऽपि प्रसङ्गेनापि परमुत्कृष्टं सुहितं विहितं तत्रैवेत्यर्थः ।
ध्रुवानुस्मृतिश्च "मद्गुणश्रुतिमात्रेण" (भा० ३।२९।११) इत्यादौ "त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिः" (भा० ११।२।५३) इत्यादौ च ।
एषैव श्रीरामानुजभगवत्पादैः प्रथमसूत्रे दर्शितास्ति ।
समाधिमाह (भा० १२।१०।९) —

तयोरागमनं साक्षादीशयोर्जगदात्मनोः ।
न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ॥ ८५६ ॥

तयोः — रुद्रतत्पत्न्योः । भगवदंशतच्छक्तित्वात् जगदात्मनोस्तत्प्रवर्तकयोरपि । तत्र हेतुः — रुद्धधीवृत्तिर्भगवदाविष्टचित्तः "भक्तिं परां भगवति लब्धवान्" (भा० १२।१०।६) इति पूर्वोक्तेः ।

तस्मादसम्प्रज्ञातनाम्नो ब्रह्मसमाधितो भिन्न एवासौ ॥ श्रीसूतः ॥

२७९ । क्वचिल्लीलादियुक्ते च तस्मिन्ननन्या स्फूर्तिः समाधिः स्यात् ।
यथाह "उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम्" (भा० १।५।१३) इति ।
स्पष्टम् ।
एतद्रूपो दासादिभक्तानाम् । पूर्वस्तु प्रायः शान्तभक्तानाम् "स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारः" (भा० १२।१२।६९) इत्याद्युक्तिभ्यः ॥ श्रीनारदो श्रीव्यासम् ॥

२८० । अथ रुचिः शक्तिश्च चेत् तदपरित्यागेन पादसेवा च कर्तव्या । सेवास्मरणसिद्ध्यर्थं च सा कैश्चित् क्रियते ।
तथा च विष्णुरहस्ये परमेश्वरवाक्यम् —

न मे ध्यानरताः सम्यग् योगिनः परितुष्टये ।
तथा भवन्ति देवर्षे क्रियायोगरता यथा ।
क्रियाक्रमेण योगोऽपि ध्यानिनः सम्प्रवर्तते ॥ ८५७ ॥ इति ।

योगोऽत्र समाधिः ।
पादसेवायां पादशब्दो भक्त्यैव निर्दिष्टः । ततः सेवायाः सादरत्वं विधीयते । सेवा च कालदेशाद्युचिता परिचर्यादिपर्याया ।
सा यथा (भा० ४।२१।३१) —

यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः ।
सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित् ॥ ८५८ ॥

तपस्विनां संसारतप्तानां मलं तत्तद्वासनाम् । त्वत्पादस्यैवैष महिमेति दृष्टान्तेनाह — यथेति ॥ पृथुः श्रीविष्णुम् ॥

२८१ । तथा (भा० १०।५१।५६) —

न कामयेऽन्यं तव पादसेवनादकिञ्चनप्रार्थ्यतमाद् वरं विभो ।
आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबन्धनम् ॥ ८५९ ॥

अकिञ्चना मोक्षपर्यन्तकामनारहिताः । तत्र हेतुः — त्वामाराध्य कस्त्वामपवर्गदं सन्तं वृणीत । अपवर्गदतयाविर्भवन्तं समाश्रयेतेत्यर्थः । वरमित्यव्ययमीषत् प्रिये । वरमात्मनो बन्धनमेव वृणीत ॥

२८२ । अनन्तरं चास्य “तस्माद् विसृज्याशिषः” (भा० १०।५१।५६) इत्यादिवाक्ये “निरञ्जनम्” इत्यादि ।
अत्र सेव्यपादत्वेनैव प्राप्तस्य तस्य पुरुषोत्तमस्य सच्चिदानन्दघनत्वमेवाभिप्रेतम् ॥ मुचुकुन्दः श्रीभगवन्तम् ॥

२८३ । अत्र पादसेवायां श्रीमूर्तिदर्शनस्पर्शपरिक्रमानुव्रजनभगवन्मन्दिरगङ्गापुरुषोत्तमद्वारकामथुरादितदीयतीर्थस्थानगमनादयोऽप्यन्तर्भाव्यास्तत्परिकरप्रायत्वात् । यावज्जीवं तन्मन्दिरादिनिवासस्तु शरणापत्तावन्तर्भवति । गङ्गादीनां तत्स्थप्राणिवृन्दानां च परमभागवतत्वमेवेति पक्षे तु तत्सेवादिकं महत्सेवादावेव पर्यवस्यति । ततो गङ्गादिष्वपि भक्तिनिदानत्वं भवेत् ।
अत एव (भा० १।२।१६) —

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान् महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥ ८६० ॥ इति ।

अत्र पुण्यतीर्थशब्दोक्तस्य गङ्गादेः पृथक्कारणत्वं व्याख्येयम् । यथा तृतीये “यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्” (भा० ३।२८।२२) इति । शिवत्वं नाम ह्यत्र परमसुखप्राप्तिरिति टीकाकृन्मतम् । तादृशसुखत्वं च भक्तावेव पर्यवसितम् — तत ऊर्ध्वं सुखान्तराभावात् ।
ब्राह्मे पुरुषोत्तममुद्दिश्य —

अहो क्षेत्रस्य माहात्म्यं समन्ताद् दशयोजनम् ।
दिविष्ठा यत्र पश्यन्ति सर्वानेव चतुर्भुजान् ॥ ८६१ ॥

स्कान्दे —

संवत्सरं वा षण्मासान् मासं मासार्धमेव वा ।
द्वारकावासिनः सर्वे नरा नार्यश्चतुर्भुजाः ॥ ८६२ ॥

पाद्मपातालखण्डे —

अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी ।
दिनमेकं निवासेन हरौ भक्तिः प्रजायते ॥ ८६३ ॥

आदिवाराहे तामुद्दिश्य “जन्मभूमिः प्रिया मम” इति ।
एषु च स्वोपासनास्थानमधिकं सेव्यम् । श्रीकृष्णस्य पूर्णभगवत्त्वात् तत्स्थानं तु सर्वेषामेव पूर्णपुरुषार्थदं भवेत् । अत एवादिवाराहे —

मथुरां च परित्यज्य योऽन्यत्र कुरुते रतिम् ।
मूढो भ्रमति संसारे मोहितो मम मायया ॥ ८६४ ॥ इति ।

तदेवं तुलसीसेवा च सत्सेवायामन्तर्भाव्या—परमभगवत्प्रियत्वात् तस्याः । यथा अगस्त्यसंहितायां गारुडसंहितायां च—

विष्णोस्त्रैलोक्यनाथस्य रामस्य जनकात्मजा ।
प्रिया तथैव तुलसी सर्वलोकैकपावनी ॥ ८६५ ॥

स्कान्दे—

रतिं बध्नाति नान्यत्र तुलसीकाननं विना ।
देवदेवो जगत्स्वामी कलिकाले विशेषतः ॥ ८६६ ॥
निरीक्षिता नरैर्यैस्तु तुलसीवनवाटिका ।
रोपिता यैस्तु विधिना सम्प्राप्तं परमं पदम् ॥ ८६७ ॥

स्कान्द एव तुलसीस्तवे "तुलसीनाममात्रेण प्रीणात्यसुरदर्पहा" इति ।
तदेवं पादसेवा व्याख्याता । प्रसङ्गसङ्गत्या गङ्गादिसेवा च ।
अथार्चनम् । तच् चागमोक्तावाहनादिक्रमकम् । तन्मार्गे श्रद्धा चेदाश्रितमन्त्रगुरुस्तं विशेषतः पृच्छेत् । तथोदाहृतम् "लब्ध्वानुग्रह आचार्यात् तेन सन्दर्शितागमः" (भा० ११।३।४८) इत्यादिना ।
यद्यपि श्रीभागवतमते पञ्चरात्रादिवदर्चनमार्गस्यावश्यकत्वं नास्ति तद् विनापि शरणापत्त्यादीनामेकतरेणापि पुरुषार्थसिद्धेरभिहितत्वात् तथापि श्रीनारदादिवर्त्मानुसरद्भिः श्रीभगवता सह सम्बन्धविशेषं दीक्षाविधानेन श्रीगुरुचरणसम्पादितं चिकीर्षद्भिः कृतायां दीक्षायामर्चनमवश्यं क्रियेतैव ।
ह० भ० वि० २।९–१०—

दिव्यं ज्ञानं यतो दद्यात् कुर्यात् पापस्य सङ्क्षयम् ।
तस्माद् दीक्षेति सा प्रोक्ता देशिकैस्तत्त्वकोविदैः ॥ ८६८ ॥
अतो गुरुं प्रणम्यैवं सर्वस्वं विनिवेद्य च ।
गृह्णीयाद् वैष्णवं मन्त्रं दीक्षापूर्वं विधानतः ॥ ८६९ ॥

इत्यागमात् ।
दिव्यं ज्ञानं ह्यत्र श्रीमति मन्त्रे भगवत्स्वरूपज्ञानं तेन भगवता सम्बन्धविशेषज्ञानं च । यथा पाद्मोत्तरखण्डादावष्टाक्षरादिकमधिकृत्य विवृतमस्ति ।
ये ते सम्पत्तिमन्तो गृहस्थास्तेषां त्वर्चनमार्ग एव । यथोक्तं श्रीवसुदेवं प्रति मुनिभिः (भा० १०।८४।३७)—

> अयं स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः ।
> यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पुरुषः ॥ ८७० ॥ इति ।

तदकृत्वा हि निष्किञ्चनवत् केवलस्मरणादिनिष्ठत्वे वित्तशाठ्यविप्रतिपत्तिः स्यात् । परद्वारा तत्सम्पादनं व्यवहारनिष्ठत्वस्यालसत्वस्य वा प्रतिपादकम् । ततोऽश्रद्धामयत्वाद्धीनमेव तत् । ततश्च "योऽमायया सन्ततयानुवृत्त्या" (भा० १।३।३८) इत्याद्युपदेशाद् भ्रश्येत् ।
किं च गृहस्थानां परिचर्यामार्गे द्रव्यसाध्यतयार्चनमार्गादविशेषेण प्राप्तेऽप्यर्चनमार्गस्यैव प्राधान्यमत्यन्तविधिसापेक्षत्वात् तेषाम् ।
तथा गार्हस्थ्यधर्मस्य देवतायागस्य शाखापल्लवादिसेकस्थानीयस्य मूलसेकरूपं तदर्चनमित्यपि तदकरणे महान् दोषः ।
अतः स्कान्दे श्रीप्रह्लादवाक्यम्—

> केशवार्चा गृहे यस्य न तिष्ठति महीपते ।
> तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं स्मृतम् ॥ ८७१ ॥ इति ।

दीक्षितानां तु सर्वेषां तदकरणे नरकपातः श्रूयते । यथा विष्णुधर्मोत्तरे—

> एककालं द्विकालं वा त्रिकालं पूजयेद्धरिम् ।
> अपूज्य भोजनं कुर्वन् नरकाणि व्रजेन् नरः ॥ ८७२ ॥ इत्यादि ।

अशक्तमयोग्यं प्रति चाग्नेये—

> पूजितं पूज्यमानं वा यः पश्येद् भक्तितो हरिम् ।
> श्रद्धया मोदयेद् यस्तु सोऽपि योगफलं लभेत् ॥ ८७३ ॥ इति ।

योगोऽत्र पञ्चरात्राद्युक्तः क्रियायोगः । क्वचिदत्र मानसपूजा च विहितास्ति । तथा च पाद्मोत्तरखण्डे "साधारणं हि सर्वेषां मानसेज्या नृणां प्रिय" इति ।
किं च अस्मिन्नर्चनमार्गेऽवश्यं विधिरपेक्षणीयस्ततः पूर्वं दीक्षा कर्तव्या । अथ शास्त्रीयं विधानं च शिक्षणीयम् ।
दीक्षा यथागमे—

> द्विजानामनुपनीतानां स्वकर्माध्ययनादिषु ।
> यथाधिकारो नास्तीह स्याच् चोपनयनादनु ॥ ८७४ ॥
> तथात्रादीक्षितानां तु मन्त्रदेवार्चनादिषु ।
> नाधिकारोऽस्त्यतः कुर्यादात्मानं शिवसंस्तुतम् ॥ ८७५ ॥

शास्त्रीयविधानं च यथा विष्णुरहस्ये —

अविज्ञाय विधानोक्तां हरिपूजाविधिक्रियाम् ।
कुर्वन् भक्त्या समाप्नोति शतभागं विधानतः ॥ ८७६ ॥

भक्त्या परमादरेणैव शतभागं प्राप्नोत्यन्यथा तावन्तमपि नेत्यर्थः । विधौ तु वैष्णवसम्प्रदायानुसार एव प्रमाणम् । यतो विष्णुरहस्ये —

अर्चयन्ति सदा विष्णुं मनोवाक्कायकर्मभिः ।
तेषां हि वचनं ग्राह्यं ते हि विष्णुसमा मताः ॥ ८७७ ॥

कौर्मे —

सम्पृष्ट्वा वैष्णवान् विप्रान् विष्णुशास्त्रविशारदान् ।
चीर्णव्रतान् सदाचारान् तदुक्तं यत्नतश्चरेत् ॥ ८७८ ॥

वैष्णवतन्त्रे —

येषां गुरौ च जप्ये च विष्णौ च परमात्मनि ।
नास्ति भक्तिः सदा तेषां वचनं परिवर्जयेत् ॥ ८७९ ॥ इति ।

तथाह "एवं सदा" इत्यादौ "तन्निष्ठविप्राभिहितः शशास हि" (भा० ९।४।२१) इति ।
अम्बरीष इति प्रकरणलब्धम् ॥ श्रीशुकः ॥

२८४ । ननु भगवन्नामात्मका एव मन्त्राः । तत्र विशेषेण नमःशब्दाद्यलङ्कृताः श्रीभगवता श्रीमदृषिभिश्चाहितशक्तिविशेषाः श्रीभगवता सममात्मसम्बन्धविशेषप्रतिपादकाश्च । तत्र केवलानि श्रीभगवन्नामान्यपि निरपेक्षाण्येव परमपुरुषार्थफलपर्यन्तदानसमर्थानि । ततो मन्त्रेषु नामतोऽप्यधिकसामर्थ्ये लब्धे कथं दीक्षाद्यपेक्षा ?
उच्यते — यद्यपि स्वरूपतो नास्ति तथापि प्रायः स्वभावतो देहादिसम्बन्धेन कदर्थशीलानां विक्षिप्तचित्तानां जनानां तत्तत्सङ्कोचीकरणाय श्रीमदृषिप्रभृतिभिरत्रार्चनमार्गे क्वचित् क्वचित् काचित् काचिन् मर्यादा स्थापितास्ति । ततस्तदुल्लङ्घने शास्त्रं प्रायश्चित्तमुद्भावयति । तत उभयमपि नासमञ्जसमिति तत्र तत्तदपेक्षा नास्ति ।
यथा श्रीरामचन्द्रमुद्दिश्य रामार्चनचन्द्रिकायाम् —

वैष्णवेष्वपि मन्त्रेषु राममन्त्राः फलाधिकाः ।
गाणपत्यादिमन्त्रेभ्यः कोटिकोटिगुणाधिकाः ॥ ८८० ॥
विनैव दीक्षां विप्रेन्द्र पुरश्चर्यां विनैव हि ।
विनैव न्यासविधिना जपमात्रेण सिद्धिदाः ॥ ८८१ ॥ इति ।

एवं साध्यत्वादिपरीक्षानपेक्षा च क्वचित् श्रूयते । यथोक्तं मन्त्रदेवप्रकाशिकायाम् —

सौरमन्त्राश्च येऽपि स्युर्वैष्णवा नारसिंहकाः ।
साध्यसिद्धसुसिद्धारिविचारपरिवर्जिताः ॥ ८८२ ॥ इति ।

तन्त्रान्तरे —

नृसिंहार्कवराहाणां प्रसादप्रवणस्य च ।
वैदिकस्य च मन्त्रस्य सिद्धादीन् नैव शोधयेत् ॥ ८८३ ॥

सनत्कुमारसंहितायाम् —

साध्यः सिद्धः सुसिद्धश्च अरिश्चैव च नारद ।
गोपालेषु न बोद्धव्यः स्वप्रकाशो यतः स्मृतः ॥ ८८४ ॥

अन्यत्र —

सर्वेषु वर्णेषु तथाश्रमेषु नारीषु नानाह्वयजन्मभेषु ।
दाता फलानामभिवाञ्छितानां द्रागेव गोपालकमन्त्र एषः ॥ ८८५ ॥ इत्यादि ।

मर्यादा यथा ब्रह्मयामले —

श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना ।
ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते ॥ ८८६ ॥ इति ।

इत्थमेवाभिप्रेतं श्रीपृथिव्या चतुर्थे (भा० ४।१८।३-५) —

अस्मिन लोकेऽथवामुष्मिन् मुनिभिस्तत्त्वदर्शिभिः ।
दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धये ॥ ८८७ ॥
तानातिष्ठति यः सम्यगुपायान् पूर्वदर्शितान् ।
अवरः श्रद्धयोपेत उपेयान् विन्दतेऽञ्जसा ॥ ८८८ ॥
ताननादृत्य योऽविद्वानर्थानारभते स्वयम् ।
तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः ॥ ८८९ ॥ इति ।

अत एवोक्तं पाद्मे श्रीनारायणनारदसंवादे —

मद्भक्तो यो मदर्चां च करोति विधिवदृषे ।
तस्यान्तरायाः स्वप्नेऽपि न भवन्त्यभयो हि सः ॥ ८९० ॥ इति ।

तदेतदर्चनं द्विविधम् — केवलं कर्ममिश्रं च । तयोः पूर्वं निरपेक्षाणां श्रद्धावतां दर्शितमाविर्होत्रेण "य आशु हृदयग्रन्थिम्" (भा० ११।३।४७) इत्यादौ ।
उक्तं च श्रीनारदेन (भा० ४।२९।४७) —

यदा यस्यानुगृह्णाति भगवानात्मभावितः ।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥ ८९१ ॥ इति ।

अत्र श्रीमदगस्त्यसंहिता च —

यथा विधिनिषेधौ च मुक्तं नैवोपसर्पतः ।
तथा न स्पृशतौ रामोपासकं विधिपूर्वकम् ॥ ८९२ ॥ इति ।

उत्तरं व्यवहारचेष्टातिशयवत्तायादृच्छिकभक्त्यनुष्ठानवत्तादिलक्षणलक्षितश्रद्धानां तथा तद्वैपरीत्यलक्षितश्रद्धानामपि प्रतिष्ठितानां तद्भक्तिं वार्तानभिज्ञबुद्धिषु साधारणवैदिककर्मानुष्ठानलोपोऽपि माभूदिति लोकसङ्ग्रहपराणां गृहस्थानां दर्शितम् ।
यथा "न ह्यन्तोऽनन्तपारस्य" (भा० ११।२७।६-७) इत्यादौ (भा० ११।२७।८-११) —

यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः ।
यथा यजेत मां भक्त्या श्रद्धया तन् निबोध मे ॥
अर्चायां स्थण्डिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजे ।
द्रव्येण भक्तियुक्तोऽर्चेत् स्वगुरुं माममायया ॥
पूर्वं स्नानं प्रकुर्वीत धौतदन्तोऽङ्गशुद्धये ।
उभयैरपि च स्नानं मन्त्रैर्मृद्ग्रहणादिना ॥
सन्ध्योपास्त्यादिकर्माणि वेदेनाचोदितानि मे ।
पूजां तैः कल्पयेत् सम्यक् सङ्कल्पः कर्मपावनीम् ॥ ८९३ ॥ इति ।

स्पष्टम् ॥ श्रीभगवान् ॥

२८५ । श्रीनारदपञ्चरात्रे चैवमेव श्रीनारायणवाक्यं श्राद्धकथनारम्भे —

नाचरेद् यस्तु सिद्धोऽपि लौकिकं धर्ममग्रतः ।
उपप्लवाच्च धर्मस्य ग्लानिर्भवति नारद ॥ ८९४ ॥
विवेकज्ञैरतः सर्वैर्लोकाचारो यथा स्थितः ।
आदेहपाताद् यत्नेन रक्षणीयः प्रयत्नतः ॥ ८९५ ॥ इति ।

एतेषां च द्विविधा कर्मव्यवस्था श्रीनारदपञ्चरात्रादौ अन्तर्यामिश्रीभगवद्दृष्ट्यैव सर्वाराधानं विहितम् । विष्णुयामलादौ तु —

विष्णुपादोदकेनैव पितृणां तर्पणक्रिया ।
विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम् ॥ ८९६ ॥

इत्यादिप्रकारेण विहितमिति ।
ये तु तत्र श्रीभगवत्पीठावरणपूजायां गणेशदुर्गाद्या वर्तन्ते ते हि विष्वक्सेनादिवद् भगवतो नित्यवैकुण्ठसेवकाः । ततश्च ते गणेशदुर्गाद्याः । येऽपरे मायाशक्त्यात्मका गणेशदुर्गाद्यास्ते तु न भवन्ति "न यत्र माया किमुतापरे" (भा० २।९।१०) इति द्वितीयोक्तेः ।
ततो भगवत्स्वरूपभूतशक्त्यात्मका एव ते । यत एव च श्रीकृष्णस्वरूपभूते श्रीमदष्टादशाक्षरादिमन्त्रगणेऽपि दुर्गानाम्नो भगवद्भक्त्यात्मकस्वरूपभूतशक्तिवृत्तिविशेषस्याधिष्ठातृत्वं श्रुतितन्त्रादिष्वपि दृश्यते ।
यथा नारदपञ्चरात्रे श्रुतिविद्यासंवादे—

भक्तिर्भजनसम्पत्तिर्भजते प्रकृतिः प्रियम् ।
ज्ञायतेऽत्यन्तदुःखेन सेयं प्रकृतिरात्मनः ।
दुर्गेति गीयते सद्भिरखण्डरसवल्लभा ॥ ८९७ ॥

अत एव श्रीभगवदभेदेनोक्तं गौतमीयकल्पे "यः कृष्णः सैव दुर्गा स्याद् या दुर्गा कृष्ण एव सः" इति "त्वमेव परमेशान्यस्याधिष्ठातृदेवता" इत्यादिकं तु विराट्पुरुषमहापुरुषयोरिव केषाञ्चिदभेदोपासनाविवक्षयैवोक्तम् ।
सा हि मायांशरूपा तदधीने प्राकृतेऽस्मिन् लोके मन्त्ररक्षालक्षणसेवार्थं नियुक्ता चिच्छक्त्यात्मकदुर्गाया दासीयते न तु सेवाधिष्ठात्री ।
मायातीतवैकुण्ठावरणकथने यथोक्तं पाद्मोत्तरखण्डे—

सत्याच्युतानन्तदुर्गाविष्वक्सेनगजाननाः ।
शङ्खपद्मनिधीलोकाश्चतुर्थावरणं शुभम् ॥ ८९८ ॥
ऐन्द्रकाग्नेययाम्यानि नैरृतं वारुणं तथा ।
वायव्यं सौम्यमैशानं सप्तमं मुनिभिः स्मृतम् ॥ ८९९ ॥
साध्या मरुद्गणाश्चैव विश्वेदेवास्तथैव च ।
नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः ॥ ९०० ॥
ते वै प्राकृतलोकेऽस्मिन्ननित्यास्त्रिदशेश्वराः ।
ते ह नाकं महिमानः सचन्त इति वै श्रुतिः ॥ ९०१ ॥ इति ।

किं च भगवदंशस्वरूपा एव ते । यथोक्तं त्रैलोक्यसम्मोहनतन्त्रे अष्टादशाक्षरषडङ्गादिदेवताभेदकथनारम्भे—

सर्वत्र देवदेवोऽसौ गोपवेशधरो हरिः ।
केवलं रूपभेदेन नामभेदः प्रकीर्तितः ॥ ९०२ ॥ इति ।

अतो नाममात्रसाधारण्येनानन्यभक्तैर्न भेतव्यम् । किन्तु भागवतनित्यवैकुण्ठसेवकत्वाद् विष्वक्सेनादिवत् सत्कार्या एव ते "यस्यात्मबुद्धिः कुणपे त्रिधातुके" (भा० १०।८४।१३) इत्यादौ "अर्चयित्वा तु गोविन्दं तदीयान् नार्चयेत् तु यः" इत्यादिपाद्मोत्तरखण्डवचनेन तदसत्कारे दोषश्रवणात् ।
अतस्तानेवोद्दिश्याह (भा० ११।२७।२९) —

दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून् सुरान् ।
स्वे स्वे स्थाने त्वभिमुखान् पूजयेत् प्रोक्षणादिभिः ॥ ९०३ ॥

पाद्मोत्तरखण्ड एव च —

तस्मादवैदिकानां च देवानामर्चनं त्यजेत् ।
स्वतन्त्रपूजनं यच्च वैदिकानामपि त्यजेत् ॥ ९०४ ॥
अर्चयित्वा जगद्वन्द्यं देवं नारायणं हरिम् ।
तदावरणसंस्थानं देवस्य परितोऽर्चयेत् ॥ ९०५ ॥
हरेर्भुक्तावशेषेण बलिं तेभ्यो विनिक्षिपेत् ।
होमं चैव प्रकुर्वीत तच्छेषेणैव वैष्णवः ॥ ९०६ ॥ इत्यादि ॥

श्रीभगवान् ॥

२८६ । भूतादिपूजा तु तत्पूजाङ्गत्वे विहितापि न कर्तव्या — तदावरणदेवतात्वाभावात् । निषिद्धं च तत्रैव —

यक्षाणां च पिशाचानां मद्यमांसभुजां तथा ।
दिवौकसानां भजनं सुरापानसमं स्मृतम् ॥ ९०७ ॥ इति ।

अत एवावश्यकपूज्यानामन्येषां तत्स्वीकृतैरपि मद्यादिभिः पूजा निषिद्धा यथा सङ्कर्षणादीनाम् ।
अथ पीठपूजायां येऽप्यधर्माद्या वर्तन्ते गुणत्रयं च तानि तु पाद्मोत्तरखण्डे स्पष्टान्यपि न सन्ति तथा स्वायम्भुवागमेऽपि तस्मान् नादरणीयानि ।
केचित् तु नारदपञ्चरात्रदृष्ट्या तान्यन्यथैव व्याचक्षते यथोक्तं तत्रैव "अधर्माद्यचतुष्कं तु अश्रेयसि नियोजनम्" इत्यधार्मिकादिषु तत्तदन्तर्यामिशक्तिरधर्माद्यमित्यर्थः ।
तथा पीठपूजायां भगवद्वामे श्रीगुरुपादुकापूजनमेवं सङ्गच्छते । यथा — य एव भगवानत्र व्यष्टिरूपतया भक्तावतारत्वेन श्रीगुरुरूपो वर्तते स एव तत्र समष्टिरूपतया स्ववामप्रदेशे साक्षादवतारत्वेनापि तद्रूपो वर्तत इति ।

तथा ये चात्र श्रीरामाद्युपासनायां मैन्दद्विविदादय आवरणदेवतास्ते तु तदीयनित्यधामगता नित्याः शुद्धाश्च ज्ञेयाः । यथाक्रूराघमर्षणे तेन श्रीप्रह्लादादयो दृष्टाः । य एव श्रीप्रह्लादः पृथ्वीदोहनेऽपि वत्सोऽभूत्—तदानीं तज्जन्माभावात् चाक्षुषमन्वन्तर एव हिरण्यकशिपोर्जातत्वात् ।

अन्ये तु स्वस्वधाम्नि नित्यप्राकट्यस्यैव श्रीरामादेः प्रपञ्चप्राकट्यावसरं प्राप्य तत्साहाय्यार्थं नित्यपार्षदमैन्दद्विविदादिशक्त्यावेशिनो जीवाः सुग्रीवादिभागवतद्वेषिबालिप्रभृतिसम्बन्धादुत्तरकाले भगवद्द्वेषिनरकासुरादिसङ्गाच्च दुष्टभावा भवन्तीत्यवधेयम् । प्रपञ्चलोकमिश्रत्वेनैव प्राकट्यसम्भवात् ।

अथ श्रीकृष्णगोकुलोपासनायामपि यत् श्रीरुक्मिण्यादीनामावरणत्वं तत् तु तच्छक्तिविशेषरूपाणां तासां विमलादीनामिवान्तर्धानगतत्वेनैव न तु तल्लीलागतप्राकट्येनेति ज्ञेयम् । अत एव ध्याने ता नोक्ताः ।

केचित् तु रुक्मिण्यादिनामानि श्रीराधादिनामान्तरत्वेनैव मन्यन्ते ।

यथा ते शङ्खचक्रगदामुद्रादिधारणं श्रीकृष्णचरणचिह्नत्वेनैव स्वीकुर्वन्ति यथा च द्वारान्तःपार्श्वयोर्गङ्गायमुनयोः पूज्यमानयोर्गङ्गा श्रीगोवर्धने प्रसिद्धा मानसगङ्गेति मन्यन्ते । तथा च विष्वक्सेनादयो भद्रसेनादय इति ।

श्रीकृष्णपीठपूजायां श्वेतद्वीपक्षीरसमुद्रपूजा च गोलोकाख्यस्य तद्धाम्नोऽपि श्वेतद्वीपेतिनामत्वात् कामधेनुकोटिनिःसृतदुग्धपूरविशेषस्य च तत्र स्थितत्वात् । यथोक्तं ब्रह्मसंहितायां तद्वर्णनान्ते (ब्र० सं० ५।६८)—

स यत्र क्षीराब्धिः स्रवति सुरभीभ्यश्च सुमहान्
निमेषार्धाख्यो वा व्रजति न हि यत्रापि समयः ।
भजे श्वेतद्वीपं तमहमिह गोलोकमिति यं
विदन्तस्ते सन्तः क्षितिविरलचाराः कतिपये ॥ ९८ ॥ इति ।

एवमन्यत्रापि ज्ञेयम् । तथा सोमसूर्याग्निमण्डलान्यप्राकृतान्यतिशैत्यतापगुणपरित्यागेनैव वर्तन्ते । तत्र सर्वकल्याणगुणवस्तूनामेवाभिधानाय प्राकृतनिषेधात् । यथा नृसिंहतापन्याम् "तद्वा एतत् परं धाम मन्त्रराजाध्यापकस्य यत्र न दुःखादि यत्र न सूर्यो भाति यत्र न वायुर्वाति यत्र न चन्द्रमास्तपति न यत्र नक्षत्राणि भान्ति यत्र नाग्निर्दहति यत्र न मृत्युः प्रविशति यत्र न दोषः" (नृ० ता० उ० ५।९) इत्यादि ।

तदेवं कर्ममिश्रत्वादिनिरसनप्रसङ्गसङ्गत्या तत्परिकरा व्याख्याताः ।

अथ तेषां शुद्धभक्तानां भूतशुद्ध्यादिकं यथामति व्याख्यायते । तत्र भूतशुद्धिर्निजाभिलषितभगवत्सेवौपयिकतत्पार्षददेहभावनापर्यन्तैव तत्सेवैकपुरुषार्थिभिः कार्या निजानुकूल्यात् ।

एवं यत्र यत्रात्मनो निजाभीष्टदेवतारूपत्वेन चिन्तनं विधीयते तत्र तत्रैव पार्षदत्वे ग्रहणं भाव्यमहङ्ग्रहोपासनायाः शुद्धभक्तैर्द्विष्टत्वात् । ऐक्यं च तत्र साधारण्यप्रायमेव तदीयचिच्छक्तिवृत्तिविशुद्धसत्त्वांशविग्रहत्वात् पार्षदानाम् ।

अथ केशवादिन्यासादीनां यत्राधमाङ्गविषयत्वं तत्र तन्मूर्तिं ध्यात्वा तत्तन्मन्त्रांश्च जप्त्वैव तत्तदङ्गस्पर्शमात्रं कुर्यात् न तु तत्तन्मन्त्रदेवतास्तत्र तत्र न्यस्ता ध्यायेत् — भक्तानां तदनौचित्यात् ।
अथ मुख्यं ध्यानं श्रीभगवद्धामगतमेव हृदयकमलगतं तु योगिमतम् "स्मरेद् वृन्दावने रम्ये" इत्याद्युक्तत्वात् । अत एव मानसपूजा च तत्रैव चिन्तनीया ।
कामगायत्रीध्यानं च यत् सूर्यमण्डले श्रूयते तत् तत्रैव चिन्त्यम् "गोलोक एव निवसत्यखिलात्मभूतः" (ब्र० सं० ५।४८) इत्यत्र एवकारात् । तत्र श्रीवृन्दावननाथः साक्षान् न तिष्ठति किन्तु तेजोमयप्रतिमाकारेणैवेति ।
अथ बहिरुपचारैरन्तःपूजायां वेण्वादिपूजा तदङ्गज्योतिर्विलीनाङ्गस्य स्वस्याङ्गे निविष्टस्य तस्य तन्मुखादावेव भाव्या न तु स्वमुखादौ ।
तथा वेण्वादितद्भूषणमुद्रादर्शनम् — स्वमुखादौ तथा वेण्वादि यत् क्रियते तच्च तस्मै तदीयतत्तत्प्रियवस्तूनां दर्शनार्थमेव न तु स्वस्यैवाङ्गे तानि भाव्यन्त इति पूर्वहेतोरेव ।
तथा मानसादिपूजायां भूतपूर्वतत्परिकरलीलासंवलितत्वमपि न कल्पनामयं किन्तु यथार्थमेव । यतस्तस्य प्राकट्यसमये लीलास्तत्परिकराश्च ये प्रादुर्बभूवुस्ते तादृशाश्चाप्रकटमपि नित्यं तदीये धाम्नि सङ्ख्यातीता एव वर्तन्ते ।
असुरास्तु न तत्र चेतनाः किन्तु यन्त्रमयतत्प्रतिमानिभा ज्ञेयाः । "एवं विहारैः" इत्यादौ "निलायनैः सेतुबन्धैर्मर्कतोट्प्लवनादिभिः" (भा० १०।१४।६१) इतिवत् तत्तल्लीलानां नानाप्रकाशैः कौतुकेनानुक्रियमाणत्वात् ।
श्रीभगवत्सन्दर्भादौ हि तथा सन्यायं दर्शितमस्ति ।
अथ मानसपूजामाहात्म्यं यथा नारदपञ्चरात्रे श्रीनारायणवाक्यम् "अयं यो मानसो योगो जराव्याधिभयापहः" इत्यादौ —

> यश्चैतत् परया भक्त्या सकृत् कुर्यान् महामते ।
> क्रमोदितेन विधिना तस्य तुष्याम्यहं मुने ॥ १०९ ॥

एषा क्वचित् स्वतन्त्रापि भवति । मनोमय्या मूर्तेरष्टमतया स्वातन्त्र्येण विधानात् "अर्चादौ हृदये वापि यथालब्धोपचारकैः" (भा० ११।३।५०) इत्याविर्होत्रवचनेन वाशब्दात् ।
अथ पूजास्थानानि विचार्यन्ते । तानि च विविधानि । तत्र शालग्रामादिकं तत्तद्भगवदाकाराधिष्ठानमिति चिन्त्यम् — आकारवैलक्षण्यात् "शालग्रामशिला यत्र तत्र सन्निहितो हरिः" इत्याद्युक्तेः ।
तत्र च स्वेष्टाकारस्यैव भगवतोऽधिष्ठानं सुष्ठु सिद्धिकरम् — तस्मिन्नेवायत्नतस्तदीयप्राकट्यात् "मूर्त्याभिमतयात्मनः" (भा० ११।३।४८) इत्युक्तेः ।
श्रीकृष्णादीनां तु मथुरादिक्षेत्रं महाधिष्ठानम् "मथुरा भगवान् यत्र नित्यं सन्निहितो हरिः" (भा० १०।१।२८) इत्याद्युक्तेः । तथा तत्तन्मन्त्रध्येयवैभवत्वेन मथुरावृन्दावनादीनां श्रीगोपालतापन्यादौ प्रख्यातत्वात् । मथुरादिक्षेत्राण्येवान्यत्राधिष्ठाने ध्यानेन प्रकाश्य तेषु भगवांश्चिन्त्यते ।

अथ श्रीमत्प्रतिमायां तु तदाकारैकरूपतयैव चिन्तयन्ति — आकारैक्यात् “शिलाबुद्धिः कृता किं वा प्रतिमायां हरेर्मया” इति भावनान्तरे दोषश्रवणाच्च ।
एवमेव श्रीभगवता “चलाचलेति द्विविधा प्रतिष्ठा जीवमन्दिरम्” (भा० ११।२७।१३) इत्युक्तम् । प्रतिष्ठा — प्रतिमा जीवस्य जीवयितुः परमात्मनो मम मन्दिरं मदङ्गप्रत्यङ्गैरेकाकारतास्पदमित्यर्थः ।
यद्वा प्रतिष्ठालक्षणेन कर्मणा पूर्वोक्ता प्रतिमा मम तदास्पदं भवतीत्यर्थः ।
तथा च हयशीर्षपञ्चरात्रेषु “विष्णो सन्निहितो भव” इति सान्निध्यकरणमन्त्रविशेषानन्तरं मन्त्रान्तरम् —

यच्च ते परमं तत्त्वं यच्च ज्ञानमयं वपुः ।
तत् सर्वमेकतो लीनमस्मिन् देहे विबुध्यताम् ॥ ९१० ॥ इति ।

अथवा जीवमन्दिरम् — सर्वजीवानां परमाश्रयः साक्षाद् भगवानेव प्रतिष्ठेत्यर्थः । परमोपासकाश्च साक्षात्परमेश्वरत्वेनैव तां पश्यन्ति । भेदस्फूर्तेर्भक्तिविच्छेदकत्वात् तथैव ह्युचितम् । इत्थमेवोक्तं श्रीभगवता (भा० ११।२७।३२) —

वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः ।
अलङ्कुर्वीत सप्रेम मद्भक्तो मां यथोचितम् ॥ ९११ ॥

इत्यत्र मामिति सप्रेमेति च । अत एव विष्णुधर्मे तामधिकृत्य अम्बरीषं प्रति श्रीविष्णुवाक्यम् —

तस्यां चित्तं समावेश्य त्यज चान्यान् व्यपाश्रयान् ।
पूजिता सैव ते भक्त्या ध्याता चैवोपकारिणी ॥ ९१२ ॥
गच्छंस्तिष्ठन् स्वपन् भुञ्जंस्तामेवाग्रे च पृष्ठतः ।
उपर्यधस्तथा पार्श्वे चिन्तयंस्तामथात्मनः ॥ ९१३ ॥

अत एव तत्पूजायामावाहनादिकमित्थं व्याख्यातमागमे —

आवाहनं चादरेण सम्मुखीकरणं प्रभोः ।
भक्त्या निवेशनं तस्य संस्थापनमुदाहृतम् ॥ ९१४ ॥
तवास्मीति तदीयत्वदर्शनं सन्निधापनम् ।
क्रियासमाप्तिपर्यन्तस्थापनं सन्निरोधनम् ॥
सकलीकरणं प्रोक्तं तत्सर्वाङ्गप्रकाशनम् ॥ ९१५ ॥ इति ।

अत्र शूद्रादिपूजितार्चापूजानिषेधवचनमवैष्णवशूद्रादिपरमेव —

न शूद्रा भगवद्भक्तास्ते तु भागवता नराः ।
सर्ववर्णेषु ते शूद्रा ये न भक्ता जनार्दने ॥ ९१६ ॥ इत्युक्तेः ।

अथ सप्तमे "पात्रम्" (भा० ७।१४।३४) इत्यादौ श्रीनारदोक्तौ अधिष्ठानविचारे श्रीमदर्चा-तोऽपि यः पुरुषमात्रातिशयस्तत्रापि ज्ञानिनः स च कैवल्यकामो भक्त्याश्रयः ।
तस्मिन् प्रकरणे "ज्ञाननिष्ठाय देयानि" (भा० ७।१५।२) इत्युपसंहारे ज्ञानिन एव दानपात्र-त्वेन परमोत्कर्षोक्तेः ।
अन्यत्र तु "न मेऽभक्तश्चतुर्वेदी" "नायं सुखापो भगवान्" (भा० १०।९।२१) इत्यादौ "मुक्ता-नामपि सिद्धानाम्" (भा० ६।१४।५) इत्यादौ च भक्तस्यैव ततोऽप्युत्कर्षः किमुत तदुपा-स्यायाः श्रीमदर्चायाः ।
अत एव तामुद्दिश्योक्तम् "नानुव्रजति यो मोहात्" इत्यादि ।
तथापि "पात्रम्" इत्यादीनामर्थोऽपि क्रमेण दर्श्यते (भा० ७।१४।३४–३५) —

पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ।
हरिरेवैक उर्वीश यन्मयं वै चराचरम् ॥ ९१७ ॥
देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ।
राजन् यदग्रपूजायां मतः पात्रतयाच्युतः ॥ ९१८ ॥

तत्र राजसूये ॥

२८७ । "जीवराशिभिराकीर्णः" (भा० ७।१४।३६) इत्यादि ।
सर्वेषाम् जीवानामात्मनश्च तर्पणरूपा सैव भवतीत्यर्थः ॥

२८८ । "पुराण्यनेन" (भा० ७।१४।३७) इत्यादि । जीवेन जीवयित्वा जीवान्तर्यामिरूपेणे-त्यर्थः ॥

२८९ । "तेष्वेव भगवान्" (भा० ७।१४।३८) इत्यादि ।
तस्मात् तारतम्यवर्तनात् पुरुषः प्रायो मनुष्यः पात्रम् । तत्र ज्ञान्यादिकं विशिष्टमिति भगवद्वर्तनस्यातिशयात् । तत्राप्यात्मा यावान् यथा ज्ञानादिपरिमाणादिकस्तथासौ पात्र-मित्यर्थः ॥

२९० । एवं स्थितेऽपि कालेनोपासकदोषोत्पत्तौ सत्यां वेददृष्ट्या विशिष्टमधिष्ठानान्तरं प्रकाशितमित्याह (भा० ७।१४।३९) —

दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप ।
त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥ ९१९ ॥

मिथोऽवज्ञानमसम्मानंस्तस्मिन्नात्मा बुद्धिर्येषां भावं दृष्ट्वा क्रियायै पूजाद्यर्थमर्चा कृता तत्परिचर्यामार्गदर्शनाय सा प्रकाशितेत्यर्थः । एतेन तादृशदोषयुक्तेष्वपि कार्यसाधकत्वात् श्रीमदर्चाया आधिक्यमेव व्यञ्जितम् ।
“प्रतिमा स्वल्पबुद्धीनाम्” इत्यत्र चाल्पबुद्धीनामपीत्यर्थः — नृसिंहपुराणादौ ब्रह्माम्बरीषादीनामपि तत्पूजाश्रवणात् ॥

२९१ । “ततोऽर्चायाम्” (भा० ७।१४।४०) इत्यादि ।
तत एवं प्रभावात् । केचिदित्यधिष्ठानवैशिष्ट्येन पूर्वतोऽप्युत्तमसाधनतत्परा इत्यर्थः । नन्ववज्ञावद् द्वेषेऽपि सिद्धिः स्यात् ? इत्याशङ्क्यातिप्रसङ्गवारणेच्छया प्रस्तुतपुरुषरूपाधिष्ठानादररक्षेच्छया च तं वारयति “उपास्तापि” इति ॥

२९२ । अथ पुरुषेषु पूर्वोक्तविशेषं जात्यादिना विवृणोति “पुरुषेष्वपि” (भा० ७।१४।४१) इत्यादि ।
यो धत्ते तं सुपात्रं विदुः ॥

२९३ । पूर्वोक्तं ब्राह्मणरूपं पात्रमेव स्तौति “नन्वस्य” (भा० ७।१४।४२) इत्यादिना । जगदात्मनो जगति लोकसङ्ग्रहधर्मादिप्रवर्तनेन तन्नियन्तुरित्यर्थः । दैवतं पूज्यत्वेन दर्शितम् ॥ श्रीनारदो युधिष्ठिरम् ॥

२९४ । अथ तदनन्तराध्यायस्यादावेव तेषु सर्वोत्कृष्टमाह द्वाभ्याम् (भा० ७।१५।१-२) —

> कर्मनिष्ठा द्विजाः केचित् तपोनिष्ठा नृपापरे ।
> स्वाध्यायेऽन्ये प्रवचने केचन ज्ञानयोगयोः ॥ ९२० ॥
> ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छता ।
> दैवे च तदभावे स्यादितरेभ्यो यथार्हतः ॥ ९२१ ॥

अनेन यथात्र मुमुक्षुप्रभृतीनां ज्ञानिपूजैव मुख्या पुरुषान्तरपूजा तु तदभाव एव तथा प्रेमभक्तिकामानां प्रेमभक्तपूजा ज्ञेया । ततः प्रेमभक्तानामपि यच् चित्तस्य परमाश्रयरूपं तदभिव्यक्तेः सुतरामेवार्चाया आधिक्यमपि ।
एवं तदाश्रयरूपस्य विलक्षणप्रकाशस्थानत्वादेव श्रीविष्णोर्व्यापकत्वेऽपि शालग्रामादिषु निर्धारणम् । तच्च पुरुषवन् नान्तर्यामिदृष्ट्यपेक्षं किन्तु स्वभावनिर्देशपरमेव — तन्निवासक्षेत्रादीनां महातीर्थत्वापादनादिना कीटादीनामपि कृतार्थत्वकथनात् ।
तथा च स्कान्दे —

> शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ।
> तत्र दानं जपो होमः सर्वं कोटिगुणं भवेत् ॥ ९२२ ॥

पाद्मे —

शालग्रामसमीपे तु क्रोशमात्रं समन्ततः ।
कीकटोऽपि मृतो याति वैकुण्ठभुवनं नरः ॥ ९२३ ॥ इति ।

तस्मादर्चाया आधिक्यमेव हि स्थितम् ॥ श्रीनारदो युधिष्ठिरम् ॥

२९५ । अथाधिष्ठानान्तराणि चैवम् । यथा (भा० ११।११।४२-४६) —

सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज् जलम् ।
भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ॥ ९२४ ॥
सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम् ।
आतिथ्येन तु विप्राग्र्ये गोष्वङ्ग यवसादिना ॥ ९२५ ॥
वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया ।
वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥ ९२६ ॥
स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि ।
क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत माम् ॥ ९२७ ॥
धिष्ण्येष्वित्येषु मद्रूपं शङ्खचक्रगदाम्बुजैः ।
युक्तं चतुर्भुजं शान्तं ध्यायन्नर्चेत् समाहितः ॥ ९२८ ॥

टीका च — "इदानीमेकादशपूजाधिष्ठानान्याह 'सूर्यः' इति । हे भद्र ! अधिष्ठानभेदेन पूजा-साधनभेदमाह 'सूर्ये' इति त्रिभिः । त्रय्या विद्यया सूक्तैरुपस्थानादिना । अङ्ग ! हे उद्धव ! मुख्यधिया प्राणदृष्ट्या । तोये तोयादिभिर्द्रव्यैस्तर्पणादिना । स्थण्डिले भुवि । मन्त्रहृ-दयै रहस्यमन्त्रन्यासैः । सर्वाधिष्ठानेषु ध्येयमाह 'धिष्ण्येषु' इति 'एषु' इति । 'इति' अनेन प्रकारेण । एषु धिष्ण्येषु" इत्येषा ।
अत्र सर्वत्र चतुर्भुजस्यैवानुसन्धाने सत्यपि द्विधा गतिः — एकाधिष्ठानपरिचर्ययैवाधिष्ठातु-रुपासनालक्षणा । मन्दिरलेपनादिना तदधिष्ठातृप्रतिष्ठाया इव । यथा "वैष्णवे बन्धुस-त्कृत्या" "गोष्वङ्ग यवसादिना" इत्यादि । यतो बन्धुसत्कारो वैष्णवविषयकः । ईश्वरे तु प्रभुभाव उपदिश्यते "ईश्वरे तदधीनेषु" (भा० ११।२।४६) इत्यादौ ।
तथा गोसम्प्रदानकमेव यवसादिभोजनदानं युज्यते न तु श्रीचतुर्भुजसम्प्रदानकमभक्ष्य-त्वात् । भा० ११।११।४१ —

यद् यदिष्टतमं लोके यच् चातिप्रियमात्मनः ।
तत् तन् निवेदयेन् मह्यं तदानन्त्याय कल्पते ॥ ९२९ ॥

इति तत्रैव पूर्वमुक्तम् ।
अन्या तु साक्षादधिष्ठातुरुपासनालक्षणा यथा "हृदि खे ध्याननिष्ठया" "तोये द्रव्यैस्तोयपु-रस्कृतैः" इत्यादि । अत्राग्न्यादौ तदन्तर्यामिरूपस्यैव चिन्तनं कार्यं न जातु निजप्रेमसेवा-विशेषाश्रयस्वाभीष्टरूपविशेषस्य । स तु सर्वथा परमसुकुमारत्वादिबुद्धिजनितया प्रीत्यैव सेवनीयः ।

यथोक्तं श्रीभगवतैव “वस्त्रोपवीताभरण” (भा० ११।२७।३२) इत्यादि ।
तेषां यथाभक्तिरीत्या परमेश्वरस्यापि तथाभावः श्रूयते । यथा श्रीनारदीये —

भक्तिग्राह्यो हृषीकेशो न धनैर्धरणीसुराः ।
भक्त्या सम्पूजितो विष्णुः प्रददाति समीहितम् ॥ ९३० ॥
जलेनापि जगन्नाथः पूजितः क्लेशहा हरिः ।
परितोषं व्रजत्याशु तृषार्तः सुजलैर्यथा ॥ ९३१ ॥ इति ।

अत्र दृष्टान्त उपजीव्यः । वैपरीत्ये दोषश्च यथा ग्रीष्मे जलस्थस्य पूजा प्रशस्ता वर्षासु निन्दिता । यदुक्तं गारुडे —

शुचिशुक्रगते काले येऽर्चयिष्यन्ति केशवम् ।
जलस्थं विविधैः पुष्पैर्मुच्यन्ते यमताडनात् ॥ ९३२ ॥
घनागमे प्रकुर्वन्ति जलस्थं वै जनार्दनम् ।
ये जना नृपतिश्रेष्ठ तेषां वै नरकं ध्रुवम् ॥ ९३३ ॥ इति ।

एवमन्यत्रापि । परिचर्याविधौ तद्देशकालसुखदानि शतशो विहितानि । तद्विपरीतानि निषिद्धानि च विष्णुयामले “विष्णोः सर्वर्तुचर्या च” इति ।
अत एवोक्तम् “यद् यदिष्टतमं लोके” (भा० ११।११।४१) इत्यादि ।
तत्र तत्रेष्टमन्त्रध्यानस्थलं च सर्वर्तुसुखमयमनोहररूपरसगन्धस्पर्शशब्दमयत्वेनैव ध्यातुं विहितमस्ति । अन्यथा तत्तदाग्रहस्य वैयर्थ्यं स्यात् । तस्मादग्न्यादौ तत्तदन्तर्यामिरूप एव भाव्य इति स्थितम् ॥ श्रीभगवान् ॥

२९६ । अथ नैवेद्यार्पणप्रसङ्गे यः क्रमदीपिकादर्शितोऽनिरुद्धनामात्मको मन्त्रस्तस्य स्थाने श्रीकृष्णैकान्तिकभक्तास्तु तन्मूलमन्त्रमेवेच्छन्ति । तथा यच्च तन्मुखज्योतिरनुगतत्वेन ध्यातुं विधीयते तत् तु भोजनसमये तन्मुखप्रसादमेव मन्यन्ते । भोजनं तु यथा लोकसिद्धमेव नरलीलत्वात् श्रीकृष्णस्य ।
अथ जपे मन्त्रार्थस्य नानात्वेऽपि पुरुषार्थानुकूल एवासौ चिन्त्यः । यथा श्रीमदष्टाक्षरादावात्मनिवेदनलक्षणचतुर्थ्याद्यभाववति मन्त्रे तदनुसन्धानेनेति । एवमन्येऽपि पूजाविधयो यथायथं योजनीयाः । शुद्धभक्तिसिद्ध्यर्थं सर्वासां भक्तीनामेव शुद्धत्वाशुद्धत्वरूपेण द्विविधो हि भेदः सम्मत इति ।
तदेतदर्चनं फलेनाह (भा० ११।२७।४९) —

एवं क्रियायोगपथैः पुमान् वैदिकतान्त्रिकैः ।
अर्चन्नुभयतः सिद्धिं मत्तो विन्दत्यभीप्सिताम् ॥ ९३४ ॥

उभयत इहामुत्र च ॥

२९७ । यथा (भा० ११।२७।५३) —

मामेव नैरपेक्ष्येण भक्तियोगेन विन्दति ।
भक्तियोगं स लभत एवं यः पूजयेत माम् ॥ ९३५ ॥

नैरपेक्ष्येण निरुपाधिना भक्तियोगेन प्रेम्णा । स च भक्तियोग एवं पूजायाः स्यादित्याह — भक्तीति ॥ श्रीभगवान् ॥

२९८ । यानि चात्र वैष्णवचिह्नानि निर्माल्यधारणचरणामृतपानादीन्यङ्गानि तेषां च पृथक् पृथक् महामाहात्म्यवृन्दं शास्त्रसहस्रेष्वनुसन्धेयम् ।
अथार्चनाधिकारिनिर्णयः (भा० ११।२७।४) —

एतद् वै सर्ववर्णानामाश्रमाणां च सम्मतम् ।
श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ॥ ९३६ ॥

सर्ववर्णानां त्रैवर्णिकानाम् । तथा च स्मृत्यर्थसारे पाद्मे च वैशाखमाहात्म्ये —

आगमोक्तेन मार्गेण स्त्रिभिः शूद्रैश्च पूजनम् ।
कर्तव्यं श्रद्धया विष्णोश्चिन्तयित्वा पतिं हृदि ॥ ९३७ ॥
शूद्राणां चैव भवति नाम्ना वै देवतार्चनम् ।
सर्वे चागममार्गेण कुर्युर्वेदानुसारिणा ॥ ९३८ ॥
स्त्रीणामप्यधिकारोऽस्ति विष्णोराराधनादिषु ।
पतिप्रियहितानां च श्रुतिरेषा सनातनी ॥ ९३९ ॥ इति ।

विष्णुधर्मे —

देवतायां च मन्त्रे च तथा मन्त्रप्रदे गुरौ ।
भक्तिरष्टविधा यस्य तस्य कृष्णः प्रसीदति ॥ ९४० ॥
तद्भक्तजनवात्सल्यं पूजायां चानुमोदनम् ।
सुमना अर्चयेन् नित्यं तदर्थे दम्भवर्जनम् ॥ ९४१ ॥
तत्कथाश्रवणे रागस्तदर्थे चाङ्गविक्रिया ।
तदनुस्मरणं नित्यं यस्तन्नामोपजीवति ॥ ९४२ ॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते ।
स मुनिः सत्यवादी च कीर्तिमान् स भवेन् नरः ॥ ९४३ ॥

किं च तत्त्वसागरे —

यथा काञ्चनतां याति कांस्यं रसविधानतः ।
तथा दीक्षाविधानेन द्विजत्वं जायते नृणाम् ॥ ९४४ ॥ इति ।

अथ "कृते शुक्लश्चतुर्बाहुः" (भा० ११।५।२१) इत्यादिना युगभेदे यश्चोपासनायामाविर्भावभेद उच्यते स च प्रायिक एव । तेभ्यश्चतुर्भ्योऽन्येषामुपासनाशास्त्रादेव । अन्यथेतरोपासनायाः कालासमावेशः स्यात् । श्रूयन्ते च सर्वत्र युगे सर्वोपासकास्तस्मात् सर्वैरपि सर्वदापि यथेच्छं सर्वमेवाविर्भावाः पूज्या इति स्थितम् । अत "एतद् वै सर्ववर्णानाम्" इत्यादिकं सर्वसम्मतमेव ॥ उद्धवः श्रीभगवन्तम् ॥

२९९ । तदेतदर्चनं व्याख्यातम् । अस्याङ्गानि चागमादौ ज्ञेयानि । तथा श्रीकृष्णजन्माष्टमीकार्तिकव्रतैकादशीमाघस्नानादिकमत्रैवान्तर्भाव्यम् ।
तत्र जन्माष्टमी यथा विष्णुरहस्ये ब्रह्मनारदसंवादे—

तुष्ट्यर्थं देवकीसूनोर्जयन्तीसम्भवं व्रतम् ।
कर्तव्यं वित्ताशाठ्येन भक्त्या भक्तजनैरपि ।
अकुर्वद् याति निरयं यावदिन्द्राश्चतुर्दश ॥ ९४५ ॥

तथा—

कृष्णजन्माष्टमीं त्यक्त्वा योऽन्यद् व्रतमुपासते ।
नाप्नोति सुकृतं किञ्चिद् दृष्टं श्रुतमथापि वा ॥ ९४६ ॥

वित्ताशाठ्यं चोक्तमष्टमे (भा० ८।१९।३७)—

धर्माय यशसेऽर्थाय कामाय स्वजनाय च ।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥ ९४७ ॥

अथ कार्तिको यथा स्कान्दे "एकतः सर्वतीर्थानि" इत्यादिकमुक्त्वा—

एकतः कार्तिको वत्स सर्वदा केशवप्रियः ।
यत् किञ्चित् क्रियते पुण्यं विष्णुमुद्दिश्य कार्तिके ।
तदक्षयं भवेत् सर्वं सत्योक्तं तव नारद ॥ ९४८ ॥ इति ।
अव्रतेन क्षिपेद् यस्तु मासं दामोदरप्रियम् ।
तिर्यग्योनिमवाप्नोति सर्वधर्मबहिष्कृतः ॥ ९४९ ॥ इति ।

अथ एकादशी—तत्र तावदस्या अवैष्णवेऽपि नित्यत्वम् । तत्र सामान्यतः विष्णुधर्मे "वैष्णवो वाथ सौरो वा कुर्यादेकादशीव्रतम्" इति ।
सौरपुराणे "वैष्णवो वाथ शैवो वा सौरोऽप्येतत् समाचरेत्" इति ।
विशेषतश्च नारदपञ्चरात्रे दीक्षानन्तरावश्यककृत्यकथने "समयांश्च प्रवक्ष्यामि" इत्यादौ—

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
जागरं निशि कुर्वीत विशेषां चार्पयेद् विभुम् ॥ ९५० ॥ इति ।

विष्णुयामलेऽपि तत्कथने दिग्विद्धैकादशीव्रतम्—

शुक्लाकृष्णाविभेदश्चासद्व्यापारो व्रते तथा ।
शक्तौ फलादिभुक्तिश्च श्राद्धं चैकादशीदिने ॥
द्वादश्यां च दिवास्वापस्तुलस्यवचयस्तथा ॥ ९५१ ॥

तत्र विष्णोर्दिवास्नानमपि निषिद्धत्वेनोक्तम् । पाद्मोत्तरखण्डे च वैष्णवधर्मकथने "द्वादशी-व्रतनिष्ठता" इति ।
तथा स्कान्दे काशीखण्डे सौपर्णद्वारकामाहात्म्ये च चन्द्रशर्मणो भगवद्धर्मप्रतिज्ञा—

अद्यप्रभृति कर्तव्यं यन् मया कृष्ण तच्छृणु ।
एकादश्यां न भोक्तव्यं कर्तव्यो जागरः सदा ॥ ९५२ ॥
महाभक्त्यात्र कर्तव्यं प्रत्यहं पूजनं तव ।
पलार्द्धेनापि विद्धन् तु मोक्तव्यं वासरं तव ॥ ९५३ ॥
त्वत्प्रीत्याष्टौ मया कार्या द्वादश्यां व्रतसंयुताः ॥ ९५४ ॥ इत्यादिकाः ।

अत उक्तमाग्नेये—
एकादश्यां न भोक्तव्यं तद् व्रतं वैष्णवं महत् ॥ ९५५ ॥ इति ।
गौतमीये—

वैष्णवो यदि भुञ्जीत एकादश्यां प्रमादतः ।
विष्ण्वर्चनं वृथा तस्य नरकं घोरमाप्नुयात् ॥ ९५६ ॥

मत्स्यभविष्यपुराणयोः—

एकादश्यां निराहारो यद्भुङ्क्ते द्वादशीदिने ।
शुक्ला वा यदि वा कृष्णा तद् व्रतं वैष्णवं महत् ॥ ९५७ ॥ इति ।

स्कान्दे—

मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा ।
एकादश्यां तु यो भुङ्क्ते विष्णुलोकच्युतो भवेत् ॥ ९५८ ॥ इति ।

अत्र वैष्णवानां निराहारत्वं नाम महाप्रसादान्नपरित्याग एव — तेषामन्यभोजनस्य नित्य-मेव निषिद्धत्वात् । यथोक्तं नारदपञ्चरात्रे —

प्रसादान्नं सदा ग्राह्यमेकादश्यां न नारद ।
रमादिसर्वभक्तानामितरेषां च का कथा ॥ ९५९ ॥ इति ।

ब्रह्माण्डपुराणे —

पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधम् ।
अनिवेद्य न भुञ्जीत यदाहाराय कल्पितम् ॥ ९६० ॥
अनिवेद्य तु भुञ्जानः प्रायश्चित्ती भवेन् नरः ।
तस्मात् सर्वं निवेद्यैव विष्णोर्भुञ्जीत सर्वदा ॥ ९६१ ॥

जागरस्यापि नित्यत्वं यथा स्कान्दे उमामहेश्वरसंवादे —

सम्प्राप्ते वासरे विष्णोर्ये न कुर्वन्ति जागरम् ।
भ्रश्यते सुकृतं तेषां वैष्णवानां च निन्दया ॥ ९६२ ॥
मतिर्न जायते यस्य द्वादश्यां जागरं प्रति ।
न हि तस्याधिकारोऽस्ति पूजने केशवस्य हि ॥ ९६३ ॥ इति ।

तद्वत् तस्य विष्णुप्रीतिदत्वं च श्रूयते पाद्मोत्तरखण्डे —

शृणु देवि प्रवक्ष्यामि द्वादश्याश्च विधानकम् ।
तस्याः स्मरणमात्रेण सन्तुष्टोऽभूज् जनार्दनः ॥ ९६४ ॥

भविष्ये —

एकादशी महापुण्या सर्वपापविनाशिनी ।
भक्तेस्तु दीपनी विष्णोः परमार्थगतिप्रदा ॥ ९६५ ॥ इति ।

अत एव श्रीमदम्बरीषादीनां भक्त्येकनिष्ठानां महाप्रसादैकभुजां तद्व्रतं दर्शयता श्रीभाग-वतेनापि तदन्तरङ्गवैष्णवधर्मत्वेन सम्मतमिति दिक् । पाद्मे कार्तिकमाहात्म्ये च ब्राह्म-णकन्यायाः कार्तिकव्रतैकादशीव्रतप्रभावात् श्रीमत्सत्यभामाख्यभगवत्प्रेयसीपदप्राप्ति-रपि श्रूयते । किं बहुना ?
अथ माघः सौपर्णे —

दुर्लभो माघमासस्तु वैष्णवानामतिप्रियः ।
देवतानामृषीणां च मुनीनां सुरनायकः ।
विशेषेण शचीनाथ माधवस्यातिवल्लभः ॥ ९६६ ॥ इति ।

स्कान्दे ब्रह्मनारदसंवादे —

सर्वपापविनाशाय कृष्णसन्तोषणाय च ।
माघस्नानं सदा कार्यं वर्षे वर्षे च नारद ॥ ९६७ ॥ इति ।

भविष्योत्तरे —

एकविंशगणैः सार्द्धं भोगान् त्यक्त्वा यथेप्सितम् ।
माघमास्यूषसि स्नात्वा विष्णुलोकं स गच्छति ॥ ९६८ ॥ इति ।

एवं श्रीरामनवमीवैशाखव्रतादयश्चात्र ज्ञेयाः । एतत् सर्वमपि सदाचारकथनद्वारा विधत्ते "गां पर्यटन्" (भा० ३।१।१९) इत्यादौ "व्रतानि चेरे हरितोषणानि" इति । व्रतानि एकादश्यादीनीति । विदुर इति प्रकरणलब्धम् ॥ श्रीशुकः ॥

३०० । एवं तादृशव्रतेष्वपि तत्तदुपासकानां स्वस्वेष्टदैवतव्रतं सुष्ठ्वेव विधेयमित्यागतम् । तथास्मिन् पादसेवार्चनमार्गे "यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे" इत्यादिनागमोक्ता ये द्वात्रिंशदपराधास्तथा "राजान्नभक्षणं चैवम्" इत्यादिना वाराहोक्ता ये च तत्सङ्ख्यकास्तथा "मम शास्त्रं बहिष्कृत्य ह्यस्माकं यः प्रपद्यते" इत्यादिना तदुक्ता ये चान्ये बहवस्ते सर्वे —

ममार्चनापराधा ये कीर्त्यन्ते वसुधे मया ।
वैष्णवेन सदा ते तु वर्जनीयाः प्रयत्नतः ॥ ९६९ ॥

इति वाराहानुसारेण परित्याज्या ।
इत्याशयेनाह (भा० ११।२७।१७-१८) —

श्रद्धयोपाहृतं प्रेष्ठं भक्तेन मम वार्यपि ।
भूर्यप्यभक्तोपाहृतं न मे तोषाय कल्पते ॥ ९७० ॥

श्रद्धाभक्तिशब्दाभ्यामत्रादर एव विधीयते । अपराधास्तु सर्वेऽनादरात्मका एव । प्रभुत्वावमानतश्चाज्ञावमानतश्च । तस्मादपराधनिदानमत्रानादर एव परित्याज्या इत्यर्थः ॥ श्रीभगवान् ॥

३०१ । महतामनादरस्तु सर्वनाशक इत्याह (भा० ४।३१।२१) —

न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ।
श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिञ्चनेषु सत्सु ॥ ९७१ ॥

अधनाश्च ते आत्मधना भगवदेकधनाश्च ते प्रिया यस्य सः । रसज्ञो भक्तिरसिको हरिः । के कुमनीषिण इत्यपेक्षायामाह — श्रुतेति । पापमपराधम् ॥ श्रीनारदः प्रचेतसः ॥

३०२ । किं च (भा० ५।१०।२५) —

न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ।
महद्विमानात् स्वकृताद्धि मादृङ् नङ्क्ष्यत्यदूरादपि शूलपाणिः ॥ ९७२ ॥

स्पष्टम् ॥ रहूगणः श्रीभरतम् ॥

३०३ । अथ तथापि प्रामादिके भगवदपराधे पुनर्भगवत्प्रसादनानि कर्तव्यानि । यथा स्कान्दे अवन्तिखण्डे श्रीव्यासोक्तौ —

अहन्यहनि यो मर्त्यो गीताध्यायं पठेत् तु वै ।
द्वात्रिंशदपराधांस्तु क्षमते तस्य केशवः ॥ ९७३ ॥ इति ।

तत्रैव द्वारकामाहात्म्ये —

सहस्रनाममाहात्म्यं यः पठेच्छृणुयादपि ।
अपराधसहस्रेण न स लिप्येत् कदाचन ॥ ९७४ ॥ इति ।

तत्रैव रेवाखण्डे —

द्वादश्यां जागरे विष्णोर्यः पठेत् तुलसीस्तवम् ।
द्वात्रिंशदपराधानि क्षमते तस्य केशवः ॥ ९७५ ॥ इति ।

तत्रैवान्यत्र —

तुलस्या रोपणं कार्यं श्रवणेन विशेषतः ।
अपराधसहस्राणि क्षमते पुरुषोत्तमः ॥ ९७६ ॥ इति ।

तत्रैवान्यत्र कार्तिकमाहात्म्ये —

तुलस्या कुरुते यस्तु शालग्रामशिलार्चनम् ।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः ॥ ९७७ ॥ इति ।

अन्यत्र —

यः करोति हरेः पूजां कृष्णशस्त्राङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः ॥ ९७८ ॥ इति ।

आदिवाराहे —

संवत्सरस्य मध्ये तु तीर्थे शौकरके मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ॥ ९७९ ॥
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ।
अनयोस्तीर्थयोरेकं यः सेवेत् सुकृती नरः ।
सहस्रजन्मजनितानपराधान् जहाति सः ॥ ९८० ॥ इति ।

शौकरके शूकरक्षेत्राख्ये । महदपराधस्तु चाटुकारादिना वा तत्प्रीत्यर्थकृतेन निरन्तरदीर्घकालीनभगवन्नामकीर्तनेन वा तं प्रसाद्य क्षमापनीय इत्यवोचामैव । तत्प्रसादं विना तदसिद्धेः ।
अत एवोक्तं श्रीशिवं दक्षेण (भा० ४।७।१५) —

योऽसौ मयाविदिततत्त्वदृशा सभायां
क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन् माम् ।
अर्वाक् पतन्तमर्हत्तमनिन्दयापाद्
दृष्ट्यार्द्रया स भगवान् स्वकृतेन तुष्येत् ॥ ९८१ ॥

एवमुत्तरत्रापि ज्ञेयम् ।
अथ वन्दनम् — तच्च यद्यप्यर्चनाङ्गत्वेनापि वर्तते तथापि कीर्तनस्मरणवत् स्वातन्त्र्येणापीत्यभिप्रेत्य पृथग् विधीयते । एवमन्यत्रापि ज्ञेयम् ।
वन्दनस्य पृथग्विधानं चानन्तगुणैश्वर्यश्रवणात् तद्गुणानुसन्धानपादसेवादौ विधृतदैन्यानां नमस्कारमात्रे कृताध्यवसायानामर्थे । स एष नमस्कारस्तस्यार्चनत्वेनाप्यतिदिष्टः ।
यथा नारसिंहे —

नमस्कारः स्मृतो यज्ञः सर्वयज्ञेषु चोत्तमः ।
नमस्कारेण चैकेन साष्टाङ्गेन हरिं व्रजेत् ॥ ९८२ ॥ इति ।

तदेतद्वन्दनं यथा (भा० १०।१४।८) —

तत् तेऽनुकम्पां सुसमीक्षमाणो भुञ्जान एवात्मकृतं विपाकम् ।
हृद्वाग्वपुर्भिर्विदधन् नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ॥ ९८३ ॥

यस्मात् “गुणात्मनस्तेऽपि गुणान् विमातुम्” (भा० १०।१४।७) इत्यादिना तादृशत्वमुच्यते । तत् तस्मात् ।
नमो नमस्कारम् । मुक्तिपदे नवमपदार्थस्य मुक्तेरप्याश्रये परिपूर्णदशमपदार्थे ।
यद्वा मुक्तिरिह पञ्चमस्थगद्यानुसारेण प्रेमैव तत्पदे तद्विषये परिपूर्णभगवल्लक्षणे त्वयि दायभाग् भवति — भ्रातृवण्टन इव त्वं तस्य दायत्वेन वर्तस इत्यर्थः । त्वं तस्य सुवशो भवतीत्यर्थः ।
मुक्तिमात्रं तु सकृन् नमस्कारेणैवासन्नं स्यात् । यथा विष्णुधर्मे —

> दुर्गसंसारकान्तारमपारमभिधावताम् ।
> एकः कृष्णे नमस्कारो मुक्तितीरस्य दैशिकः ॥ ९८४ ॥ इति ।

“तत् ते” इत्यत्र “सुसमीक्षमाणः प्रतीक्षमाणः” इति टीका । यद्वा प्रतिक्षणं निरुपाधिकृपयैव प्रभुणा तथा तथा क्रियमाणामनुकम्पां सुष्ठुरूपामीक्षमाणस्तत्रानन्दीभवन् तां सम्यक् पश्यन् विभावयन् तथा हृदा यद्वा वाचा यद्वा वपुषा नमो विदधज् जन इत्यादि व्याख्या ज्ञेया ।
नमस्कारेऽप्यपराधाश्चैते परिहर्तव्याः । विष्णुस्मृत्यादिदृष्ट्या ये खलु एकहस्तकृतत्ववस्त्रावृतदेहत्वभगवदग्रपृष्ठवामभागात्यन्तनिकटगर्भमन्दिरगतत्वादिमयाः ॥ श्रीब्रह्मा श्रीभगवन्तम् ॥

३०४ । अथ दास्यम् — तच्च श्रीविष्णोर्दासम्मन्यत्वम् —

> जन्मान्तरसहस्रेषु यस्य स्यान् मतिरीदृशी ।
> दासोऽहं वासुदेवस्य सर्वान् लोकान् समुद्धरेत् ॥ ९८५ ॥

इत्युक्तलक्षणम् ।
अस्तु तावत् तद्भजनप्रयासः केवलतादृशत्वाभिमानेनापि सिद्धिर्भवतीत्यभिप्रेत्यैवोत्तरत्र निर्देशश्च तस्य । यथोक्तम् “जन्मान्तर” इत्येतत्पद्यस्येवान्ते “किं पुनस्तद्गतप्राणाः पुरुषाः संयतेन्द्रियाः” इति ।
श्रीप्रह्लादस्तुतौ “तत् तेऽर्हत्तम” (भा० ७।९।५०) इत्यादिपद्ये तु नमःस्तुतिसर्वकर्मार्पणपरिचर्याचरणस्मृतिकथाश्रवणात्मकं दास्यं टीकायां सम्मतम् ।
श्रीमदुद्धववाक्ये च (भा० ११।६।४६) —

> त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः ।
> उच्छिष्टभोजिनो दासास्तव मायां जयेम हि ॥ ९८६ ॥ इति ।

तत्र तत्र च कार्यद्वारैव निर्दिष्टम् । उदाहरणं तु “स वै मनः कृष्णपदारविन्दयोः” इत्यादौ “कामं च दास्ये न तु कामकाम्यया” (भा० ९।४।१८–२०) इति ।

चकारेति पूर्वेणान्वयः । कामं सङ्कल्पं च दास्ये निमित्ते एव । चकाराद् दासोऽहं तस्य दास्यमेतत् करोमीत्येवं सङ्कल्पितवानित्यर्थः । न तु कामकाम्यया स्वर्गादिभोगेच्छया तं चकारेति वासनान्तरव्यवच्छेदः ॥ श्रीशुकः ॥

३०५ । तदेतद्दास्यसम्बन्धेनैव सर्वमपि भजनं महत्तरं भवतीत्याह (भा० ९।५।१६) —

यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः ।
तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥ ९८७ ॥

यस्य भगवतो नामश्रवणमात्रेण यथाकथञ्चित् तच्छ्रवणेन किं पुनः सम्यक् तत्तद्भजनेनेत्यर्थः । तर्हि दासोऽस्मीत्यभिमानेन सम्यगेव भजतां सर्वत्र साधने साध्ये च किमवशिष्यते ? तदधिकमन्यत् किमपि नास्तीत्यर्थः ॥ दुर्वासाः श्रीमदम्बरीषम् ॥

३०६ । अथ सख्यम् — तच्च हिताशंसनमयं बन्धुभावलक्षणम् "यन्मित्रं परमानन्दम्" (भा० १०।१४।३१) इत्यत्र तथैव मित्रपदन्यासात् ।
यथा रामार्चनचन्द्रिकायाम् —

परिचर्यापराः केचित् प्रासादादिषु शेरते ।
मनुष्यमिव तं द्रष्टुं व्यवहर्तुं च बन्धुवत् ॥ ९८८ ॥ इति ।

अस्य चोत्तरत्र पाठः प्रेमविश्रम्भवद्भावनामयत्वेन दास्यादप्युत्तमत्वापेक्षया । किं च परमेश्वरेऽपि यत् सख्यं शास्त्रे विधीयते तन् नाश्चर्यम् "नादेवो देवमर्चयेत्" इति तद्भावस्यापि विधानश्रवणात् । किन्तु तद्भावस्तत्सेवाविरुद्ध इति शुद्धभक्तैरुपेक्ष्यते । सख्यं तु परमसेवानुकूलमित्युपादीयत इति ।
तदेतत् साक्षाद्भजनात्मकं दास्यं सख्यं च टीकायामपि दर्शितमस्ति "तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि जन्मनि स्यात्" (भा० १०।८१।३६) इत्यत्र श्रीदामविप्रवाक्ये ।
यथा "श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा तद्भक्तिं प्रार्थयते — तस्येति । सौहृदं प्रेम च । सख्यं हिताशंसनं च । मैत्री उपकारकत्वं च । दास्यं सेवकत्वं च तत्समाहारैकवचनम् । तस्य तत्सम्बन्धिनो मे मम स्यात् न तु विभूतिः" इत्येतत् ।
अत्र नवविधायां साध्यत्वात् प्रेमा नान्तर्भाव्यते । मैत्री तु सख्य एवान्तर्भाव्येति दास्यसख्ये द्वे एव गृहीते ।
अत्र च ताभ्यां कर्मार्पणविश्वासौ न व्याख्यातौ — साक्षाद्भक्तित्वाभावात् । कर्मार्पणस्य फलं भक्तिर्विश्वासश्च भक्त्यभिनिवेशहेतुरितीह पूर्वमुक्तम् । तच्च भगवद्विषयहिताशंसनमयं सख्यं भगवत्कृतहिताशंसनस्य नित्यत्वात् तेन सह तस्य नित्यसहवासाच्च । भजनविशेषेणापि विशिष्टं सम्पादयितुं नातिदुष्करं स्यादित्याह (भा० ७।७।३८) —

कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत् सतः ।
स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ९८९ ॥

छिद्रवदाकाशवदलिप्तत्वेन सदा वर्तमानस्य । नातिप्रयासे हेतुः — सर्वेषां देहिनां यः स्व आत्माशुद्धं स्वरूपं तस्य सामान्यतः सर्वत्र निर्विशेषतयैव सखा । यथावसरं बहिरन्तःकरणविषयादिलक्षणमायिक्या निजप्रेमादिलक्षणामायिक्याश्च सम्पत्तेर्दानेन हिताशंसी यस्तस्य हरेः । तस्मादारोपितानां नश्वराणां विषयाणां जायापत्यादीनामुपार्जनैः किमिति ॥ श्रीप्रह्लादोऽसुरबालकान् ॥

३०७ । तद् यथा (भा० ९।४।६६) —

मयि निर्बद्धहृदयाः साधवः समदर्शिनः ।
वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ ९९० ॥

अत्र दृष्टान्तेनांशतः सख्यात्मिका भक्तिर्लक्ष्यते ॥ श्रीवैकुण्ठो दुर्वाससम् ॥

३०८ । एवं च (भा० ४।१२।३७) —

शान्ताः समदृशः शुद्धाः सर्वभूतानुरञ्जनाः ।
यान्त्यञ्जसाच्युतपदमच्युतप्रियबान्धवाः ॥ ९९१ ॥

अच्युत एव प्रियबान्धवो येषाम् । अच्युतस्य पदं तत्सनाथं लोकम् । अच्युतशब्दावृत्त्या फलस्य केनाप्यंशेन व्यभिचारित्वं नेति दर्श्यते ॥ श्रीमैत्रेयः ॥

३०९ । अथ आत्मनिवेदनम् — तच्च देहादिशुद्धात्मपर्यन्तस्य सर्वतोभावेन तस्मिन्नेवार्पणम् । तत्कार्यं चात्मार्थचेष्टाशून्यत्वं तन्न्यस्तात्मसाधनसाध्यत्वं तदर्थैकचेष्टामयत्वं च । इदं ह्यात्मार्पणं गोविक्रयवत् विक्रीतस्य गोर्वर्तनार्थं विक्रीतवता चेष्टा न क्रियते । तस्य च श्रेयःसाधकस्तं क्रीतवानेव स्यात् । स च गौस्तस्यैव कर्म कुर्यात् न पुनर्विक्रीतवतोऽपीति ।
इदमेवात्मार्पणं श्रीरुक्मिणीवाक्ये “तन् मे भवान् खलु वृतः पतिरङ्ग जायामात्मार्पितश्च भवतोऽत्र विभो विधेहि” (भा० १०।५२।३९) इति ।
अथ केचिद् देहार्पणमेवात्मार्पणमिति मन्यन्ते । यथा भक्तिविवेके —

चिन्तां कुर्यान् न रक्षायै विक्रीतस्य यथा पशोः ।
तथार्पयन् हरौ देहं विरमेदस्य रक्षणात् ॥ ९९२ ॥

केचिच्छुद्धक्षेत्रज्ञार्पणमेव । यथा श्रीमदालबन्दारुस्तोत्रे —

वपुरादिषु योऽपि कोऽपि वा गुणतोऽसानि यथातथाविधः ।
तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः ॥ ९९३ ॥ इति ।

केचिच्च दक्षिणहस्तादिकमप्यर्पयन्तस्तेन तत्कर्ममात्रं कुर्वते न तु देहादिकर्मेत्यद्यापि दृश्यते ।
तदेतत् सर्वात्मकं सकार्यमात्मनिवेदनं यथा (भा० ९।४।१८-२०) —

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ ९९४ ॥
मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम् ।
घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥ ९९५ ॥
पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ।
कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः ॥ ९९६ ॥

चकार अर्पयामास । कृष्णपदारविन्दयोरित्यादिकमुपलक्षणं तत्सेवादीनाम् । लिङ्गं श्रीमूर्तिः । आलयस्तद्भक्तस्तन्मन्दिरादिः । श्रीमत्तुलस्यास्तत्पादसरोजसम्बन्धि यत् सौरभं तस्मिन् । तदर्पिते महाप्रसादान्नादौ । कामं सङ्कल्पं च दास्ये निमित्ते । कथं चकार ? यथा येन प्रकारेण उत्तमश्लोकजनाश्रया रतिः सा भवेदिति ।
अत्र सर्वथा तत्रैव सङ्घातात्मनिक्षेपः कृत इति वैशिष्ट्यापत्त्या स्मरणादिमयोपासनस्यैवात्मार्पणत्वम् ।
एवमेवोक्तम् "श्रद्धामृतकथायां मे शश्वन् मदनुकीर्तनम्" (भा० ११।१९।२०) इत्यारभ्य "एवं धर्मैर्मनुष्याणाम्" (भा० ११।१९।२४) इति ।
यथा स्मरणकीर्तनपादसेवनमयमुपासनमेव आगमोक्तविधिमयत्ववैशिष्ट्यापत्त्यार्चनमित्यभिधीयते ततो नाविविक्तत्वम् । स्नानपरिधानादिक्रिया चास्य भगवत्सेवायोग्यत्वायैवेति तत्रापि नात्मार्पणभक्तिहानिरित्यनुसन्धेयम् ।
एतदात्मार्पणं श्रीबलावपि स्फुटं दृश्यते । उदाहृतं चेदमात्मार्पणम् "धर्मार्थकामः" (भा० ७।६।२६) इत्यादिना श्रीप्रह्लादमते ।
"मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा" (भा० ११।२९।३४) इत्यादिना श्रीभगवन्मतेऽपि ।
तदेतदात्मनिवेदनं भावं विना भाववैशिष्ट्येन च दृश्यते । पूर्वं यथा "मर्त्यो यदा" इत्यादि । उत्तरं यथैकादश एव "दास्येनात्मनिवेदनम्" (भा० ११।११।३५) इति । यथा च रुक्मिणीवाक्ये "आत्मार्पितश्च भवतः" (भा० १०।५२।३९) इति ॥ श्रीशुकः ॥

३१० । तदेवं वैधी भक्तिर्दर्शिता । अस्याश्चोक्तानामङ्गानामनुक्तानां च कुत्रचित् कस्याप्यङ्गस्यान्यत्र तु तदितरस्य यन्महिमाधिक्यं वर्ण्यते तत्तच्छ्रद्धाभेदेन तत्तत्प्रभावोल्लासापेक्षयेति न परस्परविरुद्धत्वम् । अधिकारिभेदेन ह्यौषधादीनामपि तादृशत्वं दृश्यते ।
अथ रागानुगा । तत्र विषयिणः स्वाभाविको विषयसंसर्गेच्छातिशयमयः प्रेमा रागः । यथा चक्षुरादीनां सौन्दर्यादौ । तादृश एवात्र भक्तस्य श्रीभगवत्यपि राग इत्युच्यते ।
स च रागो विशेषणभेदेन बहुधा दृश्यते "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" (भा० ३।२५।३८) इत्यादौ ।

तत्र प्रियो यथा तदीयप्रेयसीनाम् । आत्मा परब्रह्मरूपः श्रीसनकादीनाम् । सुतः श्रीव्रजेश्वरादीनाम् । सखा श्रीश्रीदामादीनाम् । गुरुः श्रीप्रद्युम्नादीनाम् । कस्यापि "भ्राता" कस्यापि "मातुलेयः" कस्यापि "वैवाहिकः" इत्यादिरूपः स एक एव तेषु बहुप्रकारत्वेन सुहृदः सम्बन्धिनाम् । दैवमिष्टं तदीयसेवकानां श्रीदारुकप्रभृतीनामिति प्रसिद्धम् ।

अत्र श्रीमत्यां मोहिन्यां यः खलु रुद्रस्य भावो जातः स तु नाङ्गीकृतोऽनुक्तत्वात् । तस्य मायामोहिततयैव तादृशभावाभ्युपगमाच्च ।

तदेवं तत्तदभिमानलक्षणभावविशेषेन स्वाभाविकरागस्य वैशिष्ट्ये सति तत्तद्रागप्रयुक्ता श्रवणकीर्तनस्मरणपादसेवनवन्दनात्मनिवेदनप्राया भक्तिस्तेषां रागात्मिका भक्तिरित्युच्यते । तस्याश्च साध्यायां रागलक्षणायां भक्तिगङ्गायां तरङ्गरूपत्वात् साध्यत्वमेवेति न तु साधनप्रकरणेऽस्मिन् प्रवेशः । अतो रागानुगा कथ्यते ।

यस्य पूर्वोक्ते रागविशेषे रुचिरेव जातास्ति न तु रागविशेष एव स्वयं तस्य तादृशरागसुधाकरकराभाससमुल्लसितहृदयस्फटिकमणेः शास्त्रादिश्रुतासु तादृश्या रागात्मिकाया भक्तेः परिपाटीष्वपि रुचिर्जायते । ततस्तदीयं रागं रुच्यानुगच्छन्ती सा रागानुगा तस्यैव प्रवर्तते ।

एषैवाविहितेति केषाञ्चित् सञ्ज्ञा रुचिमात्रप्रवृत्त्या विधिप्रयुक्तत्वेनाप्रवृत्तत्वात् । न च वक्तव्यं विध्यनधीनस्य न सम्भवति भक्तिरिति (भा० २।१।७) —

> प्रायेण मुनयो राजन् निवृत्ता विधिषेधतः ।
> नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥ ९९७ ॥

इत्यत्र श्रूयते ।

ततो विधिमार्गभक्तिर्विधिसापेक्षेति सा दुर्बला । इयं तु स्वतन्त्रैव प्रवर्तते इति प्रबला च ज्ञेया । अत एवास्या जन्मलक्षणं भक्तिव्यतिरेकेणान्यत्रानभिरुचित्वमित्याद्यपि ज्ञेयं यथोक्तं तृतीये श्रीविदुरेण भगवत्कथारुचिमुपलक्ष्य (भा० ३।५।१३) —

> सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः ।
> हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखाप्ययमाशु धत्ते ॥ ९९८ ॥ इति ।

सा पूर्वोक्ता कथागृहीता मतिस्तद्रुचिरित्यर्थः । विधिनिरपेक्षत्वादेव पूर्वाभ्यां दास्यसख्याभ्यामेतदीययोस्तयोर्भेदश्च ज्ञेयः । एवमेवोक्तम् "तन् मन्येऽधीतमुत्तमम्" (भा० ७।५।२४) इति ।

अत एव विध्युक्तक्रमोऽपि नास्यामत्यादृतः । किन्तु रागात्मिकाश्रुतक्रम एव ।

तत्र रागात्मिकायां रुचिर्यथा (भा० ११।८।३५) —

> सुहृत् प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ।
> तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥ ९९९ ॥

अत्र स्वाभाविकसौहृद्यादिधर्मैस्तस्मिन्नेव स्वाभाविकपतित्वं स्थापयित्वा परस्यौपाधिकपतित्वमित्यभिप्रेतम् । अन्यत्र "पत्यावेकत्वं सा गता यस्माच् चरुमन्त्राहुतिव्रता" इति छान्दोग्यपरिशिष्टानुसारेण कृतिममेवात्मत्वम् । तस्मिन् परमात्मनि तु स्वभावत एवेत्यात्मशब्दस्याप्यभिप्रायः ।
एवं यद्यपि तस्मिन् पतित्वमनाहार्यमेवास्ति तथापि आत्मनैव मूल्यभूतेनैव तं विशेषतः क्रीत्वा यथान्यापि कन्या विवाहात्मकेन स्वात्मसमर्पणेन कञ्चित् पतित्वेनोपादत्ते तथा भावेनाश्रित्यानेन परममनोहररूपेण तेन सह रमे रमा लक्ष्मीर्यथा । तदेवं तस्याः पिङ्गलायाः स्वरुचिर्द्योतिता ॥

३११ । रागानुगायां प्रवृत्तिरपीदृशी (भा० ११।८।४०) —

> सन्तुष्टा श्रद्दधत्येतद् यथालाभेन जीवती ।
> विहराम्यमुनैवाहमात्मना रमणेन वै ॥ १००० ॥

अमुनेति भावगर्भरमणेन सह । आत्मना मनसैव तावद् विहरामि । रुचिप्रधानस्य मार्गस्यास्य मनःप्रधानत्वात् तत्प्रेयसीरूपेणासिद्धायास्तादृशभजने प्रायो मनसैव युक्तत्वात् । अनेन श्रीमत्प्रतिमादौ तादृशीनामप्यौद्धत्यं परिहृतम् । एवं पितृत्वादिभावेष्वप्यनुसन्धेयम् ॥ श्रीपिङ्गला ॥

३१२ । एवं प्रेयसीत्वाभिमानमयी दर्शिता । एषा ब्रह्मवैवर्ते कामकलायामपि दृष्टा । सेवकत्वाद्यभिमानमय्यां रुचिभक्तिश्चान्यत्र ज्ञेया "तस्मादमूस्तनुभृताम्" इत्यादौ "उपनय मां निजभृत्यपार्श्वम्" (भा० ७।९।२४) इति श्रीप्रह्लादवचनवत् ।
यथा श्रीनारदपञ्चरात्रादौ —

> कदा गम्भीरया वाचा श्रिया युक्तो जगत्पते ।
> चामरव्यग्रहस्तं मामेवं कुर्विति वक्ष्यसि ॥ १००१ ॥ इति ।

यथा स्कान्दे सनत्कुमारप्रोक्तसंहितायां प्रभाकरराजोपाख्याने —

> अपुत्रोऽपि स वै नैच्छत् पुत्रं कर्मानुचिन्तयन् ।
> वासुदेवं जगन्नाथं सर्वात्मानं सनातनम् ॥ १००२ ॥
> अशेषोपनिषद्वेद्यं पुत्रीकृत्य विधानतः ।
> अभिषेचयितुं राजा स्वराज्य उपचक्रमे ॥ १००३ ॥
> न पुत्रमभ्यर्थितवान् साक्षाद् भूताज् जनार्दनात् ॥ १००४ ॥

अग्रे भगवद्दत्तवरश्च "अहं ते भविता पुत्रः" इत्यादि ।
अत एवोक्तं श्रीनारायणव्यूहस्तवे —

पतिपुत्रसुहृद्भ्रातृपितृवन् मातृवद्धरिम् ।
ये ध्यायन्ति सदोद्युक्तास्तेभ्योऽपीह नमो नमः ॥ १००५ ॥

अत्र पत्यादिवदिति ध्येयस्य पितृवदिति ध्यातुर्विशेषणं ज्ञेयम् । तथा मातृवदिति वतिप्रत्ययेन प्रसिद्धतन्मातृजनाभेदभावना नैवाङ्गीक्रियते किन्तु तदनुगतभावनैव । एवं पितृभावादावपि ज्ञेयम् । अन्यथा भगवत्यहङ्ग्रहोपासनावत् तेष्वपि दोषः स्यात् ।
तथा ध्यायन्तीति पूर्वोक्तं मनः प्रधानत्वमेवोरीकृतम् । अपिशब्देन तत्तद्रागसिद्धानां कैमुत्यमाक्षिप्यते ।
ननु "चोदनालक्षणोऽर्थो धर्मः" इत्यनेन पूर्वमीमांसायां विधिनैवापूर्वं जायत इति श्रूयते । तथा "श्रुतिस्मृतिपुराणोक्तपञ्चरात्रविधिं विना" इत्यादिना यामले श्रुत्यादेरेकतरोक्तक्रमनियमं विना दोषः श्रूयते ।
तथा —

श्रुतिस्मृती ममैवाज्ञे यस्त उल्लङ्घ्य वर्तते ।
आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णवः ॥ १००६ ॥

इत्यत्र श्रुत्याद्युक्तावश्यकक्रियानिषेधयोरुल्लङ्घनं वैष्णवत्वव्याघातकं श्रूयते ।
कथं तर्हि विधिनिरपेक्षया तया सिद्धिः ?
उच्यते — श्रीभगवन्नामगुणादिषु वस्तुशक्तेः सिद्धत्वान् न धर्मवद् भक्तेश्चोदनासापेक्षत्वम् । अतो ज्ञानादिकं विनापि फललाभो बहुत्र श्रुतोऽस्ति । चोदना तु यस्य स्वतःप्रवृत्तिर्नास्ति तद्विषयैव । तथा क्रमविधिश्च तद्विषयः । तस्मिन्नेव नानाविक्षेपवति रुच्यभावेन रागात्मिकभक्तिशैलीमनभिजानति सत्यामपि "धावन् निमील्य वा नेत्रे" (भा० ११।२।३५) इत्यादिन्यायेन यथाकथञ्चिदनुष्ठानतः सिद्धौ सुष्ठु वर्त्मप्रवेशाय क्रमशश्चित्ताभिनिवेशाय च मर्यादारूपः स निर्मीयते ।
अन्यथा सन्ततत‌द्भक्त्युन्मुखताकरतादृशरुच्यभावान् मर्यादानभिपत्तेश्चाध्यात्मिकादिभिरुत्पातैर्विहन्यते च स इति न तु स्वयं प्रवृत्तिमत्यपि मर्यादानिर्माणं तस्य रुच्यैव भगवन्मनोरमरागात्मिकाक्रमविशेषाभिनिवेशात् । तदुक्तं स्वयमेव "ज्ञात्वाज्ञात्वाथ ये वै माम्" (भा० ११।११।३३) इत्यादिना ।
रागात्मिकभक्तिमतां दुरभिसन्धिनाप्यनुकरणमात्रेण तादृशत्वप्राप्तिः श्रूयते यथा धात्रीत्वानुकरणेन पूतनायाः । तदुक्तम् "सद्वेशादिव पूतनापि सकुला" (भा० १०।१४।३५) इति । किमुत तदीयरुचिमद्भिस्तादृशनिरन्तरसम्यग्भक्त्यनुष्ठानेन । तदुक्तम् (भा० १०।६।३५–३६) —

पूतना लोकबालघ्नी राक्षसी रुधिराशना ।
जिघांसयापि हरये स्तनं दत्त्वाप सद्गतिम् ॥ १००७ ॥
किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने ।
यच्छन् प्रियतरं किं नु रक्तास्तन्मातरो यथा ॥ १००८ ॥ इति ।

अत उक्तम् “न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः” (भा० ११।२०।३६) इति ।
एकान्तित्वं खलु भक्तिनिष्ठा । सा रुच्यैव वा शास्त्रविध्यादरेणैव वा जायते ।
ततो रुचेर्विरलत्वादुत्तराभावेनापि यदैकान्तिकीत्वं तत् तस्यैकान्तिमानिनो दम्भमात्रमित्यर्थः । ततस्तदनुद्यैव निन्दा “श्रुतिस्मृतिपुराण” इत्यादिना न तु रुचिभावेऽपि तन्निन्दा युक्ता “पूतना” इत्यादेः ।
तथा चोक्तं पाद्मोत्तरखण्डे—

स्वातन्त्र्यात् क्रियते कर्म न च वेदोदितं महत् ।
विनैव भगवत्प्रीत्या ते वै पाषण्डिनः स्मृताः ॥ १००९ ॥ इति ।

प्रीतिरत्र तादृशरुचिः । तदेवमत्र शास्त्रानादरस्यैव निन्दा । न तु तदज्ञानस्य “धावन् निमील्य वै” इत्यादेः ।
गौतमीयतन्त्रे त्विदमप्युक्तम्—

न जपो नार्चनं नैव ध्यानं नापि विधिक्रमः ।
केवलं सन्ततं कृष्णचरणाम्भोजभाविनाम् ॥ १०१० ॥

अजाततादृशरुचिना तु सद्विशेषादरमात्रादृता रागानुगापि वैधीसंवलितैवानुष्ठेया तथा लोकसङ्ग्रहार्थं प्रतिष्ठितेन जाततादृशरुचिना च । अत्र मिश्रत्वे च यथायोग्यं रागानुगयैकीकृत्यैव वैधी कर्तव्या ।
केचिदष्टादशाक्षरध्यानं गोदोहनसमयवंशीवाद्यसमाकृष्टतत्तत्सर्वमयत्वेन भावयन्ति यथा चैके “तादृशमुपासनं साक्षाद् व्रजजनविशेषायैव मह्यं श्रीगुरुचरणैर्मदभीष्टविशेषसिद्ध्यर्थमुपदिष्टं भावयामि साक्षात् तु श्रीव्रजेन्द्रनन्दनं सेवमान एवास” इति भावयन्ति ।
अथ “श्रुतिस्मृती ममैवाज्ञे” इत्यादिनिन्दितमात्रस्वावश्यकक्रियानिषेधयोरुल्लङ्घनं द्विविधम् । तौ हि धर्मशास्त्रोक्तौ भक्तिशास्त्रोक्तौ चेति । तत्र भगवद्भक्तिविश्वासेन दौःशील्येन वा पूर्वयोरकरणप्रत्यासत्तौ न वैष्णवभावाद् भ्रंशः ।
“देवर्षिभूताप्तनृणाम्” (भा० ११।५।४१) इत्याद्युक्तेः “अपि चेत् सुदुराचारः” (गीता ९।३०) इत्याद्युक्तेश्च ।
तादृशरुचिमति तु तयैव रुच्या द्विष्टत्वादपुनर्भवाद्यानन्दस्यापि वाञ्छा नास्ति किमुत परमघृणास्पदस्य विकर्मानन्दस्य । अतस्तत्र स्वत एव न प्रवृत्तिः । प्रमादादिना कदाचिज् जातं चेद् विकर्म तत्क्षणादेव नश्यत्यपि । उक्तं च “विकर्म यच् चोत्पतितं कथञ्चिद् धुनोति सर्वं हृदि सन्निविष्टः” (भा० ११।५।४२) इति ।
अथ यदि वैष्णवशास्त्रोक्तौ तौ तर्हि विष्णुसन्तोषैकप्रयोजनावेव भवतः । तयोश्च तादृशत्वे श्रुते सति तदीयरागरुचिमतः स्वत एव प्रवृत्त्यप्रवृत्ती स्याताम्—तत्सन्तोषैकजीवनत्वात् प्रीतिजातेः ।
अत एव न तत्र स्वानुगम्यमानरागात्मकसिद्धभक्तविशेषेण कृतत्वाकृतत्वयोरनुसन्धानं चापेक्ष्यं स्यात् किन्तु तत्कृतत्वे सति विशेषेणाग्रहो भवतीत्येव विशेषः ।

अत्र क्वचिच्छास्त्रोक्तक्रमविध्यपेक्षा च रागरुच्यैव प्रवर्तितेति रागानुगान्तःपात एव । ये च श्रीगोकुलादिविराजिरागात्मिकानुगास्तत्परास्ते तु श्रीकृष्णक्षेमतत्संसर्गान्तरायाभावादिकाम्यात्मकतदभिप्रायरीत्यैव वैष्णवलौकिकधर्मानुष्ठानं कुर्वन्ति ।
अत एव रागानुगायां रुचेरेव सद्धर्मप्रवर्तकत्वात् "श्रुतिस्मृती ममैवाज्ञे" इत्येतद्वाक्यस्य न तद्वर्त्मभक्तिविषयत्वम् "अपि चेत् सुदुराचारः" (गीता० ९।३०) इत्यादिविरोधान् न च विधिवर्त्मभक्तिविषयत्वं किन्तु बाह्यशास्त्रनिर्मितबुद्धर्षभदत्तात्रेयादिभजनवर्त्मविषयत्वमेव ।
तथोक्तम् —

वेदधर्मविरुद्धात्मा यदि देवं प्रपूजयेत् ।
स याति नरकं घोरं यावदाहूतसम्प्लवम् ॥ १०११ ॥ इति ।

रागानुगायां विध्यप्रवर्तितायामपि न वेदबाह्यत्वं वेदवैदिकप्रसिद्धैव सा — तत्र तत्र रुचित्वात् । वेदेषु बुद्धादीनां तु वर्णनं वेदबाह्यं विरुद्धत्वेनैव यथा (भा० १।३।२४) —

ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति ॥ १०१२ ॥ इत्यादि ।

तस्माद् भवत्येव रागानुगा समीचीना । तथा वैधीतोऽप्यतिशयवती च सा । मर्यादावचनं ह्यावेशार्थमेवेति दर्शितम् । स पुनरावेशो यथा रुचिविशेषलक्षणमानसभावेन स्यात् न तथा विधिप्रेरणया स्वारसिकमनोधर्मत्वात् तस्य । तत्र चास्तां तावदनुकूलभावः परमनिषिद्धेन प्रतिकूलभावेनाप्यावेशो झटिति स्यात् ।
तदावेशसामर्थ्येन प्रातिकूल्य दोषहानिः स्यात् । सर्वानर्थनिवृत्तिश्च स्यादिति । भावमार्गस्य बलवत्त्वे दृष्टान्तोऽपि दृश्यते । तत्र यद्यनुकूलभावः स्यात् तदा परमैकान्तिसाध्य एवासौ ।
अथ भावमार्गसामान्यस्य बलवत्त्वं दर्शयितुं प्रकरणमुत्थाप्यते । श्रीयुधिष्ठिर उवाच (भा० ७।१।१५) —

अहो अत्यद्भुतं ह्येतद् दुर्लभैकान्तिनामपि ।
वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १०१३ ॥

एकान्तिनां परमज्ञानिनामपि ॥

३१३ । यतस्तस्य सा न सम्भवति (भा० ७।१।१६) —

एतद् वेदितुमिच्छामः सर्व एव वयं मुने ।
भगवन्निन्दया वेणो द्विजैस्तमसि पातितः ॥ १०१४ ॥

तमसि नरके — बहुनरकादिभोगानन्तरमेव पृथुजन्मप्रभावोदयेन तस्य वामनपुराणे सद्ग-तिश्रवणात् ॥

३१४ । एषः (भा० ७।१।१७) —

दमघोषसुतः पाप आरभ्य कलभाषणात् ।
सम्प्रत्यमर्षी गोविन्दे दन्तवक्रश्च दुर्मतिः ॥ १०१५ ॥

स्पष्टम् ॥

३१५ । तत्रोत्तरम् श्रीनारद उवाच यथा — अहो भगवन्निन्दकस्य नरकपातेन भाव्यमिति वदतस्तव कोऽभिप्रायः ? भगवत्पीडाकरत्वाद्वा तदभावेऽपि सुरापानादिवन् निषिद्धनि-न्दाश्रवणाद्वा ?
तत्र तावद् विमूढैर्जनैर्निन्दादिकं प्राकृतान् तमआदिगुणानुद्दिश्यैव प्रवर्त्यते । ततः प्रकृ-तिपर्यन्ताश्रयस्य तत्कृतनिन्दादेरप्राकृतगुणविग्रहादौ तस्मिन् प्रवृत्तिर्नास्त्येव । न च जीववत् प्रकृतिपर्यन्ते वस्तुजाते भगवदभिमानोऽस्ति । ततश्च तेन तस्य पीडापि नास्त्येव ।
तदेतदाह सार्द्धैस्त्रिभिः (भा० ७।१।२२) —

निन्दनस्तवसत्कारन्यक्कारार्थं कलेवरम् ।
प्रधानपरयो राजन्नविवेकेन कल्पितम् ॥ १०१६ ॥

निन्दनं दोषकीर्तनम् । न्यक्कारस्तिरस्कारः । निन्दनस्तुत्यादिज्ञानार्थं प्रधानपुरुषयोरविवे-केन जीवानां कलेवरं कल्पितं रचितम् ॥

३१६ । ततश्च (भा० ७।१।२३–२४) —

हिंसा तदभिमानेन दण्डपारुष्ययोर्यथा ।
वैषम्यमिह भूतानां ममाहमिति पार्थिव ॥ १०१७ ॥
यन्निबद्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः ।
तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः ।
परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥ १०१८ ॥

इह प्राकृते लोके । यथा तत्कलेवराभिमानेन भूतानां ममाहमिति वैषम्यं भवति यथा तत्कृताभ्यां दण्डपारुष्याभ्यां ताडननिन्दाभ्यां निमित्तभूताभ्यां हिंसा च भवति यथा यस्मिन् निबद्धोऽभिमानस्तस्य देहस्य वधात् प्राणिनां वधश्च भवति तथा यस्याभिमानो नास्तीत्यर्थः । अस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते ? अपि तु न केनापीत्यर्थः ।

तथाभिमानाभावे हेतुः — कैवल्यात् “देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्” (भा० ७।१।३४) इति कैमुत्यादिप्राप्तशुद्धत्वात् तादृशनिन्दाद्यगम्यशुद्धसच्चिदानन्दविग्रहत्वादित्यर्थः ।
तस्य तदगम्यत्वं च “नाहं प्रकाशः सर्वस्य योगमायासमावृतः” (गीता ७।२५) इति श्रीभगवद्गीतातः ।
तादृशवैलक्षण्ये हेतुः — अखिलानामात्मभूतस्य । तत्र हेतुः — परस्य प्रकृतिवैभवसङ्गरहितस्य । हिंसाया अविषयत्वे हेत्वन्तरम् — दमकर्तुः परमाश्चर्यानन्तशक्तित्वात् सर्वेषामेव शिक्षाकर्तुरिति ॥

३१७ । तदेवं यस्माद् भगवतो निन्दादिकृतं वैषम्यं नास्ति तस्माद् येन केनाप्युपायेन “सकृद् यदङ्गप्रतिमान्तराहिता” (भा० १०।१२।३९) इत्यादिवत् तदाभासमपि ध्यायतस्तदावेशात् तत्र वैरेणापि ध्यायतस्तदावेशेनैव निन्दादिकृतपापस्यापि नाशात् तत्सायुज्यादिकं युक्तमित्याशयेनाह — तस्मादित्यादिभिः ।
तथा हि (भा० ७।१।२५) —

> तस्माद् वैरानुबन्धेन निर्वैरेण भयेन वा ।
> स्नेहात् कामेन वा युञ्ज्यात् कथञ्चिन् नेक्षते पृथक् ॥ १०१९ ॥

युञ्ज्यादिति स्नेहकामादीनां विधातुमशक्यत्वात् सम्भावनायामेव लिङ् । वैरानुबन्धादीनामेकतरेणापि युञ्ज्याद् ध्यायेच् चेत् तदा भगवतः पृथङ् नेक्षते तदाविष्टो भवतीत्यर्थः । वैरानुबन्धो वैरभावाविच्छेदः । निर्वैरो वैराभावमात्रमौदासीन्यमुच्यते । तेन कामादिराहित्यमप्यायाति वैरादिभावराहित्यमित्यर्थः । तेन वा वैरादिभावराहित्येन युञ्ज्यात् विहितत्वमात्रबुद्ध्या ध्यायेत् ध्यानोपलक्षितं भक्तियोगं कुर्यादित्यर्थः । स्नेहः कामातिरिक्तः परस्परमकृत्रिमः प्रेमविशेषः । स तु साधके तदभिरुचिरेव ॥

३१८ । तदेवं सर्वेषां तदावेश एव फलमिति स्थिते झटिति तदावेशसिद्धये तेषु भावमयमार्गेषु निन्दितेनापि वैरेण विधिमय्या भक्तेर्न साम्यमित्याह (भा० ७।१।२६) —

> यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् ।
> न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ १०२० ॥

वैरानुबन्धेनेति भयस्याप्युपलक्षणम् । यथा शैघ्र्येण तन्मयतां तदाविष्टतां भक्तियोगेन विहितत्वमात्रबुद्ध्या क्रियमाणेन तु न तथा ॥

३१९ । आस्तां तादृशवस्तुशक्तियुक्तस्य तेषु प्रकाशमानस्य भगवतो भगवद्विग्रहाभासस्य वा वार्ता प्राकृतेऽपि तद्भावमात्रस्य भाव्यावेशफलं महद् दृश्यत इति सदृष्टान्तं तदेव प्रतिपादयति (भा० ७।१।२७-२८) —

कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् ।
संरम्भभययोगेन विन्दते तत्स्वरूपताम् ॥ १०२१ ॥
एवं कृष्णे भगवति मायामनुज ईश्वरे ।
वैरेण पूतपाप्मानस्तमापुरनुचिन्तया ॥ १०२२ ॥

संरम्भो द्वेषो भयं च ताभ्यां योगस्तदावेशस्तेन तत्स्वरूपतां तस्य स्वमात्मीयरूपमाकृतिर्यत्र तत् ताम् तत् सारूप्यमित्यर्थः । एवमिति एवमपीत्यर्थः । नराकृतिपरब्रह्मत्वात् माययैव प्राकृतमनुजतया प्रतीयमाने ।
ननु कीटस्य पेशस्कृद्द्वेषे पापं न भवति । तत्र तु तत् स्यादित्याशङ्क्याह — वैरेण यानुचिन्ता तदावेशस्तयैव पूतपाप्मानस्तद्ध्यानावेशस्य तादृक्शक्तित्वादिति भावः ॥

३२० । न च शास्त्रविहितेनैव भगवद्धर्मेण सिद्धिः स्यात् न च तदविहितेन कामादिनेति वाच्यम् । यतः (भा० ७।१।२९) —

कामाद् द्वेषाद् भयात् स्नेहाद् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ १०२३ ॥

यथा विहितया भक्त्या ईश्वरे मन आवेश्य तद्गतिं गच्छन्ति तथैवाविहितेनापि कामादिना बहवो गता इत्यर्थः । तदघं तेषु कामादिषु मध्ये यद्द्वेषभययोरघं भवति तद्धित्वैव । भयस्यापि द्वेषसम्वलितत्वादघोत्पादकत्वं ज्ञेयम् ।
अत्र केचित् काममप्यघं मन्यन्ते । तत्रेदं विचार्यते — भगवति काम एव केवलः पापावहः । किं वा पतिभावयुक्तः । अथवा उपपतिभावयुक्त इति ?
स एव केवल इति चेत् स किं द्वेषादिगणपातित्वात् तद्वत् स्वरूपेणैव वा । परमशुद्धे भगवति यदधरपानादिकं यच्च कामुकत्वाद्यारोपणं तेनातिक्रमेण वा पापश्रवणेन वा ?
नाद्येन (भा० १०।२९।१३) —

उक्तं पुरस्तादेतत् ते चैद्यः सिद्धिं यथा गतः ।
द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १०२४ ॥

इत्यत्र द्वेषादेर्न्यक्कृतत्वात् तस्य तु स्तुतत्वात् ।
अतश्च "प्रियाः" इति स्नेहवत् कामस्यापि प्रीत्यात्मकत्वेन तद्वदेव न दोषः । तादृशीनां कामो हि प्रेमैकरूपः "यत् ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु" (भा० १०।३१।१९) इत्यादावतिक्रम्यापि स्वसुखं तदानुकूल्य एव तात्पर्यदर्शनात् । सैरिन्ध्र्यास्तु भावो रिरंसाप्रायत्वेन श्रीगोपिकानामिव केवलतत्तात्पर्याभावात् तदपेक्षयैव निन्द्यते न तु स्वरूपतः "सानङ्गतप्तकुचयोः" इत्यादौ "अनन्तचरणेन रुजो मृजन्ती" इति "परिरभ्य कान्तमानन्दमूर्तिम्" (भा० १०।४८।७) इति कार्यद्वारा तत्स्तुतेः ।
तत्रापि "सहोष्यतामिह प्रेष्ठ" (भा० १०।४८।९) इत्यत्र प्रीत्यभिव्यक्तेश्च ।
अत एव (भा० १०।४८।८) —

सैवं कैवल्यनाथं तं प्राप्य दुष्प्राप्यमीश्वरम् ।
अङ्गरागार्पणेनाहो दुर्भगेदमयाचत ॥ १०२५ ॥ इति ।

भा० १०।४८।११ —

दुराराध्यं समाराध्य विष्णुं सर्वेश्वरेश्वरम् ।
यो वृणीते मनोग्राह्यमसत्त्वात् कुमनीष्यसौ ॥ १०२६ ॥

इति चैवं योजयन्ति । कैवल्यमेकान्तित्वं तेन यो नाथः सेवनीयस्तम् पुरा तादृशत्रिवक्रत्वादिलक्षणदौर्भाग्यवत्यपि । अहो आश्चर्ये । अङ्गरागार्पणलक्षणेन भगवद्धर्मांशेन कारणेन सम्प्रतीदम् "सहोष्यतामिह प्रेष्ठ दिनानि कतिचिन् मया रमस्व" (भा० १०।४८।९) इत्यादिलक्षणं वक्ष्यमाणं सौभाग्यमयाचतेति ।
अतः (भा० १०।८०।२५) —

किमनेन कृतं पुण्यमवधूतेन भिक्षुणा ।
श्रिया हीनेन लोकेऽस्मिन् गर्हितेनाधमेन च ॥ १०२७ ॥

इति श्रीदामविप्रमुद्दिश्यान्तःपुरजनवचनवदेव तथोक्तिः ।
ननु कामुकी सा किमिति श्लाघ्यते ? तत्राह — दुराराध्यमिति । यो मनोग्राह्यं प्राकृतमेव विषयं वृणीते कामयत असावेव कुमनीषी । सा तु भगवन्तमेव कामयत इति परमसुमनीषिण्येवेति भावः । तदेवं तस्य कामस्य द्वेषादिगणान्तःपातित्वं परिहृत्य तेन पापावहत्वं परिहृतम् ।
अथ कामुकत्वाद्यारोपणाद्यधरपानादिरूपस्तत्र व्यवहारोऽपि नातिक्रमहेतुः । यतः "लोकवत् तु लीलाकैवल्यम्" (ब्र० सू० २।१।३३) इति न्यायेन लीला तत्र स्वभावत एव सिद्धा ।
तत्र च श्रीभूलीलादीभिस्तस्य तादृशलीलायाः श्रीवैकुण्ठादिषु नित्यसिद्धत्वेन स्वतन्त्रलीलाविनोदस्य तस्याभिरुचितत्वावगमात् तादृशलीलारसमोहस्वाभाविकं भगवत्ताद्यननुसन्धानमपि कामुकत्वादिमननमपि च तदभिरुचितत्वेनैवावगम्यते ।
तथा तत्प्रेयसीजनानामपि तत्स्वरूपशक्तिविग्रहत्वेन परमशुद्धरूपत्वात् ततो न्यूनत्वाभावाच्च तदधरपानादिकमपि नानुरूपं पूर्वयुक्त्या तदभिरुचितमेव च ।
न च प्राकृतवामाजने दोषः प्रसञ्जनीयः । तद्योग्यं तादृशं भावं स्वरूपशक्तिविग्रहत्वं च प्राप्यैव तदिच्छयैव तत्प्राप्तेः ।
अथ पापश्रवणेन च न पापावहोऽसौ कामः । तदश्रवणादेव । अतः पतिभावयुक्ते च तत्र सुतरां न दोषः प्रत्युत स्तुतिः श्रूयते । भा० १०।९०।२७ —

याः सम्पर्यचरन् प्रेम्णा पादसम्वाहनादिभिः ।
जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥ १०२८ ॥ इति ।

महानुभावमुनीनामपि तद्भावः श्रूयते । यथा श्रीमाध्वाचार्यधृतं कौर्मवचनम् —

अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे ।
भर्तारं च जगद्योनिं वासुदेवमजं विभुम् ॥ १०२९ ॥ इति ।

अत एव वन्दितम् "पतिपुत्रसुहृद्भ्रातृ" (नारायणव्यूहस्तवे) इत्यादिना ।
अथोपपतिभावेन न च पापावहोऽसौ "यत् पत्यपत्यसुहृदामनुवृत्तिरङ्ग" (भा० १०।२९।३२) इत्यादिना ताभिरेवोत्तरितत्वात् "गोपीनां तत्पतीनां च" (भा० १०।३३।३५) इत्यादिना श्रीशुकदेवेन च ।
"न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः" (भा० १०।३२।२२) इत्यत्र "निरवद्यसंयुजाम्" इत्यनेन स्वयं श्रीभगवता च ।
तादृशानामन्येषामपि तद्भावो दृश्यते । यथा पाद्मोत्तरखण्डवचनम् —

पुरा महर्षयः सर्वे दण्डकारण्यवासिनः ।
दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥ १०३० ॥
ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ।
हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात् ॥ १०३१ ॥ इति ।

अतः पुरुषेष्वपि स्त्रीभावेनोद्भवाद् भगवद्विषयत्वान् न प्राकृतकामदेवोद्भावितः प्राकृतः कामोऽसौ किन्तु "साक्षान् मन्मथमन्मथः" (भा० १०।३२।२) इति श्रवणादागमादौ तस्य कामत्वेनोपासनाच्च भगवदेकोद्भावितोऽप्राकृत एवासौ काम इति ज्ञेयम् ।
श्रीमदुद्धवादीनां परमभक्तानामपि च तच्छलाघा श्रूयते "एताः परं तनुभृतो भुवि गोपवध्वः" (भा० १०।४७।५८) इत्यादौ ।
किं बहुना ? श्रुतीनामपि तद्भावो बृहद्वामने प्रसिद्धः । यतस्तत्र श्रुतयोऽपि नित्यसिद्धगोपिकाभावाभिलाषिण्यस्तद्रूपेणैव तद्गणान्तःपातिन्यो बभूवुरिति प्रसिद्धिः ।
एतत् प्रसिद्धिसूचकमेवैतदुक्तं ताभिरेव (भा० १०।८७।२३) —

निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि यन्
मुनय उपासते तदरयोऽपि ययुः स्मरणात् ।
स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो
वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः ॥ १०३२ ॥ इति ।

विस्पष्टश्चायमर्थः । यद् ब्रह्माख्यं तत्त्वं शास्त्रदृष्ट्या प्रयासबाहुल्येन मुनय उपासते तदरयोऽपि यस्य स्मरणात् तदुपासनां विनैव ययुः । तथा स्त्रियः श्रीगोपसुभ्रुवस्ते तव श्रीनन्दनन्दनरूपस्योरगेन्द्रदेहतुल्यौ यौ भुजदण्डौ तत्र विषक्तधियः सत्यस्तवैवाङ्घ्रिसरोजसुधास्तदीयस्पर्शविशेषजातप्रेममाधुर्याणि ययुः । वयं श्रुतयोऽपि समदृशस्तत्तुल्यभावाः सत्यः समास्तादृशगोपिकात्वप्राप्त्या तत्साम्यमाप्तास्त एवाङ्घ्रिसरोजसुधा ययिम यातवत्य इत्यर्थः ।

अर्थवशाद् विभक्तिविपरिणामः । अङ्गीति सादरोक्तिः ।
अत्र तदरयोऽपि ययुः स्मरणादित्यनेन भावमार्गस्य झटित्यर्थसाधनत्वं दर्शितम् । "समदृशः" इत्यनेन रागानुगाया एव तत्र साधकतमत्वं व्यञ्जितम् । अन्यथा सर्वसाधनसाध्यविदुष्यः श्रुतयोऽन्यथैव प्रवर्तेरन् ।
तथा स्मरणपरयुग्मद्वयेऽस्मिन् स्वस्वयुग्मे प्रथमस्य मुख्यत्वं द्वितीयस्य गौणत्वं दर्शितम् । उभयत्राप्यपिशब्दसाहित्येनोत्तरत्र पाठादेकार्थताप्राप्तेः । अतः स्त्रिय इति नित्याः श्रीगोपिका एव ता ज्ञेयाः । तथैव श्रुतिभिरिति श्रीकृष्णनित्यधाम्नि ता दृष्टा इति बृहद्वामन एव प्रसिद्धम् ।
तदेवं साधु व्याख्यातम् "कामाद् द्वेषात्" (भा० ७।१।२९) इत्यादौ "तदघं हित्वा" इत्यत्र तेषु मध्ये द्वेषभययोर्यदघमित्यादि ॥

३२१ । अथ "बहवस्तद्गतिं गताः" (भा० ७।१।२९) इत्यत्र निदर्शनमाह (भा० ७।१।३०) —

> गोप्यः कामाद् भयात् कंसो द्वेषाच् चैद्यादयो नृपाः ।
> सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ॥ १०३३ ॥

गोप्य इति साधकचरीणां गोपीविशेषाणां पूर्वावस्थामेवावलम्ब्योच्यते — वयमिति । यथा श्रीनारदस्य हि "प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्" (भा० १।६।२९) इत्याद्युक्तरीत्या पार्षददेहत्वे सिद्धे तेन स्वयं वयमिति पूर्वावस्थामेवावलम्ब्योच्यते । तत्रैव वैधी भक्तिः ।
अधुना लब्धरागस्य तस्य "न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः" (भा० ११।२०।३६) "गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः" (भा० ११।१९।४५) इति न्यायेन विध्यनधीना रागात्मिकैव विराजत इति ।
अत एव "तद्गतिं गताः" इति तेषां फलप्राप्तेरप्यतीतत्वनिर्देशः । अत्र ता गोप्य इवाधुनिक्यश्च तद्गुणादिश्रवणेनैव तद्भावा भवेयुः ।
यथोक्तम् (भा० १०।९०।२६) —

> श्रुतमात्रोऽपि यः स्त्रीणां प्रसह्याकर्षते मनः ।
> उरुगायोरुगीतो वा पश्यन्तीनां च किं पुनः ॥ १०३४ ॥ इति ।

अथवा पार्षदचरस्यापि चैद्यस्यागन्तुकोपद्रवाभासनाशदर्शनेनैव साधकत्वनिर्देशः । सम्बन्धाद् यः स्नेहो रागस्तस्माद् वृष्णयो यूयं चेत्येकम् "तस्माद् वैरानुबन्धेन" (भा० ७।१।२५) इत्यादौ "पञ्चानाम्" (भा० ७।१।३१) इति वक्ष्यमाणानुरोधात् ।
उभयत्रापि सम्बन्धस्नेहयोर्द्वयोरपि विद्यमानत्वाच्च सम्बन्धग्रहणं रागस्यैव विशेषत्वज्ञापनार्थम् । गोपीवदत्रापि साधकचरा वृष्णिविशेषाः पाण्डवसम्बन्धिविशेषाश्च पूर्वावस्थामवलम्ब्य साधकत्वेन निर्दिष्टाः । अतः सम्बन्धजस्नेहोऽपि तदभिरुचिमात्रं ज्ञेयम् ।
भक्त्या विहितया । अस्या एव प्रतिलब्धत्वेन भावमार्गं निर्देष्टुमुपक्रान्तत्वात् ॥

३२२ । यदि द्वेषेणापि सिद्धिस्तर्हि वेणः किमिति नरके पातितः ? इत्याशङ्क्याह "कतमोऽपि न वेणः स्यात् पञ्चानां पुरुषं प्रति" (भा० ७।१।३१) इति ।
पुरुषं भगवन्तं प्रति लक्ष्यीकृत्य पञ्चानां वैरानुबन्धादीनां मध्ये वेणः कतमोऽपि न स्यात् । तस्य तं प्रति प्रासङ्गिकनिन्दामात्रात्मकं वैरं न तु वैरानुबन्धः । ततस्तीव्रध्यानाभावात् पापमेव तत्र प्रतिफलितमिति भावः । ततोऽसुरतुल्यस्वभावैरपि तस्मिन् स्वमोक्षार्थं वैरभावानुष्ठानसाहसं न कर्तव्यमित्यभिप्रेतम् । अत एव "ये वै भगवता प्रोक्ताः" (भा० ११।२।३४) इत्यादेरप्यतिव्याप्तिर्व्याहन्यते—अनभिप्रेतत्वेनाप्रोक्तत्वात् ॥

३२३ । यस्मादेवम् "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" (भा० ७।१।३१) इति । अत्रापि पूर्ववन् निवेशयेदिति सम्मतिमात्रं न विधिः ।
केनापि तेष्वप्युपायेषु युक्ततमेनैकेनेत्यर्थः । अहो यस्तादृशबहुप्रयत्नसाध्यवैधीभक्तिमार्गेण चिरात् साध्यते स एवाचिराद् भावविशेषमात्रेण तत्र च द्वेषादिनापि । तस्मादेवम्भूते परमसद्गुणस्वभावे तस्मिन् दूरेऽस्तु पामरजनभावस्य वैरस्य वार्ता को वाधम औदास्यमवलम्ब्य प्रीतिमपि न कुर्यादिति रागानुगायामेव तच्च युक्ततमत्वमङ्गीकृतं भवति ॥
श्रीनारदः श्रीयुधिष्ठिरम् ॥

३२४ । तदेवं भावमार्गसामान्यस्यैव बलवत्त्वेऽपि कैमुत्येन रागानुगायामेवाभिधेयत्वमाह (भा० ११।५।४८)—

> वैरेण यं नृपतयः शिशुपालशाल्वपौण्ड्रादयो गतिविलासविलोकनाद्यैः ।
> ध्यायन्त आकृतिधियः शयनासनादौ तद्भावमापुरनुरक्तधियां पुनः किम् ॥ १०३५ ॥

आकृतिधियस्तत्तदाकारा धीर्येषाम् । एवमेवोक्तं गारुडे—

> अज्ञानिनः सुरवरं समधिक्षिपन्तो यं पापिनोऽपि शिशुपालसुयोधनाद्याः ।
> मुक्तिं गताः स्मरणमात्रविधूतपापाः कः संशयः परमभक्तिमतां जनानाम् ॥ १०३६ ॥ इति ।

अतः "यथा वैरानुबन्धेन" (भा० ७।१।२६) इत्यत्र वैरानुबन्धस्य सर्वत आधिक्यं न योजनीयम् । यच्च (भा० ३।१६।३१)—

> मयि संरम्भयोगेन निस्तीर्य ब्रह्महेलनम् ।
> प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ॥ १०३७ ॥

इति जयविजयौ प्रति वैकुण्ठवचनम् ।
तदपि तदपराधाभासभोगार्थमेव संरम्भयोगाभासं विधत्ते—तत्प्राप्तेस्तयोः स्वाभाविकसिद्धत्वात् । युद्धलीलार्थमेव तत्प्रपञ्चनात् ।

अत्र द्वेषादावपि केचिद् भक्तित्वं मन्यन्ते तदसत् भक्तिसेवादिशब्दानामानुकूल्य एव प्रसिद्धेः । वैरे तद्विरोधित्वेन तदसिद्धेश्च । पाद्मोत्तरखण्डे च भक्तिद्वेषादीनां च भेदोऽवगम्यते —

योगिभिर्दृश्यते भक्त्या नाभक्त्या दृश्यते क्वचित् ।
द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्दनः ॥ १०३८ ॥ इत्यत्र च ।

ननु "मन्येऽसुरान् भागवतान्" (भा० ३।२।२४) इत्यादौ श्रीमदुद्धववाक्ये तेषामपि भागवतत्वं निर्दिश्यते ?
मैवं यतो "मन्ये" इत्यनेनोत्प्रेक्षावगमात् न स्वयं भागवतत्वं तत्रास्तीत्येवं सिध्यतीति । सा चोत्प्रेक्षा तेन तच्छोकौत्कण्ठ्यवता केवलदर्शनभाग्यांशेनैव रचिता युक्तैव । यथा "हन्त वयमेव तद्बहिर्मुखाः । येषामन्तिमसमये तन्मुखचन्द्रमसो दर्शनसम्भावनापि न विद्यते । येभ्यश्चासुरा अपि भागवताः । ये खलु तदानीं तन्मुखचन्द्रमसो दर्शनसौभाग्यं प्रापुः" इति ।
तस्मान् न द्वेषादौ कथञ्चिदपि भक्तित्वम् ॥ श्रीनारदः श्रीवसुदेवम् ॥

३२५ । तदेवं रागानुगा साधिता । सा च श्रीकृष्ण एव मुख्या "गोप्यः कामात्" (भा० ७।१।३०) इत्यादिना तस्मिन्नेव दर्शितत्वात् । दैत्यानामपि द्वेषेणापि तस्मिन्नेवावेशलाभदर्शनात् सिद्धिप्राप्तेश्च । नान्यत्र तु कुत्राप्यंशिन्यंशे वा । अत एवोक्तम् "तस्मात् केनाप्युपायेन मनः कृष्णे" (भा० ७।१।३१) इत्यादि ।
अतस्तादृशझटित्यावेशहेतूपासनालाभादेव स्वयमेकादशे वैधोपासना स्वस्मिन् नोक्ता किन्त्वन्यत्र चतुर्भुजाकार एव । तत्र च शुद्धस्य रागस्य श्रीगोकुल एव दर्शनात् । तत्र तु रागानुगा मुख्यतमा यत्र खलु स्वयं भगवानपि तेषां पुत्रादिभावेनैव विलसति "ये यथा मां प्रपद्यन्ते" (गीता ४।११) इत्यादेः "मल्लानामशनिः" (भा० १०।४३।१७) इत्यादेः "स्वेच्छामयस्य" (भा० १०।१४।२) इत्यस्माच्च ।
ततश्च भक्तकर्तृकभोजनपानस्नपनवीजनादिलक्षणलालनेच्छापि तस्याकृत्रिमैव जायते । साधारणभक्तिसद्भावेनैव हि (गीता ९।२६) —

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ १०३९ ॥ इत्युक्तम् ।

श्रीशुकदेवेन च तदेतदेवाकाङ्क्षया श्लाघितम् (भा० १०।१५।१७) —

पादसंवाहनं चक्रुः केचित् तस्य महात्मनः ।
अपरे हतपाप्मानो व्यजनैः समवीजयन् ॥ १०४० ॥ इत्यादिना ।

नानेन चैश्वर्यस्य हानिः — तदानीमपि तस्यैश्वर्यस्यान्यत्र स्फुरद्रूपत्वात् । भक्तेच्छामयत्वस्य चेशितरि प्रशंसनीयस्वभावत्वादेव । यथा श्रीव्रजेश्वरीबद्ध एव यमलार्जुनमोक्षं

कृतवान् । तादृशैश्वर्येऽपि तस्मिन् श्रीव्रजेश्वरीवश्यतैव श्रीशुकदेवेन वन्दिता “एवं सन्दर्शिता ह्यङ्ग” (भा० १०।९।१९) इत्यादिना ।
तस्माद् ये चाद्यापि तदीयरागानुगापरास्तेषामपि श्रीव्रजेन्द्रनन्दनत्वादिमात्रधर्मैरुपासना युक्ता । यथा गोवर्धनोद्धरणलब्धविस्मयान् श्रीगोपान् प्रत्युक्तं स्वयं भगवतैव श्रीविष्णुपुराणे (वि० पु० ५।१३।११) —

यदि वोऽस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि ।
तदात्मबन्धुसदृशी बुद्धिर्वः क्रियतां मयि ॥ १०४१ ॥

“तदार्चा बन्धुसदृशी बान्धवाः क्रियतां मयि” इति वा पाठः ।
तथा (वि० पु० ५।१३।१२) —

नाहं देवो न गन्धर्वो न यक्षो न च दानवः ।
अहं वो बान्धवो जातो नातश्चिन्त्यमतोऽन्यथा ॥ १०४२ ॥ इति ।

“युवां मां पुत्रभावेन ब्रह्मभावेन वासकृत्” (भा० १०।३।४५) इत्यत्र तु श्रीवसुदेवादीनामैश्वर्यज्ञानप्रधानत्वाद् द्व्यात्मिकैव भगवदनुमतिर्ज्ञेया । प्राग्जन्मन्यपि तयोस्तपआदिप्रधानैव भक्तिरुक्ता ।
अतः श्रीव्रजेश्वर्याः पुनस्तन्मुखदृष्टवैभवत्वमश्लाघित्वा पुत्रस्नेहमयीं मायाद्येकपर्यायां तत्कृपामेव बहुमन्यमानस्तादृशभाग्यं च श्रीवसुदेवादिकयोर्नास्तीति विस्पष्टयन् तस्याः श्रीव्रजेश्वरस्य च भाग्यं तादृशबाल्यलीलोच्छल्यमानपुत्रभावेन राजमानमतिश्लाघितवान् राजा “नन्दः किमकरोद् ब्रह्मन्” (भा० १०।८।४६) इत्यादिद्वयेन ।
श्रीमुनिराजश्च तादृशतत्प्रेमैव श्लाघितवान् “एवं सन्दर्शिता ह्यङ्ग हरिणा” (भा० १०।९।१९) इत्यादिना ।
तदेवं श्रीवसुदेवदेवक्यावुपलक्ष्य श्रीनारदोऽपि साधकान् प्रति “दर्शनालिङ्गनालापैः” (भा० ११।५।४७) इत्यादिना यदुपदिष्टवान् ।
तत्र टीका च यथा — “पुत्रोपलालनेनैव भागवतधर्मसर्वस्वनिष्पत्तेः” इत्येषा ।
तथा “मापत्यबुद्धिमकृथाः कृष्णे सर्वात्मनीश्वरे” (भा० ११।५।४९) इत्येतदपि तदविरोधेन टीकायामेवमवतारितं यथा — “ननु पुत्रस्नेहश्चेन् मोक्षहेतुस्तर्हि सर्वेऽपि मुच्येरन् ? तत्राह मापत्यबुद्धिमिति” इत्येतत् ।
तस्मिन्नपत्यत्वं प्राप्तेऽपि तस्मिंस्तादृशभावनावशं गतेऽप्यस्ति स्वाभाविकं पारमैश्वर्यमधिकमिति भावः ।
यद्वा पूर्ववन् नार्षोऽडागमः किन्त्वकारो निषेधे “अभावे न ह्य नो न” इति शब्दकोषात् ।
ततो निषेधद्वयादपत्यबुद्धिमेव कुर्वित्यर्थः ।
अत एव ज्ञानाज्ञानयोरनादरेण केवलरागानुगाया एवानुष्ठितिः प्रशस्ता “ज्ञात्वाज्ञात्वाथ ये वै माम्” (भा० ११।११।३३) इत्यादिना ।

तस्मात् श्रीगोकुल एव रागात्मिकायाः शुद्धत्वात् तदनुगा भक्तिरेव मुख्यतमेति साध्वेवोक्तम् । तदेवमन्यत्रासम्भवतया रागानुगामाहात्म्यदृष्ट्या पूर्णभगवत्तादृष्ट्या च श्रीकृष्णभजनस्य माहात्म्यं महदेव सिद्धम् । तत्रापि श्रीगोकुललीलात्मकस्य ।
अथ तद्भजनमात्रस्य माहात्म्यमुपक्रमत एव यथा (भा० १।२।५) —

मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलम् ।
यत् कृतः कृष्णसम्प्रश्नो येनात्मा सुप्रसीदति ॥ १०४३ ॥ इति ।

तत्रैतद् वक्तव्यम् — पूर्वं मनसः सुप्रसादहेतुः पृष्टः । अनेन तु श्रीकृष्णप्रश्नमात्रस्य तद्धेतुतोक्ता ।
न तु "स वै पुंसां परो धर्मः" (भा० १।२।६) इत्यादिना तदीयानन्तरप्रकरणे यथा महता प्रयत्नेन कर्मार्पणमारभ्य भक्तिनिष्ठापर्यन्त एव जाते प्रादुर्भावान्तरभजनस्य तद्धेतुतोक्ता तथेति ।
अत एवावतारान्तरकथाया अपि तदभिनिवेश एव फलमित्याह (भा० २।८।२-३) —

हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः ।
कथयस्व महाभाग यथाहमखिलात्मनि ।
कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम् ॥ १०४४ ॥ इति ।

हरेस्तदवताररूपस्य । अखिलात्मनि सर्वांशिनि कृष्णे श्रीमदर्जुनसखे ॥ राजा ॥

३२६ । तथा श्रीमदुद्धवसंवादान्ते च यथा । तत्र यद्यपि पूर्वाध्यायसमाप्तौ उक्ताया ज्ञानयोगचर्याया भक्तिसहभावेनैव स्वफलजनकत्वं श्रीभगवतोक्तम् ।
तथापि तां ज्ञानयोगचर्यामंशतोऽप्यनङ्गीकुर्वता परमैकान्तिना श्रीमदुद्धवेन (भा० ११।२९।१-२) —

सुदुश्चरामिमां मन्ये योगचर्यामनात्मनः ।
यथाञ्जसा पुमान् सिध्येत् तन् मे ब्रूह्यञ्जसाच्युत ॥ १०४५ ॥
प्रायशः पुण्डरीकाक्ष युञ्जन्तो योगिनो मनः ।
विषीदन्त्यसमाधानान् मनोनिग्रहकर्शिताः ॥ १०४६ ॥

इत्यत्र स्ववाक्ये तस्या दुष्करत्वेन प्रायः फलपर्यवसायित्वाभावेन चोक्तत्वात् । शुश्रूषमाणाया भक्तेस्तु सुकरत्वेनावश्यकफलपर्यवसायित्वेन चाभिप्रेतत्वात् तद्भक्तिरेव कर्तव्येति स्वाभिप्रायो दर्शितः ।
तदेवं तां ज्ञानयोगचर्यामनादृत्य भक्तिमेवाङ्गीकुर्वाणास्तव श्रीकृष्णरूपस्यैव भक्तिं तादृशास्तु ज्ञानयोगादिफलानादरेणैव कुर्वन्तीति पुनराह चतुर्भिः (भा० ११।२९।३) —

अथात आनन्ददुघं पदाम्बुजं हंसाः श्रयेरन्नरविन्दलोचन ।
सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्माययामी विहता न मानिनः ॥ १०४७ ॥

यस्मादेवं केचन विषीदन्ति—अथात अत एव ये हंसाः सारासारविवेकचतुरास्ते तु समस्तानन्दपरिपूरकं पदाम्बुजमेव नु निश्चितं सुखं यथा स्यात् तथा श्रयेरन्—पदाम्बुजस्य सम्बन्धिपदानुक्तिः साक्षाद्दृश्यमानतदीयपदाम्बुजाभिव्यञ्जनार्था ।
अमी च शुद्धभक्ता योगकर्मभिस्त्वन्मायया च विहताः कृतभक्त्यनुष्ठानान्तराया न भवन्ति यतो न च मानिनोऽपि न भवन्ति । पुरुषार्थसाधने भगवतो निरुपाधिदीनजनकृपाया एव साधकतमत्वं मन्यन्ते न योगिप्रभृतिवत् स्वप्रयत्नस्येत्यर्थः ॥

३२७ । एवम्भूतस्य भक्तस्य ज्ञानयोगादीनां यत् फलं तन् मात्रं न किन्त्वन्यन् महदेवेत्याह (भा० ११।२९।४)—

किं चित्रमच्युत तवैतदशेषबन्धो दासेष्वनन्यशरणेषु यदात्मसात्त्वम् ।
योऽरोचयत् सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ॥ १०४८ ॥

अशेषबन्धो ! दासेष्वनन्यशरणेषु । यद्वा । अशेषाणामसुरपर्यन्तानां यो बन्धुर्मोक्षादिदानैर्निरुपाधिहितकारी । हे तथाभूत !
तवैतत् किं चित्रम् ? यदनन्यशरणेषु ज्ञानयोगकर्माद्यनुष्ठानविमुखेषु दासेषु शुद्धभक्तेषु बलिप्रभृतिष्वात्मसात्त्वं तेषां य आत्मा तदधीनत्वमित्यर्थः ।
तदुक्तम् "न साधयति मां योगः" (भा० ११।१४।२०) इत्यादि ।
तस्य तव तथाभूतेषु न जातिगुणाद्यपेक्षा चेत्यन्तरङ्गलीलायामपि दृश्यत इत्याह—य इति । सहेति सहभावं सख्यमित्यर्थः । मृगैर्वृन्दावनचारिभिः ।
स्वयं तु कथम्भूतोऽपि ? ईश्वराणामित्यादिलक्षणोऽपि । ईश्वराः श्रीशिवब्रह्मादयः । ज्ञानयोगादिपरमफलरूपापि या मुक्तिस्तां दैत्येभ्योऽपि ददासि । पाण्डवादिसख्यदौत्यवीरासनादिस्थितिवद् दासानां तु स्वयमधीनो भवसि । अत एवम्भूतस्य श्रीकृष्णस्यैव तव भक्तिर्मुख्येति भावः ॥

३२८ । फलितमाह (भा० ११।२९।५)—

तं त्वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद् विसृजेत को नु ।
को वा भजेत् किमपि विस्मृतयेऽनुभूत्यै किं वा भवेन् न तव पादरजोजुषां नः ॥ १०४९ ॥

तमेवम्भूतं त्वां स्वकृतवित् "प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम्" (भा० ३।२८।१३) इत्यादिश्रीकपिलदेवोपदेशतः स्वसौन्दर्यादिस्फूर्तिलक्षणं स्वस्मिन् कृतं त्वदीयोपकारं यो वेत्ति स को नु विसृजेत् ?

“तच् चापि चित्तबडिशं शनकैर्वियुङ्क्ते” (भा० ३।२८।३४) इति तदुपदिष्टाधिकारिविशेषवत् परित्यजेत् ?
न कोऽपीत्यर्थः । तस्माद् यस्त्यजति स कृतघ्न एवेति भावः ।
कथम्भूतं त्वाम् ? स्वरूपत एवाखिलानामात्मनां दयितं प्राणकोटिप्रेष्ठमीश्वरं चेत्यादि । तथा नु वितर्के तद्व्यतिरिक्तं किमपि देवतान्तरं धर्मज्ञानादिसाधनं भूत्यै ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय वा को भजेत् ? न कोऽपीत्यर्थः ।
अस्माकं तु तत् तत् फलमपि त्वद्भक्तेरेवान्तर्भूतमित्याह — किं वेति । वाशब्देन तत्राप्यनादरः सूचितः । तदुक्तम् “यत् कर्मभिर्यत् तपसा” (भा० ११।२०।३२) इत्यादि ॥

३२९ । ननु कथं तत्तत्फलमपि विसृजति न तु माम् । किं वा मम कृतम् ?
तत्राह (भा० ११।२९।६) —

> नैवोपयन्त्यपचितिं कवयस्तवेश ब्रह्मायुषोऽपि कृतमृद्धमुदः स्मरन्तः ।
> योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्त्यवपुषा स्वगतिं व्यनक्ति ॥ १०५० ॥

हे ईश ! कवयः सर्वज्ञा ब्रह्मतुल्यायुषोऽपि तत्कालपर्यन्तं भजन्तोऽपीत्यर्थः । तव कृतमुपकारमृद्धमुद उपचितत्वद्भक्तिपरमानन्दाः सन्तः स्मरन्तः । अपचितिं प्रत्युपकारमानृण्यमिति यावत् तां न उपयन्ति पश्यन्ति । तस्मान् न विसृजेदित्युक्तम् ।
कृतमाह — यो भवान् तनुभृतां त्वत्कृपाभाजनत्वेन केषाञ्चित् सफलतनुधारिणां बहिराचार्यवपुषा गुरुरूपेणान्तश्चैत्त्यवपुषा चित्तस्फुरितध्येयाकारेणाशुभं त्वद्भक्तिप्रतियोगि सर्वं विधुन्वन् स्वगतिं स्वानुभवं व्यनक्तीति ॥ श्रीमदुद्धवः ॥

३३० । तथैव स्वभक्तेरतिशयित्वं श्रीभगवानपि तदनन्तरमुवाच । तत्र च तादृशान् प्रति शुद्धां स्वभक्तिम् “हन्त ते कथयिष्यामि” (भा० ११।२९।८) इत्यादिचतुर्भिरुक्त्वा पुनरेतादृशान् प्रति च करुणया स्वभजनप्रवर्तनार्थमन्यद् विचारितवान् चतुर्भिः ।
यतः प्रायशो लोकाः स्पर्धादिपराः कथञ्चिदन्तर्मुखत्वेऽपि सर्वान्तर्यामिरूपत्वद्भजनमात्रज्ञानिन इत्यालोच्य कृपया तेषां स्पर्धादीन् झटिति दूरीकर्तुं स्वस्मिन्नेवान्तर्मुखीकर्तुं च “विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्” (गीता १०।४२) इत्याद्युक्ततदन्तर्यामिरूपस्वांशस्य भजनस्थाने स्वभजनमुपदिष्टवान् । यथा (भा० ११।२९।१२) —

> मामेव सर्वभूतेषु बहिरन्तरपावृतम् ।
> ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥ १०५१ ॥

टीका च — “अन्तरङ्गां भक्तिमाह मामिति त्रिभिः । सर्वभूतेष्वात्मनि चात्मानमीश्वरं स्थितं मामेवेक्षेत” इत्येषा ।

कथम्भूतमीश्वरम् ? बहिरन्तः पूर्णमित्यर्थः । तत् कुतः ? अपावृतमनावरणम् । तदपि कुतः ? यथा खमनङ्गत्वाद् विभुत्वाच् चेत्यर्थः । अत्र मामेवेति श्रीकृष्णरूपमेवेक्षेत न तु केवलान्तर्यामिरूपमित्यभिप्रायेणैव "अन्तरङ्गां भक्तिमाह" इति व्याख्यातम् ॥

३३१–३३२ । ततश्च (भा० ११।२९।१३–१४) —

इति सर्वाणि भूतानि मद्भावेन महाद्युते ।
सभाजयन् मन्यमानो ज्ञानं केवलमाश्रितः ॥ १०५२ ॥
ब्राह्मणे पुक्कशे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः ॥ १०५३ ॥

केवलं ज्ञानमन्तर्यामिदृष्टिमाश्रितोऽपि । इति पूर्वोक्तप्रकारेण सर्वाणि भूतानि मद्भावेन तेषु मम श्रीकृष्णरूपस्य यो भावोऽस्तित्वं तद्विशिष्टतया मन्यमानः सभाजयन् पण्डितो मतः । मद्दृष्ट्या ब्राह्मणादिषु समदृक् समं मामेव पश्यतीति ।
ततश्च "नरेष्वभीक्ष्णम्" (भा० ११।२९।१५) इत्यादिना तादृशस्वोपासनाविशेषस्य झटिति स्पर्धादिक्षयलक्षणं फलमुक्त्वा "विसृज्य" (भा० ११।२९।१६) इत्यादिना तथादृष्टिसाधनं सर्वनमस्कारमुपदिश्य "यावत्" (भा० ११।२९।१७) इत्यादिना तादृशोपासनाया अवधिं च सर्वत्र स्वतः स्वस्फूर्तिमुक्त्वा "सर्वम्" (भा० ११।२९।१८) इत्यादिना ।
भा० ४।३०।२० —

नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद् ब्रह्मवादिभिः ।
न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः ॥ १०५४ ॥

इति प्रचेतसः प्रति श्रीभगवद्वाक्ये तट्टीकायां च तस्य भगवतः प्रतिपदनव्यस्फूर्तिरेव ब्रह्मेति यदुक्तं तदेव तत्फलमित्युक्त्वा ।
यद्वा "कथमस्यावतारस्य ब्रह्मता भवति" (गो० ता० उ० २।२८) इति गोपालतापनीश्रुति-प्रसिद्धब्रह्मेत्यभिधाननराकृतिपरब्रह्मरूपस्फूर्तिस्तत्फलमित्युक्त्वा तेनैव तादृशोपासनां सर्वोर्द्धमपि प्रशंसति (भा० ११।२९।१९) —

अयं हि सर्वकल्पानां सध्रीचीनो मतो मम ।
मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः ॥ १०५५ ॥

सर्वकल्पानां सर्वोपायानां सध्रीचीनः समीचीनः । मद्भावो मम श्रीकृष्णरूपस्य भावना । एतच्च श्रीकृष्णभजनस्यान्तर्यामिभजनादप्याधिक्यं श्रीगीतोपसंहारानुसारेणैवोक्तं तथाहि (गीता १८।६१–६६) —

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ १०५६ ॥

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ १०५७ ॥
इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ १०५८ ॥
सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ १०५९ ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ १०६० ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ १०६१ ॥ इति ।

अत्र च गुह्यं पूर्वाध्यायोक्तं ज्ञानम् । गुह्यतरमन्तर्यामिज्ञानम् । सर्वगुह्यतमं तन्मनस्त्वा-दिलक्षणं तदेकशरणत्वलक्षणं च तदुपासनमिति समानम् ।
एवं श्रीगीतास्वेव नवमाध्यायेऽपि (गीता ९।१) —

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज् ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १०६२ ॥

"राजविद्या राजगुह्यम्" (गीता ९।२) इत्यादिना वक्ष्यमाणार्थं प्रशस्य श्रीकृष्णरूपस्वभज-नश्रद्धाहीनान् निन्दंस्तच्छ्रद्धावतः प्रशस्तवान् स्वयमेव । यथा (गीता ९।११–१३) —

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ १०६३ ॥
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १०६४ ॥
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १०६५ ॥

माम् "अव" अनादरेण मानुषीं तनुमाश्रितं जानन्तीत्यर्थः । तस्मात् सर्वान्तर्यामिभजना-दप्युत्तमत्वेन तदनन्तरं च "सर्वगुह्यतमम्" इत्यत्र सर्वग्रहणात् सर्वत उत्तमत्वेन श्रीकृष्ण-भजने सिद्धे तदवतारभजनात् सुतरामेवोत्तमता सिध्यति ॥

३३३ । अथ तामेव कैमुत्येनाप्याह (भा० ११।२९।२१) —

यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत् ।
तत्रायासोऽनिरर्थः स्याद् भयादेरिव सत्तम ॥ १०६६ ॥

मयि मदर्पितत्वेन कृतो यो यो धर्मो वेदविहितः स स यदि निष्फलाय फलाभावाय कल्प्यते फलकामनया नार्प्यत इत्यर्थः । तदा तत्र तत्रायासः श्रान्तिरनिरर्थः स्यात् व्यर्थो न भवति ।

निष्फलायेति विशेषणं फलभोगादिरूपतद्भक्त्यन्तरायाभावेनानिरर्थतातिशयतात्पर्यम् । तत्रानिरर्थत्वे कैमुत्येन श्रीकृष्णलक्षणस्य स्वस्यासाधारणभजनीयताव्यञ्जको दृष्टान्तः — भयादेरिवेति । यथा कंसादौ मत्सम्बन्धमात्रेण भयादेरप्यायासो निरर्थो न भवति — मोक्षसम्पादकत्वादित्यर्थः ॥

३३४ । अथ श्रीमदुद्धववत् श्रीकृष्णैकानुगतानां साधनत्वे साध्यत्वे च स्वयं श्रीकृष्णरूप एव परमोपादेय इत्याह (भा० ११।२९।३३) —

ज्ञाने कर्मणि योगे च वार्तायां दण्डधारणे ।
यावानर्थो नृणां तात तावांस्तेऽहं चतुर्विधः ॥ १०६७ ॥

ज्ञानादौ यावान् धर्मादिलक्षणश्चतुर्विधोऽर्थः । तावान् सर्वोऽप्यहमेव । तत्र ज्ञाने मोक्षः । कर्मणि धर्मः कामश्च । योगे नानाविधसिद्धिलक्षणो लौकिको वार्तायां दण्डधारणे च नानाविधलौकिकश्चार्थ इति चतुर्विधत्वं ज्ञेयम् ॥ श्रीभगवान् ॥

३३५ । पुनरेवमेव श्रीमदुद्धवोऽपि प्रार्थितवान् (भा० ११।२९।४०) —

नमोऽस्तु ते महायोगिन् प्रपन्नमनुशाधि माम् ।
यथा त्वच्चरणाम्भोजे रतिः स्यादनपायिनी ॥ १०६८ ॥

टीका च — "एवं यद्यपि त्वया बहूपकृतं तथाप्येतावत् प्रार्थय इत्याह 'नमोऽस्तु' इति । अनुशाधि अनुशिक्षय । अनुशासनीयत्वमेवाह 'यथा' इति । मुक्तावप्यनपायिनी" इत्येषा ॥ श्रीमानुद्धवः ॥

३३६ । अत एवान्यत्राप्यभिप्रायाय (भा० ११।१४।३१) —

यथा त्वामरविन्दाक्ष यादृशं वा यदात्मकम् ।
ध्यायेन् मुमुक्षुरेतन् मे ध्यानं मे वक्तुमर्हसि ॥ १०६९ ॥

टीका च — "मुमुक्षुस्त्वां यथा ध्यायेत् तन् मे वक्तुमर्हसीति । जिज्ञासोः कथनाय मे पुनरेतत् त्वद्दास्यमेव पुरुषार्थः । न तु ध्यानेन कृत्यमस्तीति । तदुक्तम् 'त्वयोपभुक्तस्रग्गन्ध' (भा० ११।६।४६) इत्यादि" इत्येषा ॥ श्रीमानुद्धवः ॥

३३७ । तस्य सर्वावतारावतारिष्वप्रकटितं परमशुभस्वभावत्वं च स्मृत्याह (भा० ३।२।२३) —

अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥ १०७० ॥

धात्र्या या उचिता गतिस्तामेव ॥ स (श्रीमदुद्धवः) एव ॥

३३८ । अनेन तत्रापि गोकुललीलात्मकस्य श्रीकृष्णस्य भजनमाहात्म्यातिशयो दर्शितः । तथा "पूतना लोकबालघ्नी" (भा० १०।६।३५) इत्यादौ च ज्ञेयम् ।
तथा श्रीकृष्णसन्दर्भे च "येन येनावतारेण" (भा० १०।७।१) इत्यादिकं विवृतमस्ति ।
अथ गोकुलेऽपि श्रीमद्व्रजवधूसहितरासादिलीलात्मकस्य परमवैशिष्ट्यमाह (भा० १०।३३।४०) —

विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद् यः ।
भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥ १०७१ ॥

चकारादन्यच्च । अथेति वार्थे — शृणुयाद्वा वर्णयेद्वा । उपलक्षणं चैतद् ध्यानादेः । परां यतः परा नान्या कुत्रचिद् विद्यते तादृशीम् । हृद्रोगं कामादिकमपि शीघ्रमेव त्यजति ।
अत्र सामान्यतोऽपि परमात्वसिद्धे तत्रापि परमप्रेष्ठश्रीराधासंवलितलीलामयतद्भजनं तु परमतममेवेति स्वतः सिध्यति । किन्तु रहस्यलीला तु पौरुषविकारवदिन्द्रियैः पितृपुत्र-दासभावैश्च नोपास्या — स्वीयभावविरोधात् । रहस्यत्वं च तस्याः क्वचिदल्पांशेन क्वचित् तु सर्वांशेनेति ज्ञेयम् ॥ श्रीशुकः ॥

३३९ । तत्र ते भक्तिमार्गा दर्शिताः । अत्र च श्रीगुरोः श्रीभगवतो वा प्रसादलब्धं साधनसा-ध्यगतं स्वीयसर्वस्वभूतं यत् किमपि रहस्यं तत् तु न कस्मैचित् प्रकाशनीयम् ।
यथाह (भा० ८।१७।२०) —

नैतत् परस्मा आख्येयं पृष्टयापि कथञ्चन ।
सर्वं सम्पद्यते देवि देवगुह्यं सुसंवृतम् ॥ १०७२ ॥

सम्पद्यते फलदं भवति ॥ श्रीविष्णुरदितिम् ॥

३४० । तदेवं साधनात्मिका भक्तिर्दर्शिता । तत्र सिद्धिक्रमश्च श्रीसूतोपदेशारम्भे "शुश्रूषोः श्रद्दधानस्य" (भा० १।२।१६) इत्यादिना दर्शितः ।
यथा च श्रीनारदवाक्ये "अहं पुरातीतभवेऽभवम्" (भा० १।५।२३) इत्यादौ ।
यथा च श्रीकपिलदेववाक्ये "सतां प्रसङ्गान् मम वीर्यसंविदः" (भा० ३।२५।३५) इत्यादौ ।
अत्र कैवल्यकामायाम् "भक्त्या पुमाङ् जातविरागः" (भा० ३।२५।२६) इत्यादिना ।
शुद्धायाम् "नैकात्मतां मे स्पृहयन्ति केचित्" (भा० ३।२५।३४) इत्यादिना क्रमो ज्ञेयः ।
तथा शुद्धायामेव श्रीप्रह्लादकृतदैत्यबालानुशासने "गुरुशुश्रूषया" (भा० ७।७।३०) इत्या-दिना ।
तमेवं क्रममेव सङ्क्षिप्य सदृष्टान्तमाह (भा० ११।२।४२-४३) —

भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ।
प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥ १०७३ ॥
इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ।
भवन्ति वै भागवतस्य राजंस्ततः परां शान्तिमुपैति साक्षात् ॥ १०७४ ॥

टीका च — "प्रपद्यमानस्य हरिं भजतः पुंसो भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पदभगवद्रूपस्फूर्तिस्तया निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिरित्येष त्रिक एककालो भजनसमकाल एव स्यात् । यथाश्नतो भुञ्जानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः ।
"उपलक्षणमेतत् । प्रतिसिक्थमपि यथा स्युस्तद्वत् । एवमेवैकस्मिन् भजने किञ्चित् प्रेमादित्रिके जायमान अनुवृत्त्या भजतः परमप्रेमादि जायते । बहुग्रासभोजिन इव परमतुष्ट्यादि । ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह 'इत्यच्युताङ्घ्रिम्' इति" इत्येषा ।
शान्तिं कृतार्थत्वं साक्षादन्तर्बहिश्च प्रकटितपरमपुरुषार्थत्वादव्यवधानेनैवेत्यर्थः । पूर्वपद्ये भक्त्यादीनां तुष्ट्यादयः क्रमेणैव दृष्टान्ता ज्ञेयाः — उत्तरत्राप्येतत्क्रमेणैव भक्तितुष्ट्योः सुखैकरूपत्वात् । पुष्ट्यनुभवयोरात्मभरणैकरूपत्वात् क्षुदपायविरक्त्योः शान्त्येकरूपत्वात् ।
यद्यपि भुक्तवतोऽन्नेऽपि वैतृष्ण्यं जायते भगवदनुभविनस्तु विषयान्तर एवेति वैधर्म्यं तथापि वस्त्वन्तरवैतृष्ण्यांश एव दृष्टान्तो गम्य इति ॥ श्रीकविर्निमिम् ॥
तदेतद् व्याख्यातमभिधेयम् । अत्रान्योऽपि विशेषः शास्त्रमहाजनदृष्ट्यानुसन्धेयः ।

गुरुः शास्त्रं श्रद्धा रुचिरनुगतिः सिद्धिरिति मे
यदेतत् तत् सर्वं चरणकमलं राजति ययोः ।
कृपापूरस्यन्दस्नपितनयनाम्भोजयुगलौ
सदा राधाकृष्णावशरणगती तौ मम गतिः ॥ १०७५ ॥

इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत् कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभाजनश्रीरूपसनातनानुशासनभारतीगर्भे षट्सन्दर्भात्मके श्रीश्रीभागवतसन्दर्भे श्रीश्रीभक्तिसन्दर्भो नाम पञ्चमः सन्दर्भः ॥

श्रीभागवतसन्दर्भे सर्वसन्दर्भगर्भगे ।
पञ्चमो भक्तिसन्दर्भः समाप्तिमिह सङ्गतः ॥

समाप्तोऽयं श्रीश्रीभक्तिसन्दर्भः ॥